



MEMORIAL EDITION

OF THE WORKS OF

SRI SANKARACHARYA.




THE WORKS
Sri Sankaracharya


THE WORKS OF
SRI SANKARACHARYA
VOLUME
11
SRI VANI VILAS PRESS
SRIRANGAM

परिग्रहण सं०....10373....
ग्रन्थागार, के. उ. वि. शि. संस्थान
सारनाथ, वाराणसी



TO

HIS HOLINESS SRI JAGADGURU

SRI SACHCHIDANANDA SIVABHINAVA

NRISIMHA BHARATI SWAMI

WHO ADORNS THE THRONE OF THE SRINGERI MUTH

AS THE WORTHY REPRESENTATIVE OF THE

GREAT SANKARACHARYA

AND

THAN WHOM IT IS IMPOSSIBLE

TO COME ACROSS A HOLIER PERSONAGE,

A PURER MAHATMA, A NOBLER SAINT

AND A MORE RIGOROUS ASCETIC

THIS EDITION IS MOST RESPECTFULLY INSCRIBED

AS A TOKEN OF UNBOUNDED ADMIRATION

BY THE HUMBLEST OF ALL HIS DISCIPLES

T K BALASUBRAHMANYAM



नानाजन्मसु संचितेन तपसा पूतेन चित्तात्मना
मित्रेण प्रतिबोधितेन कृतुकात्सर्वां कृतीः शांकरीः ।
समुद्रं प्रथमं जगद्गुरुपदे भक्त्या मयाद्यार्पिताः
स्वीकृत्यार्पहृतिं करोतु गुरुराड् धन्यं तथेमं जनम् ॥

श्रीमच्छंकरदेशिकेन्द्ररचितान्सर्वान्प्रबन्धान्मुदा
नम्प्रीत्यै परिशोध्य पुस्तकचयैः संमुद्र्य साकं बुधैः ।
तच्छात्रप्रवरालिमभ्यविलसच्छ्रीदेशिकेन्द्रेषु ता-
न्कृत्वार्पोपहृतिं समर्पिकविनयं नूनं कृतार्थोऽस्म्यहम् ॥

सौम्याब्दमाधार्जुनपक्षगाब्जसूर्याङ्कतिथ्याश्रितसोमवारे ।
श्रीशंकरार्यप्रतिमाप्रतिष्ठाकाले मयैषोपहृतिर्न्यधायि ॥

श्रीशंकरकृतिमाला गुरुवरतुष्ट्यै समर्पिता भादात् ।
बालादिमपदभाजा सुब्रह्मण्येन भक्तिनम्रेण ॥ ४ ॥



THE BHAGAVAD-GITA-BHASHYA — PAGE

Chapter 1 — 1
Chapter 2 — 15
Chapter 3 — 73
Chapter 4 — 109
Chapter 5 — 149
Chapter 6 — 177
Chapter 7 — 211
Chapter 8 — 231
Chapter 9 — 251






श्रीमद्भगवद्गीताभाष्यम्

	पृष्ठम्
अध्यायः १. . ..	१
अध्यायः २.	१३
अध्यायः ३. .. .	७३
अध्यायः ४. .. .	१०९
अध्यायः ५.	१४९
अध्यायः ६.	१७७
अध्याय. ७. .. .	२११
अध्यायः ८.	२३१
अध्यायः ९	२५१





THE Bhagavad-Gita Bhashya

VOLUME 1

श्री

भगवद्गीताभाष्यम्

श्रीमच्छंकरभगवत्पूज्यपादैः


विरचितम् ।



प्रथमो भागः

॥ श्रीः ॥

॥ भगवद्गीताविषयानुक्रमणिका ॥



१. कर्मसंन्यासात्मकसाधनप्रधाना त्वंपदार्थप्रधाना च आद्या षडध्यायी ।

प्रथमोऽध्यायः ।

	श्लोकः
युद्धविषये सजय प्रति धृतराष्ट्रस्य प्रश्नः ...	१
धृतराष्ट्रेण पृष्टस्य सजयस्योत्तरारम्भः ...	२
दुर्योधनस्य द्रोणाचार्यं प्रति युद्धसाहायकप्रार्थना ...	३—११
दुर्योधनहर्षार्थं भीष्मादिभिः शङ्खपूरणम् ...	१२—१३
स्वसैन्यप्रोत्साहनकृते कृष्णार्जुनादिभिः शङ्खवादनम्	१४—१८
पाण्डवकृतशङ्खवादनेन धार्तराष्ट्राणां हृदयविदारणम्	१९
युद्धार्थं व्यवस्थितान्धार्तराष्ट्रानन्यांश्च योद्धॄन्निर्वर्णयितुं श्रीकृष्णं प्रत्यर्जुनस्योभयोः सेनयोर्मध्ये रथस्थापनप्रार्थना ...	२०—२३

श्लोकः

भगवता सेनाद्वयमध्ये रथस्थापनपूर्वकमर्जुनाय दर्शिताः समवेता योद्धार इति निरूपणम् ... २४—२५
युद्धभूमावुभयोरपि सेनयोः स्थितान्बन्धूनवलोक्यार्जुनस्य विषादः ... २६—२७
श्रीकृष्ण प्रत्यर्जुनस्य विषादप्रदर्शिकोक्तिसरणिः ... २८—४६
शोकाकुलस्यार्जुनस्य शरचापौ परित्यज्य रथोपस्थोपवेशः ... ४७

द्वितीयोऽध्यायः ।

सजयवचनम् .. १
विषीदन्तं पार्थं युद्धे प्रविवर्तयिषोर्भगवतस्तद्विषादनिबर्हणोक्तिः ... २— ३
गुर्वादिभिः सार्धं योद्धुमयुक्तमित्युक्तिपूर्वकमर्जुनस्य युद्धकरणाकरणयोः कतरच्छ्रेय इति जिज्ञासोः श्रीकृष्ण प्रति शिष्यत्वेनोपसत्तिः ... ४— ८
सजयवचनम् ... ९—१०
अर्जुनस्य शोकमोहावपनेतु भगवत्कृतः संसारनिवर्तक आत्मतत्त्वविनिर्णयप्रकारः ... ११—३०
क्षत्रियधर्मत्वाद्युद्धस्यावश्यतत्कर्तव्यत्वोक्तिः .. ३१
युद्धस्य स्वर्गसाधनत्वकथनम् ... ३२
स्वधर्मभूतयुद्धाकरणे स्वधर्मकीर्तिहान्या पातककथनम् ३३

श्लोकः

सभावितस्य मृतिर्वरीयस्यकीर्तिस्तु दुःसहेति प्रदर्शनम् ३४

युद्धाद्भीतो निवृत्त इत्यादिनिन्दावचन शृण्वतो दुःख महद्धि स्यादिति कथनम् ... ३५—३६

अधिसमर शरीरहतौ स्वर्गप्राप्तिररिविजये वा महीप्राप्तिरिति पश्यन्युद्धकरण एव मतिं कुर्वित्युक्तिः ३७

जयाजययोः समत्वदृष्ट्या युद्ध कुर्वतो दोषाभावकथनम् ... ३८

आत्मतत्त्वसाक्षात्कारहेतोर्निष्कामकर्मानुष्ठानस्य समाधियोगस्य च निरूपणम् ... ३९—५३

पार्थकृतः स्थितप्रज्ञलक्षणप्रश्नः ... ५४

स्थितप्रज्ञलक्षणकथनम् ... ५५—५८

विषयविमुखानामपीन्द्रियाणा तत्तद्विषयरागानुवृत्तौ प्रज्ञालाभः कथ स्यादित्याशङ्कायामुत्तरम् ... ५९

विपश्चितोऽपि यतमानस्य प्रसभमिन्द्रियाणि मनो हरन्तीत्युक्तिः ... ६०

सयतेन्द्रियस्य युक्तस्य प्रज्ञा स्थिरीभवतीति कथनम् ६१

विषयान्ध्यायतः सङ्गादिद्वारा पुसः प्रणाशकथनम् ६२—६३

मोक्षहेतूपन्यासः ... ६४—६५

अशान्तस्यासुखित्वकथनम् ... ६६

अविजितेन्द्रियाणा मनसा प्रज्ञापहार इत्यत्र दृष्टान्तप्रदर्शनम् .. ६७

श्लोक

विजितेन्द्रियस्य प्रज्ञा स्थिरा भवतीति कथनम् ... ६८

परमार्थसत्या सर्वभूतनिशाया सयमी जागर्तीत्युक्तिः ६९

यतेरेव स्थितप्रज्ञस्य विदुषस्त्यक्तैषणस्य मोक्षावाप्तिर्न त्वयतेरित्यत्र दृष्टान्तप्रदर्शनम् ... ७०

निवृत्तसर्वकामस्यैव पुसः शान्तिप्राप्तिरिति कथनम् ७१

ज्ञाननिष्ठायाः स्तुतिः ... ७२

तृतीयोऽध्यायः ।

ज्यायसी चेत्कर्मणस्त इत्यादिरर्जुनस्य प्रश्नः .. १— २

कर्मयोगज्ञानयोगयोर्भिन्नाधिकारिकत्वकथनम् .. ३

अनात्मज्ञस्य कर्मयोगावश्यकत्वनिरूपणम् ... ४— १६

आत्मज्ञस्य कर्मयोगानावश्यकत्वप्रतिपादनम् .. १७—१८

सर्वथा फलानुषङ्गादर्जुनोनिवर्तनपूर्वक स्वधर्मे तत्प्रवर्तनम् ... १९—३५

अर्जुनकृतः पापाचरणप्रवृत्तिहेतुप्रश्नः ... ३६

सर्वानर्थहेतोः कामस्य वैरित्वं प्रतिपाद्येन्द्रियजयादिना तत्क्षयस्य निरूपणम् ... ३७—४३

चतुर्थोऽध्यायः ।

यथोक्तस्य ज्ञानयोगस्य कृत्रिमत्वशङ्कापनुत्तये वशकथनेन स्तुतिः ... १— ३

श्लोकः

लोकस्य भगवान्नेश्वर इवेति शङ्कां निवर्तयितुमिच्छतोऽर्जुनस्य प्रश्नः ४

अतीतानेकजन्मवत्त्वं सर्वप्राणिसाधारणत्वेन प्रदर्श्यात्मनस्तु तज्ज्ञानसत्त्वरूपविशेषप्रदर्शनम् ... ५

भगवत आत्मजन्मप्रकारप्रयोजनानुकथनम् ... ६— ८

भगवत्कर्तृक स्वदिव्यजन्मकर्मवेदनेन प्राणिनां पुनर्जन्माभावस्य कथनम् ... ९

पूर्वेषामपि ब्रह्मविदामेतेनैव मोक्षमार्गेण कैवल्यप्राप्तिरिति कथनम् ... १०

तत्तत्कामनानुरोधेनात्मनस्तत्तत्फलदातृत्वकथनम्... ११

कर्मजायाः सिद्धेः शीघ्रभावितया सर्वेषा कर्मप्रवृत्तिकथनम् ... १२

चातुर्वर्ण्यसृष्टिकर्तुरपि भगवतो वस्तुतः स्वस्य तदकर्तृत्वबोधनम् .. १३

स्वस्याकर्तृत्वज्ञानेनापि पुसः कर्मबन्धाभाव इति भगवत उक्तिः ... १४

स्वात्मानमकर्तारं कर्मफलनिःस्पृह च ज्ञात्वा कर्म कुर्विति पार्थं प्रति नियोगः . १५

कर्माकर्मकथनप्रतिज्ञानम् ... १६

कर्मणो दुर्विज्ञेयत्वोक्तिः .. १७

कर्मादीना तत्त्वप्रदर्शनम् ... १८

श्लोक

कर्माकर्मणोरकर्मकर्मदर्शनस्तुतिः ... १९—२३
उक्तज्ञानस्य यज्ञत्वसपादनम् ... २४
दैवयज्ञादिकथनपूर्वक ज्ञानयज्ञस्य सर्वयज्ञेभ्यः श्रेष्ठत्वप्रतिपादनम् ... २५—३३
गुरुप्रणिपातादिना यथोक्तज्ञानस्य प्राप्तिकथनम् .. ३४
ज्ञानमहत्त्वकथनम् .. ३५—३८
ज्ञानप्राप्ति प्रत्युपाय प्रदर्श्य ज्ञानहेतौ कर्मयोगेऽर्जुनप्रवर्तनम् ... ३९—४२

पञ्चमोऽध्यायः ।

ज्ञानरहितसन्यासकर्मयोगयोः कः प्रशस्यतर इत्यर्जुनस्य प्रश्नः ... १
यथोक्तसन्यासात्कर्मयोगस्य सहेतुक प्रशस्यतरत्वकथनम् ... २— ३
ज्ञानसहितसन्यासकर्मयोगलक्षणयोः सांख्ययोगयोः फलैकत्वोक्तिः ... ४— ५
पारमार्थिक· सन्यास· कर्मयोगमन्तरा दुःखैकफलक इति कथनम् . ६
लोकसग्रहाय केवल कर्म कुर्वतोऽपि सम्यग्दर्शननिष्ठस्य न तत्फलविलेप इत्युपपादनम् .. ७—१०
योगिनस्तत्फलाविलेपे हेतुद्वयकथनम् ... ११—१२
विदुषः सुखेन देहावस्थितिकथनम् ... १३

श्लोकः

आत्मनः प्रभोः कारयितृत्वाद्यभावकथनपुरःसर
स्वभावस्य कारयितृत्वादिप्रतिपादनम् ... १४—१५
ज्ञानिना ज्ञानेन ब्रह्मप्राप्तिकथनम् ... १६—१७
ज्ञानिनो ब्राह्मणादौ सर्वत्र समदर्शित्ववर्णनम् ... १८
समदर्शित्वेऽपि ज्ञानिना दोषाभावप्रतिपादनम् .. १९
ब्रह्मनिष्ठस्य प्रियाप्रियसनिधावपि हर्षोद्वेगराहित्यक-
थनम् ... २०
ब्रह्मनिष्ठस्य विषयेष्वसक्तस्याक्षयसुखावाप्तिकथनम् २१
इन्द्रियाणा विषयसकाशान्निवर्तने हेतूपन्यासः ... २२
प्रागेव देहत्यागात्कामक्रोधोद्भव वेग निगृह्णत एव
युक्तत्वसुखित्वयोः कथनम् ... २३
अन्तः सुखादिविशिष्टस्य ब्रह्मप्राप्तिकथनम् ... २४—२६
ध्यानयोगस्य सक्षेपत उपक्षेपः ... २७—२९

षष्ठोऽध्यायः ।

निष्कामकर्मयोगस्य सत्त्वशुद्धिद्वारा ध्यानयोगप्राप्त्यु-
पायत्वात्स्तुतिः ... १—२
ध्यानयोगेऽवस्थातुमशक्तस्य निष्कामकर्मयोगः, श-
क्तस्य तु सर्वकर्मसन्यास इति प्रतिपादनम् .. ३
ध्यानयोगारूढस्य लक्षणकथनम् ... ४—९
विस्तरत आसनाहारविहारादिनियमकथनसहित
सफलध्यानयोगनिरूपणम् ... १०—३२

श्लोकः

यथोक्तध्यानयोगस्य मनश्चाञ्चल्येन दुष्करत्वप्रतिपादकः प्रश्नः ... ३३—३४
अभ्यासवैराग्याभ्या मनोनिग्रहे सति ध्यानयोगसिद्धिरित्युक्तिः ... ३५
असयतात्मना ध्यानयोगस्य दुष्प्रापत्वकथनम् ... ३६
ध्यानयोगप्रवृत्तस्य त्यक्तसर्वकर्मणः प्रागेव सम्यग्दर्शनलक्षणफलप्राप्तेर्देहवियोगे का गतिरित्यर्जुनप्रश्नः ३७—३९
योगभ्रष्टस्य विनाशाभावप्रतिपादनपुरःसरमुत्तमगतिप्राप्तिकथनम् ... ४०—४५
ध्यानयोगिनः सर्वश्रेष्ठत्वकथनपूर्वक ध्यानयोगेऽर्जुनस्य प्रवर्तनम् ... ४६
रुद्रादित्यादिध्यानपराणा मध्ये वासुदेवध्याननिष्ठस्य युक्ततमत्वबोधनम् ... ४७

———*———

२. उपास्यनिष्ठा तत्पदार्थनिष्ठा वा मध्यमा षडध्यायी ।

सप्तमोऽध्यायः ।

भगवद्ध्यानयोगनिष्ठस्य विभूत्यादिसमस्तगुणसपन्न भगवज्ज्ञानप्राप्त्युपदेशप्रतिज्ञा ... १— २

श्लोकः

ज्ञानदुर्लभत्वप्रदर्शनम् ... ३
अपरप्रकृतेर्भूम्याद्यष्टभेदभिन्नत्वोक्तिः ... ४
जीवभूतपरप्रकृतिकथनम् ... ५
यथोक्तप्रकृतिद्वयद्वारेश्वरस्य जगत्कारणत्वनिरूपणम् ६
सर्वभूतानां परमेश्वरे प्रोतत्वकथनम् . ७
सक्षेपतो रसादिविभूतिप्रकथनम् ... ८—१२
सात्त्विकादित्रिविधभावमोहितत्वाल्लोकाना भगवत्त-
त्त्वानभिज्ञत्ववर्णनम् ... १३
भगवदेकशरणस्य तत्त्वज्ञानेन मायातिक्रमकथनम् १४
दुष्कृतिना भगवद्भक्तिपराङ्मुखत्वनिवेदनम् ... १५
भगवद्भजनप्रवृत्ताना सुकृतिना भक्ताना चातुर्वि-
ध्यनिर्देशः ... १६
तथाविधेषु भक्तेषु ज्ञानिनः श्रेष्ठत्वप्रतिपादनम् ... १७—१९
अपहृतविवेकविज्ञानताया देवतान्तरभजननिमित्तत्वोक्तिः २०
देवतान्तरोपासकाना तत्तदुपासनश्रद्धादार्ढ्यापादनेन
भगवत एव तत्तत्स्वरूपेणेष्टप्रदातृत्वकथनम्... २१—२२
अन्यदेवतोपासकानामवाप्तफलस्यान्तवत्त्वप्रदर्शनम् २३
परमार्थतत्त्वस्य ज्ञाने हेतुनिरूपणम् ... २४—२७
भगवद्भजनद्वारा सुकृतिनामुत्तमगतिप्राप्तिकथनम्... २८—३०

अष्टमोऽध्यायः ।

किं तद्ब्रह्मेत्यादिप्रश्नसप्तकम् ... १— २

श्लोकः

यथोक्तस्य प्रश्नसप्तकस्योत्तरम् ... ३— ५
अन्त्यभावनानुरोधेन देहान्तरावाप्तिकथनम् ... ६
सर्वदा भगवद्ध्यानपुरःसरमर्जुनस्य युद्धादिकरणे प्रवर्तनम् ... ७
अभ्यासयोगयुक्तस्य पुरुषोत्तमप्राप्तिकथनम् ... ८—१०
प्रणवोपासनप्रकारः ... ११—१४
ईश्वर प्राप्तवतामपुनरावृत्तिकथनम् ... १५
स्वर्गलोकादिसत्यलोकान्तगताना पुनरावृत्तिकथनम् १६—१९
परतत्त्वस्वरूपप्रदर्शनम् ... २०—२१
परमपुरुषस्य भक्तिप्राप्यत्वकथनम् ... २२
ध्यानयोगिना कर्मिणा च यथानुरूप देवयानपितृयाणरूपमार्गद्वयकथनम् ... २३—२५
यथोक्तमार्गद्वयमतानामनावृत्त्यावृत्तिप्रदर्शनम् . २६
मार्गद्वयचिन्तनप्रयोजनम् ... २७
योगमाहात्म्यम् ... २८

नवमोऽध्यायः ।

परब्रह्मतत्त्वज्ञानोपदेशः .. १—१०
मूढकर्तृकस्वावज्ञायाः स्वतत्त्वाज्ञानमूलकत्ववर्णनम् ११—१२
भक्तिलक्षणे मोक्षमार्गे महात्मना प्रवृत्तिकथनम् १३—१५
सक्षेपतो विभूतिवर्णनम् . १६—१९

श्लोक

सकामाना ससारपाप्तिकथनम् ... २०—२१
निष्कामभक्तिनिष्ठाना सम्यग्दर्शिना योगक्षेमस्य भ-
गवन्निर्वहणोक्तिः ... २२
देवतान्तरेषु भक्तिमतामपि भगवद्भक्तत्वप्रतिपादनपु-
रःसर तत्तद्भजनानुसारेण तेषा फलप्राप्तिकथनम् २३—२५
भगवदाराधनस्य सुकरत्वप्रतिपादनम् ... २६
अर्जुनस्य भगवदाराधने प्रवर्तनम् ... २७—२९
भक्तिमहिमकथनपूर्वकमर्जुनस्य तन्मार्गप्रवर्तनम् ... ३०—३३
ईश्वरभजनस्येतिकर्तव्यताप्रदर्शनम् .. ३४

दशमोऽध्यायः ।

भगवत्कृतः सक्षेपतो विभूतियोगज्ञानोपदेशः ... १—११
विस्तरेण तत्कथनार्थोऽर्जुनस्य प्रश्नः ... १२—१८
भगवता विस्तरतः कृतो विभूतियोगोपदेशः ... १९—४२

एकादशोऽध्यायः ।

विश्वरूपदिदृक्षोरर्जुनस्य भगवत्प्रार्थना ... १— ४
पार्थं प्रति भगवद्भाषणम् .. ५— ८
भगवान्विश्वरूप पार्थाय दर्शयामासेत्यादिका धृतराष्ट्र
प्रति सजयस्योक्तिः ... ९—१४
भगवतो विश्वरूप प्रति स्वानुभवप्रकटनार्थमर्जुनस्य
वचनम् .. १५—३१

श्लोकः

भूभारजिहीर्षया भगवतः प्रवृत्तत्वादहमेवैषां हन्ता त्व निमित्तमात्रं भवेति पार्थं प्रति तदुक्तिः ... ३२—३४

कदाचित्पराजयभयाद्धृतराष्ट्रः सधिं कुर्यादिति काङ्क्षया सजयस्य त प्रति वृत्तान्तकथनम् ... ३५

अर्जुनकृता भगवत्स्तुतिः .. ३६—४३

भगवन्त प्रति पूर्वरूपप्रदर्शनार्था पार्थकृता भगवदभ्यर्थना .... ४४—४६

भीतः पार्थ इत्यात्मनो विश्वरूपमुपसङ्हृत्य तदाश्वासनार्थं भगवतो वचनम् .... ४७—४९

सजयस्योक्तिः ५०

भगवत्पूर्वरूपदर्शनेनार्जुनस्यान्तःस्थैर्यप्रदर्शनम् ... ५१

विश्वरूपदर्शनमनन्यभक्तिसाध्यमिति भगवदुक्तिः... ५२—५४

ईश्वरार्थकर्मादियुक्तस्य तत्प्राप्तिप्रतिपादनम् ... ५५

द्वादशोऽध्यायः ।

विश्वरूपस्याक्षरस्य चोपासकाना मध्ये योगवित्तमत्व केषामित्यर्जुनप्रश्नः ... १

उभयेषां तेषां तारतम्यप्रतिपादनम् .. २— ७

विश्वरूपध्यानलक्षणे भक्तियोगेऽर्जुन प्रति भगवत्प्रवर्तनम् .. ८

भक्तियोगे परिनिष्ठितस्याभ्यासयोगादिसाधनकथनम् ९—११

श्लोक

सर्वकर्मफलत्यागस्य स्तुतिः ... १२
अक्षरोपासकधर्मनिर्वचनम् . १३—१९
यथोक्तधर्मपराणा स्वप्रीतिविषयत्वकथनम् २०

———*———

३. तत्त्वंपदार्थैक्यरूपवाक्यार्थनिष्ठा सम्यग्धीप्रधाना अन्तिमा षडध्यायी ।

त्रयोदशोऽध्यायः ।

क्षेत्रक्षेत्रज्ञयोः सक्षेपतः स्वरूपनिरूपणम् १
सर्वक्षेत्रस्थस्य क्षेत्रज्ञस्येश्वरत्वकथनपूर्वक क्षेत्रक्षेत्रज्ञ-
योर्ज्ञानस्य स्वाभिमतसम्यग्ज्ञानत्वकथनम् . . २
क्षेत्रक्षेत्रज्ञयोर्विशेषतो याथात्म्यकथनप्रतिज्ञा . ३
क्षेत्रक्षेत्रज्ञयोर्याथात्म्यस्तुतिः . ४
विशेषतः क्षेत्रयाथात्म्यकथनम् ५— ६
अमानित्वादिज्ञानसाधनकथनम् . ७—११
क्षेत्रज्ञयाथात्म्यकथनम् . १२—१७
क्षेत्रक्षेत्रज्ञयाथात्म्यज्ञानफलकथनम् ... १८
प्रकृतिपुरुषयोरनादित्वोक्तिः .. १९
प्रकृतेः कार्यकरणकर्तृत्वे, पुरुषस्य सुखदुःखभोक्तृत्वे
च हेतुत्वकथनम् २०

श्लोकः

पुरुषस्य भोक्तृत्वनिमित्तकथनम् ... २१
पुरुषस्योपद्रष्टृत्वादिप्रदर्शनम् .. २२
प्रकृतिपुरुषविवेकफलप्रतिपादनम् . २३
आत्मदर्शने ध्यानाद्युपायविकल्पकथनम् . २४—२६
सम्यग्दर्शनतत्फलयोरुपवर्णनम् .. २७—३४

चतुर्दशोऽध्यायः

उत्तमज्ञानोपदेशस्य प्रतिज्ञानम् . १— २
क्षेत्रक्षेत्रज्ञसयोगेन हिरण्यगर्भोपजनद्वारा सर्वभूतोत्पत्तिवर्णनम् .. ३— ४
सत्त्वादिगुणाना जीवबन्धकत्वोक्तिः .. ५
सत्त्वादिगुणाना स्वरूपकार्यादिप्रतिपादनम् . ६—१८
सम्यग्ज्ञानस्य मोक्षजनकत्वकथनम् .. १९—२०
गुणातीतलक्षणप्रश्नः .. २१
गुणातीतलक्षणकथनम् . २२—२५
अव्यभिचारेण भक्तियोगेन गुणातीतत्वादिसिद्धिवर्णनम् . २६
आत्मनः सर्वप्रतिष्ठात्वकथनम् . २७

पञ्चदशोऽध्यायः ।

संसारस्य वृक्षरूपककल्पना १— २

श्लोकः

असङ्गशस्त्रेण ससारवृक्षच्छेदने ब्रह्मपदावाप्तिकथनम् ३— ५
ब्रह्मपदलक्षणोक्तिः . ६
जीवस्य भगवदंशत्वकथनपूर्वकमुत्क्रान्तिसमय इन्द्रि-
याकर्षकत्वादेः प्रतिपादनम् .. ७— ९
मूढानामात्मज्ञानस्यासभवोक्तिः . १०—११
सक्षेपेण विभूतिवर्णनम् . १२—१५
क्षराक्षरोत्तमपुरुषाणा निरूपणम् ... १६—१७
हेतुकथनपूर्वक भगवतः पुरुषोत्तमत्वस्य तज्ज्ञानफ-
लस्य च निरूपणम् ... १८—१९
भगवत्तत्त्वज्ञानप्रशंसा ... २०

षोडशोऽध्यायः ।

देवासुरसपदोः स्वरूपफलनिर्णयः .. १— ५
सविस्तरमासुरसपद्वर्णन तद्विमोकेन श्रेयःप्राप्तिकथन च ६—२२
शास्त्रविधिमुल्लङ्घ्य प्रवृत्तस्य सिद्ध्याद्यभावकथनम् २३
अर्जुनस्य शास्त्रीये कर्मणि भगवत्प्रवर्तनम् .. २४

सप्तदशोऽध्यायः ।

उत्सृष्टशास्त्रविधीनां श्रद्धया तु कर्म कुर्वता का वा
गतिरित्यर्जुनस्य प्रश्नः . १
त्रिविधश्रद्धाविवरणम् . २— ६
आहारत्रैविध्यनिरूपणम् .. ७—१०

श्लोक

यज्ञत्रयकथनम् . ११—१३
कायिकादिभेदैस्तपस्त्रैविध्यवर्णनम् . १४—१६
सात्त्विकादिभेदैस्तपस्त्रैविध्यवर्णनम् .. १७—१९
सात्त्विकादिभेदैर्दानत्रैविध्यप्रदर्शनम् . २०—२२
यज्ञादिसाद्गुण्यार्थमोतत्सदितिशब्दत्रयाविनियोगप्रदर्शनम् . २३—२७
अश्रद्धया कृतस्य होमादिसर्वकर्मणोऽसत्त्वप्रतिपादनम् २८

अष्टादशोऽध्यायः ।

सन्यासत्यागयोस्तत्त्वनिर्णयानुकूलः प्रश्नः १
सन्यासत्यागपदयोरर्थनिरुक्तिः .. २
कर्मणस्त्यागात्यागविषये साख्यमीमासकपक्षद्वयप्रदर्शनम् ३
नित्यनैमित्तिकानि कर्माणि तत्फलासङ्ग विहाय कार्याणीति स्वमतप्रदर्शनम् ... ४— ६
नित्यकर्मत्यागानुपपत्तिकथनपूर्वक तामसादिभेदैस्त्यागत्रैविध्यप्रतिपादनम् ... ७— ९
फलासङ्ग त्यक्त्वा नित्यकर्मानुतिष्ठतो ज्ञाननिष्ठाप्राप्तिप्रदर्शनम् ... १०
कर्मफलत्यागिनस्त्यागीत्यभिधानकथनम् ... ११
सन्यासिनामनिष्ठाद्यभावकथनम् ... १२
सर्वकर्मणामधिष्ठानादिकारणप्रपञ्चनम् ... १३—१५
शुद्धात्मनि कर्तृत्वाद्यभिमानिना दुर्मतित्वकथनम्... १६

श्लोकः

कर्तृत्वाद्यभिमानरहितस्य सुमतित्वकथनम् . १७

कर्मप्रवर्तकज्ञानकरणप्रदर्शनम् . १८

ज्ञानकर्मकर्तृणा गुणभेदतस्त्रैविध्यकथनप्रतिज्ञानम्... १९

ज्ञानकर्मकर्तृणा सात्त्विकत्वादिभेदैस्त्रैविध्यप्रदर्शनम् .. २०—२८

बुद्धिधृत्योर्गुणभेदेन त्रैविध्यकथनप्रतिज्ञानम् .. २९

सात्त्विकादिभेदेन बुद्ध्यादीना त्रैविध्यकथनम् .. ३०—३९

ससारान्तर्गतस्याशेषस्य त्रिगुणात्मकत्वकथनम् . ४०

ब्राह्मणादिकर्मणा प्रविभागप्रदर्शनम् . ४१—४४

ब्राह्मणादीना यथास्वकर्म भगवदाराधनेन ज्ञाननिष्ठा-
योग्यतारूपसिद्धिप्रतिपादनम् . ४५—४६

स्वधर्मस्यात्याज्यताप्रतिपादनम् . ४७—४८

कर्मस्वनासक्तस्य सन्यासेन ज्ञाननिष्ठारूपनैष्कर्म्यसि-
द्धिप्रतिपादनम् ... ४९

नैष्कर्म्यलक्षणसिद्धिप्राप्तिक्रमकथनप्रतिज्ञानम् ... ५०

विस्तरेण ज्ञाननिष्ठाप्राप्तिक्रमकथनम् ... ५१—५३

यथोक्तक्रमेण ज्ञानलक्षणभक्तिप्राप्तिनिरूपणम् ... ५४

यथोक्तज्ञानलक्षणभक्तितो भगवत्तत्त्वज्ञानसिद्धिकथनम् ५५

भगवद्भक्तियोगस्य स्तुतिः ... ५६

अर्जुन प्रति भगवत्कृतः स्वाभिन्नेश्वरे सदा चित्तस्था-
पनोपदेशः ... ५७

श्लोक

ईश्वरैकचित्तत्वे तत्प्रसादात्सर्वदुःखतरणस्यान्यथा विनाशस्य च कथनम् ... ५८

युद्धाकरणनिश्चयस्याहंकाराश्रयत्वान्मिथ्यात्वकथनपूर्वकमर्जुनस्य प्रकृतिपरतन्त्रत्वकथनम् . ५९—६०

अन्तर्यामित्वादीश्वरस्य सर्वभूतप्रेरकत्वप्रतिपादनम् .. ६१

सर्वभावेनेश्वरमाश्रयतः शाश्वतपदप्राप्तिकथनम् . ६२

उक्तगुह्यतरज्ञानविमर्शेन यथेच्छकरणानुज्ञानम् . ६३

अर्जुनस्यातिप्रियतया सर्वगुह्यतमवचनश्रवणे प्रवर्तनम् .. ६४

गुह्यतमस्येश्वरशरणत्वस्य कर्मयोगनिष्ठातत्त्वस्य सम्यग्दर्शनस्य च तत्फलस्योपदेशः .. ६५—६६

अपात्रे शास्त्रोपदेश निषिध्य पात्रे तदुपदेशस्य फलकथनम् .. ६७—६९

प्रकृतशास्त्राध्ययनश्रवणफलप्रदर्शनम् .. ७०—७१


मदुक्तशास्त्रश्रवणेनाज्ञानसमोहः कच्चित्प्रणष्ट इत्यर्जुन प्रति भगवत्प्रश्नः . ७२

'नष्टो मोहः स्मृतिर्लब्धा' इत्याद्यर्जुनस्योत्तरवचनम् ७३

'इत्यह वासुदेवस्य' इत्यादि धृतराष्ट्र प्रति संजयस्य भाषणम् . ७४—७८

॥ श्रीः ॥

शांकरभाष्यस्थानां विशेषविषयाणामनुक्रमणिका ॥



पृष्ठम्

प्रथमोऽध्यायः ।

श्रीमद्भगवद्गीताभाष्यस्योपक्रान्तस्य निष्प्रत्यूहोपप्लवपरिसमाप्त्यर्थमपेक्षितशिष्टाचारपरम्पराप्राप्तेष्टदेवतातत्त्वानुसंधानलक्षणमङ्गलाचरणसपत्तये निरवशेषत इतिहासपुराणयोर्व्याचिख्यासितेन गीताशास्त्रेणैकवाक्यतामभिसधाय भगवत्पादकृतमन्तर्यामिविषयकस्य पौराणिकश्लोकस्योदाहरणम् .. १

स्वोत्पादितस्य जगतः स्थेम्ने मरीच्यादीन्प्रजापतीन्ससोत्पाद्य वेदोक्तप्रवृत्तिलक्षणधर्मानुशासनपूर्वक तेषा तद्धर्मप्रवर्तनस्य, सनकसनन्दनादीनुत्पाद्य वेदोक्तनिवृत्तिलक्षणधर्मोपदेशपुरःसर तेषां च तद्धर्मप्रवर्तनस्य भगवत्कृतस्य प्रतिपादनम् ... १

द्विविधवेदोक्तधर्मप्रयोजनकथनम् .. २

अनुष्ठातृणा कालकलया कामोद्भवात्तदभिभूतविवेकविज्ञा-

पृष्ठम्

नप्रयुक्तेनाधर्मेण प्रवर्धमानेनाक्रान्ते धर्मे ब्राह्मण्यरक्षणेन रक्षितः स्याद्वर्णाश्रमधर्मो वैदिक इति विष्णुर्जगत्स्थिति-परिपिपालयिषया ब्राह्मण्यरक्षणार्थं देवक्या वसुदेवाद-शेनावततारेति कथनम् ... २

भूतानामनुजिघृक्षया गीताद्वारार्जुनाय वैदिकधर्मद्वयोपदेशो भगवत इत्युक्तिः . २

भगवदुपदिष्टस्य धर्मस्य सप्तभिः श्लोकशतैर्व्यासेन कृतमु-पनिबन्धनमित्युक्तिः ... २

समस्तश्रुत्यर्थसारसग्रहस्यास्यार्थतो दुर्विज्ञेयत्वाद्गीताशास्त्र-स्य तदर्थाविष्करणाय भाष्यकारकृता संक्षेपतो वि-वरणकरणप्रतिज्ञा ... ३

अस्य गीताशास्त्रस्य नि·श्रेयसप्रयोजनकत्वकथनम् ... ३

शास्त्रस्य विषयनिर्देशः . . ४

शास्त्रस्यास्यानुबन्धत्रयवैशिष्ट्याद्वद्याख्येयत्वोपपादनम् ... ४

द्वितीयोऽध्यायः ।

'दृष्ट्वा तु पाण्डवानीकम्' इत्यादेः 'उक्त्वा तूष्णी बभूव ह' इत्येतदन्तस्य ग्रन्थस्य शोकमोहादिससारकारणा-विद्याप्रदर्शनार्थत्ववर्णनम् .. . १७

सगृहीतार्थविवरणम् ... १७

शोकमोहयोः ससृतिनिदानतोपपादनम् ... १७

पृष्ठम्

अशोच्यानित्यादिसदर्भस्य समूलससारोच्छेदकसम्यग्ज्ञानोपदेशे तात्पर्यमिति प्रदर्शनम् ... १८

सर्वलोकानुजिघृक्षयैव ज्ञानमर्जुनाय भगवतोपदिष्टमिति कथनम् .. १८

श्रौतस्मार्तकर्मसहिताज्ज्ञानात्कैवल्यप्राप्तिरिति मतोपन्यासः १८

वैदिकं कर्म केवलाधर्महेतुर्हिंसादियुक्तत्वादिति शङ्काया निराकरणम् ... १८

भगवदुक्तविभागवचनविरुद्धत्वात्समुच्चयपक्षो नैव युक्त इति प्रतिपादनम् ... १८

साख्ययोगशब्दार्थनिरुक्तिः ... १९

भगवदुक्तविभागवचनस्य शतपथब्राह्मणमूलकत्वप्रदर्शनम् १९

समुच्चयपक्षे ज्यायसी चेदित्याद्यर्जुनप्रश्नानुपपत्तिकथनम्... २०

प्रकारान्तरेण समुच्चयपक्षसमर्थन सहतन्निरसनम् ... २१

केवलात्तत्त्वज्ञानादेव मुक्तिरिति सिद्धान्तोपसहृतिः .. २२

विकारजातस्यासत्यत्वप्रदर्शनम् ... २७

आत्मनोऽप्रमेयत्वसमर्थनम् ... ३१

विदुषः कर्मासभवहेतूपन्यासः ... ३५

विदुषो मुमुक्षोश्चात्मदर्शिनः सर्वकर्मसन्यासेऽधिकारप्रदर्शनम् ... ३६

शास्त्रादिसस्कृतस्य मनस आत्मदर्शने साधनत्वकथनम् .. ३७

ज्ञाने विदुषोऽधिकारप्रदर्शनम् ... ३८

पृष्ठम्

मनसेति वचनात्सर्वकर्मसन्यासाभावशङ्काया निराकरणम् ३८
पौनःपुन्येनात्मनित्यत्वादिवचनस्य पौनरुक्त्याभावकथनम् ४१

तृतीयोऽध्यायः ।

द्वितीयाध्यायगतस्यार्थस्य सक्षेपतोऽनुवादः . ७५
श्रौतस्मार्तकर्मसमुच्चिताद्बृहस्थस्य स्मार्तकर्ममात्रसमुच्चिता-
त्वितरेषामाश्रमिणा ज्ञानात्कैवल्यप्राप्तिरिति समुच्चय-
वादिमतस्य निरसनम् . ७७
ज्ञानोत्पत्तिः पापकर्मक्षयादित्यस्य प्रमाणत्वेन ज्ञानमुत्पद्यत
इति श्लोकोपन्यासः ... ८४
देवयज्ञादिनिर्वर्तनेन पञ्चसूनाकृतात्किल्बिषान्मोचनकथनम् ९०
यज्ञात्पर्जन्यस्योत्पत्तौ 'अग्नौ प्रास्ता' इति स्मृत्यन्तरोदा-
हृतिः ... ९०
जगच्चक्रानुवर्तनातिलङ्घिनोऽधिकृतस्य प्रत्यवायोक्तिः ... ९२
भूतजातस्य सर्वस्य प्रकृत्यधीनत्वे विधिनिषेधानर्थक्य-
शङ्काया निरसनम् ... १०२
भगवच्छब्दार्थवर्णनम् . . १०३

चतुर्थोऽध्यायः ।

वर्णाश्रमादिकर्माधिकारो मर्त्यलोक एवेति कथनम् ... ११८
कर्मण्यकर्मेति श्लोके वृत्तिकारव्याख्यानस्य दूषणम् ... १२५

पृष्ठम्

शारीरपदार्थनिर्णयः ... १३०

ब्रह्मार्पणमित्यत्रार्पणादौ ब्रह्मदृष्टिविधिरिति पक्षमनूद्य दोषापादनम् ... १३६

श्रद्धावत्त्वादीना समुच्चिताना ज्ञानेन सहैकान्तिकत्वप्रदर्शनपुरःसर प्रणिपातादिसाधनस्य बहिरङ्गत्वप्रतिपादनम् १४५

पञ्चमोऽध्यायः ।

कर्मसन्यासकर्मयोगयोः प्रशस्यतरविषयकस्यार्जुनप्रश्नस्य सगतिप्रतिपादनम् १५१

निःश्रेयसकरौ योगौ सन्यासकर्मयोगशब्दाभ्यामुपक्रम्य साख्ययोगयोरभिन्नफलकत्वकथन कथ नु सगतमिति शङ्काया निराकरणम् .. १५९

सर्वकर्माणीत्यत्र श्लोके नवद्वारे पुर इति विशेषणस्य प्रयोजनकथनम् . १६५

सात्त्विकादिषु त्रिविधेषु सत्त्वेषु समत्वदृष्टिरनुचितेति शङ्काया निरसनम् .. १६९

षष्ठोऽध्यायः ।

पञ्चमान्तोपक्षिप्तस्य ध्यानयोगस्य विवरणरूपः षष्ठोऽध्यायः इति प्रतिपादनम् ... १७९

ध्यानयोगारोहणमात्रे पर्यवस्यति कर्मयोगानुष्ठानमिति व्यवस्थापनम् ... १७९

पृष्ठम्

फलेच्छा परित्यज्य विहित कर्मानुतिष्ठतो गौणमेव सन्यासित्व योगित्व चेति कथनम् ... १८३
सर्वकर्मोपरमः पुरुषार्थसाधनमित्यत्र पौराणिकसमतिप्रदर्शनम् ... १८५
सर्वेषा कामाना सकल्पमूलत्वे स्मृत्युदाहरणम् ... १८६

सप्तमोऽध्यायः ।

सर्वभूताना प्रज्ञाप्रतिबन्धकेन द्वन्द्वमोहेनावृतत्वतः स्वात्मभूतभगवज्ज्ञानाभावप्रतिपादनम् ... २२८

अष्टमोऽध्यायः ।

ओकारद्वारा श्रुत्युक्तस्य ब्रह्मोपासनस्यानुक्रमणम् ... २३९

नवमोऽध्यायः ।

ईश्वरस्य साक्षित्वे प्रमाणश्रुतिनिरूपणम् ... २६०
किनिमित्तेयं सृष्टिरिति प्रश्नप्रतिवचनयोरनुपपत्तिकथनम् २६०
भक्तमात्रे भगवतो योगक्षेमनिर्वोढृत्वान्निष्कामभक्तज्ञानिविषये योगक्षेमनिर्वाहाभिधानस्यासगतिशङ्काया दूरनिरसनम् ... २६८
ईश्वरार्पणबुद्ध्या सर्वकर्माणि कुर्वतो जीवन्मुक्तस्य प्रारब्धकर्मनिवृत्तौ विदेहकैवल्यस्यावश्यभावित्वबोधनम् ... २७१
ईश्वरार्पणधिया कर्मकरणात्सन्यासयोगाच्च मुक्तिरिति पृथ-

पृष्ठम्

ग्भूतसाधनद्वयशङ्काया निरास ... २७२
भगवद्भक्तस्य दुराचारादुपरतिकथनम् ... २७४

दशमोऽध्यायः ।

ईश्वरस्य दिव्यविभूतीनामपरिच्छिन्नत्वकथनम् ... २९७

एकादशोऽध्यायः ।

भगवतो विश्वरूपस्यानुपमत्वप्रतिपादनम् ... ३०६

द्वादशोऽध्यायः ।

द्वितीयाध्यायाद्युक्तस्यार्थस्य सक्षेपेणानुवादः .. ३३९
फलत्यागपूर्वकस्य कर्मयोगस्याविलम्बतः श्रेयःसाधनतोक्ते-
स्तात्पर्यवर्णनम् .. ३४७
अक्षरोपासकस्येवान्येषामपीश्वरात्मकत्वे समाने तदधीनत्वं
कुत इति शङ्काया: परिहारः . ३४८
शरीरयात्रामात्रप्रयोजनेनान्नादिना ज्ञानिनः सतुष्टत्वे प्रमा-
णतया स्मृतिप्रदर्शनम् . ३५२

त्रयोदशोऽध्यायः ।

ईश्वरस्य क्षेत्रज्ञस्य चैकत्वे शङ्कानिराकरणपूर्वक बहुविधा-
ना युक्तीना निरूपणम् ... ३५९
सह कार्यप्रपञ्चेनाविद्या हातव्येत्यत्र नैकश्रुतिप्रमाणप्रदर्शनम् ३५९

पृष्ठम्

विनापि विद्या हेत्वन्तरान्मुक्तिः किं न स्यादिति शङ्का-
या निरसनम् ... ३६०
विद्या तावद्भयहेत्वविद्यानिरसनपुरःसर तज्जन्यं भयमपि
निरस्यतीत्यत्र श्रुतिप्रमाणप्रदर्शनम् ... ३६०
विद्याविद्याविषये स्मृतिप्रदर्शनम् ... ३६०
विद्याया अनर्थध्वसोऽविद्यायाश्चानर्थावातिः फलमित्यत्रा-
न्वयव्यतिरेकाख्यनयस्य बोधनम् ३६०
बन्धमुक्त्यवस्थयोरयाथार्थ्यप्रतिपादनम् ... ३६३
शास्त्रस्याविद्वद्विषयत्वाद्यथोक्तार्थवत्त्वस्याक्षेपसमाधिभ्या प्र-
पञ्चनार्थमाक्षेपः ... ३६६
सर्वशास्त्रमर्यादाविदोऽप्यसंप्रदायवित्वे मूर्खवदुपेक्ष्यत्वोक्तिः ३६८
अमानित्वादीना ज्ञानत्वोक्तेस्तात्पर्यविवरणम् ... ३७९
ब्रह्मणोऽवस्तुत्वनिरासार्थः पूर्वः पक्षः ... ३८१
मिथ्याभूतमपि ज्ञेयवस्तु ज्ञानोपयोगीत्यत्र 'अध्यारोपापवा-
दाभ्या निष्प्रपञ्च प्रपञ्च्यते' इति सांप्रदायिकवच-
नोपक्षेपः ... ३८३
'विद्धचनादी उभावपि' इत्यत्रानादिपदे तत्पुरुषपक्ष-
निराकरणम् . ३८९
प्रकृतिपुरुषयोः ससृतिहेतुत्ववर्णनम् ... ३९१
ज्ञानोदयानन्तर जन्मान्तरोच्छित्तिसमर्थनम् .. ३९५
ध्यानपदार्थनिर्वचनम् .. ३९७

पृष्ठम्

क्षेत्रक्षेत्रज्ञसयोगस्वरूपनिरूपणम् ... ३९९

न हिनस्तीत्यस्याप्रसक्तप्रतिषेधत्वशङ्कानिरसनम् .. ४०२

कर्तृत्वकर्मफललेपयोः पारमार्थिकत्वाभावप्रदर्शनम् ... ४०५

चतुर्दशोऽध्यायः ।

क्षेत्रक्षेत्रज्ञसयोगस्य प्रपञ्चोत्पादकत्वप्रकारप्रदर्शनार्थः प्रकृतश्चतुर्दशोऽध्याय इति कथनम् ... ४११

'न करोति न लिप्यते' इत्यस्य 'निबध्नन्ति महाबाहो' इत्यस्य च परस्परविरोधपरिहारप्रकारः .. ४१४

शक्तिशक्तिमतोरनन्यत्वप्रदर्शनम् ... ४२७

पञ्चदशोऽध्यायः ।

ससारवृक्षविषये प्रमाणभूतानां पुराणश्लोकाना प्रदर्शनम्. ४३२

जीवस्य भगवदशत्वोक्तितात्पर्यवर्णनम् ... ४३७

चैतन्यज्योतिषः सर्वत्र समानवृत्तावप्यादित्यादिष्वाविस्तरत्ववर्णनम् ... ४४१

'द्वाविमौ पुरुषौ' इत्यादिश्लोकाना तात्पर्यपर्यालोचनम् ४४४

सिद्धे तत्त्वज्ञाने कृतकृत्यतायाः प्रतिपादकस्य मनुवचनस्य प्रदर्शनम् ... ४४८

षोडशोऽध्यायः ।

नवमाध्यायसूचिताना दैवासुरराक्षसप्रकृतीना विस्तरेण प्र-

पृष्ठम्

दर्शनार्थः 'अभय सत्त्वसंशुद्धिः' इत्यादिरिति प्रकृताध्यायतात्पर्यप्रदर्शनम् ... ४५१

भूताना दैवासुरभेदतो द्वैविध्ये उद्गीथब्राह्मणस्य प्रमाणत्वेनोदाहरणम् ... ४५५

सप्तदशोऽध्यायः ।

ऐहिकमामुष्मिक वा फल सपद्यतेऽश्रद्धितेनापि कर्मणेति कुतोऽस्य कर्मणोऽसत्त्वमित्याशङ्काया निरसनम् ... ४८४

अष्टादशोऽध्यायः ।

नित्यनैमित्तिककर्मणा फलाभावात्कथ तत्त्यागसगतिरिति शङ्कायास्तेषामपि फलवत्त्वस्य भगवदिष्टत्वप्रदर्शनेन निराकरणम् ... ४८८

कर्मत्यागात्यागविकल्पाना ज्ञाननिष्ठसन्यासिपरत्वव्युदसनम् ४९०

'एतान्यपि तु कर्माणि' इत्यस्य व्याख्यानान्तरमनूद्य दोषप्रदर्शनपूर्वक तन्निरसनम् ... ४९३

कर्मफलत्यागस्य त्रैविध्य प्रस्तुत्य सङ्गफलत्यागस्य तृतीयत्वेनोक्तेः समर्थनम् ... ४९६

अधिष्ठानादीना पञ्चाना सर्वकर्मकारणत्वे 'शरीरवाङ्मनोभिर्यत्कर्म प्रारभते' इत्युक्तिविरोधस्य परिहारः ... ५०२

'हत्वापि न हन्ति' इत्यत्र विप्रतिषिद्धोक्तिशङ्कानिरसनम् ... ५०४

पृष्ठम्

आत्मनोऽविक्रियत्वस्य श्रुतिस्मृतिन्यायप्रसिद्धत्वप्रतिपादनम् .. ५०४

शास्त्रप्रविभक्ताना शमदमादिकर्मणां गुणप्रविभक्तत्वोक्तिविरोधपरिहारः .. ५२१

'सदोषमपि न त्यजेत्' इत्यत्र कर्मणामशेषतस्त्यक्तुमशक्यत्वस्य हेतुत्वसमर्थनम् ... ५२६

असत्कार्यवादस्य निरसनम् .. ५२८

साख्याभिमतस्य परिणामवादस्य निरासः ... ५३०

आत्मनो निराकारत्वसमर्थनम् ... ५३३

आत्मनो निराकारत्वे ज्ञाननिष्ठाया दुःसाधत्ववादनिरसनम् ... ५३५

ज्ञेयस्य वेदने ज्ञानावृत्तिलक्षणज्ञाननिष्ठाया नापेक्षा किं तर्हि ज्ञानमात्रस्यैवेत्याक्षेपपरिहारः .. ५४१

गीताशास्त्रनिश्चितस्य निःश्रेयससाधनस्य नानाशङ्कानिरासपूर्वकं निष्कृष्य कथनम् ... ५४९

पूर्वप्रतिपादितस्य ज्ञानकर्मणोः समुच्चयासभवस्य निगमनम् ५५१

अनारब्धफलपुण्यकर्मभावेऽपि मोक्षानुपपत्तिः कथमिति शङ्कायाः समाहितिः ... ५५२

नित्यानुष्ठानायासदुःखस्य नोपात्तदुरितफलत्वमिति प्रदर्शनम् ... ५५३

पृष्ठम्

अग्निहोत्रादीनामात्मज्ञानवन्मोक्षे साक्षान्नान्वय इति प्रतिपादनम् ... ५५५

मिथ्याभूतसंघातविषयकाहधीप्रयुक्त नात्मनि कर्तृत्व किंतु वास्तवमात्मीयैरेव ज्ञानेच्छाप्रयत्नैरस्य तदिति मतमनूद्य निरसनम् ... ५५८


ससारभ्रमस्य विपरीतप्रत्ययनिमित्तत्वेन तस्यात्यन्तोच्छेदः सम्यग्ज्ञानादेवेति राद्धान्तप्रदर्शनम् ५६३



श्रीमच्छंकरभगवत्पादविरचितम्

श्रीमद्भगवद्गीताभाष्यम्

प्रथमोऽध्यायः



॥ श्रीमच्छंकरभगवत्पूज्यपादाः ॥

श्रीवाणीविलासमुद्रायन्त्रालये मुद्रितमिदम् ।

॥ नमो भगवते वासुदेवाय ॥

॥ श्रीमद्भगवद्गीता ॥

Gourishunker Ganerivala.

श्रीमच्छंकरभगवत्पादविरचितेन

भाष्येण सहिता ।

नारायणः परोऽव्यक्तादण्डमव्यक्तसभवम् ।
अण्डस्यान्तस्त्विमे लोका सप्तद्वीपा च मेदिनी ॥



स भगवान् सृष्ट्वेदं जगत्, तस्य च स्थिति चिकीर्षु, मरीच्यादीनग्रे सृष्ट्वा प्रजापतीन्, प्रवृत्तिलक्षणं धर्मं ग्राहयामास वेदोक्तम् । ततोऽन्यांश्च सनकसनन्दनादीनुत्पाद्य, निवृत्तिलक्षणं धर्मं ज्ञानवैराग्यलक्षणं ग्राहयामास । द्वेविधो हि वेदोक्तो धर्मः, प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च,

जगतः स्थितिकारणम्। प्राणिनां साक्षादभ्युदयनिःश्रेयसहेतुर्यः स धर्मो ब्राह्मणाद्यैर्वर्णिभिराश्रमिभिश्च श्रेयोर्थिभिः अनुष्ठीयमानो दीर्घेण कालेन। अनुष्ठातॄणां कामोद्भवात् हीयमानविवेकविज्ञानहेतुकेन अधर्मेण अभिभूयमाने धर्मे, प्रवर्धमाने च अधर्मे, जगतः स्थितिं परिपिपालयिषुः स आदिकर्ता नारायणाख्यो विष्णुः भौमस्य ब्रह्मणो ब्राह्मणत्वस्य रक्षणार्थं देवक्यां वसुदेवादंशेन कृष्णः किल संबभूव। ब्राह्मणत्वस्य हि रक्षणे रक्षितः स्याद्वैदिको धर्मः, तदधीनत्वाद्वर्णाश्रमभेदानाम्॥

स च भगवान् ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सदा संपन्नः त्रिगुणात्मिकां स्वां मायां मूलप्रकृतिं वशीकृत्य, अजोऽव्ययो भूतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावोऽपि सन्, स्वमायया देहवानिव जात इव च लोकानुग्रहं कुर्वन् लक्ष्यते। स्वप्रयोजनाभावेऽपि भूतानुजिघृक्षया वैदिकं धर्मद्वयम् अर्जुनाय शोकमोहमहोदधौ निमग्नाय उपदिदेश, गुणाधिकैर्हि गृहीतोऽनुष्ठीयमानश्च धर्मः प्रचयं गमिष्यतीति। तं धर्मं भगवता यथोपदिष्टं वेदव्यासः सर्वज्ञो भगवान् गीताख्यैः सप्तभिः श्लोकशतैरुपनिबबन्ध॥

तदिदं गीताशास्त्रं समस्तवेदार्थसारसंग्रहभूतं दुर्विज्ञेया-

र्थम्, तदर्थाविष्करणायानेकैर्विवृतपदपदार्थवाक्यार्थन्यायमपि अत्यन्तविरुद्धानेकार्थत्वेन लौकिकैर्गृह्यमाणमुपलभ्य अहं विवेकतोऽर्थनिर्धारणार्थं संक्षेपतो विवरणं करिष्यामि ॥

तस्य अस्य गीताशास्त्रस्य सक्षेपतः प्रयोजनं पर निःश्रेयसं सहेतुकस्य संसारस्य अत्यन्तोपरमलक्षणम् । तच्च सर्वकर्मसंन्यासपूर्वकादात्मज्ञाननिष्ठारूपात् धर्मात् भवति । तथा इममेव गीतार्थं धर्ममुद्दिश्य भगवतैवोक्तम्— 'स हि धर्मः सुपर्याप्तो ब्रह्मणः पदवेदने' इति अनुगीतासु । तत्रैव चोक्तम्— 'नैव धर्मी न चाधर्मी न चैव हि शुभाशुभी । यः स्यादेकासने लीनस्तूष्णी किंचिदचिन्तयन् ॥' इति 'ज्ञानं सन्यासलक्षणम्' इति च । इहापि च अन्ते उक्तमर्जुनाय— 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज' इति । अभ्युदयार्थोऽपि यः प्रवृत्तिलक्षणो धर्मो वर्णानाश्रमांश्चोद्दिश्य विहितः, स देवादिस्थानप्राप्तिहेतुरपि सन्, ईश्वरार्पणबुद्धया अनुष्ठीयमानः सत्त्वशुद्धये भवति फलाभिसंधिवर्जितः । शुद्धसत्त्वस्य च ज्ञाननिष्ठायोग्यताप्राप्तिद्वारेण ज्ञानोत्पत्तिहेतुत्वेन च निःश्रेयसहेतुत्वमपि प्रतिपद्यते । तथा चेममर्थमभिसंधाय वक्ष्यति— 'ब्रह्मण्याधाय कर्माणि' 'योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये' इति ॥

इमं द्विप्रकारं धर्मं नि श्रेयसप्रयोजनम्, परमार्थतत्त्वं च वासुदेवाख्यं परं ब्रह्माभिधेयभूतं विशेषतः अभिव्यञ्जयत् विशिष्टप्रयोजनसंबन्धाभिधेयवद्गीताशास्त्रम्। यतः तदर्थविज्ञाने समस्तपुरुषार्थसिद्धिः, अतः तद्विवरणे यत्नः क्रियते मया ॥

धृतराष्ट्र उवाच—

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत संजय ॥ १ ॥

संजय उवाच—

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा।
आचार्यमुपसंगम्य राजा वचनमब्रवीत् ॥ २ ॥

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम्।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥ ४ ॥

धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् ।
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुंगवः ॥ ५ ॥

युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् ।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६ ॥

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ॥

भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः ।
अश्वत्थामा विकर्णश्च सौमदत्तिर्जयद्रथः ॥ ८ ॥

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥ ९ ॥

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥

अयनेषु च सर्वेषु यथाभागमवस्थिताः ।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥

तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥

ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥

पाञ्चजन्यं हृषीकेशो देवदत्तं धनंजयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥

अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥ १६ ॥

काश्यश्च परमेष्वासः शिखण्डी च महारथः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥१७॥

द्रुपदो द्रौपदेयाश्च
सर्वशः पृथिवीपते ।

सौभद्रश्च महाबाहुः
शङ्खान्दध्मुः पृथक्पृथक् ॥ १८ ॥

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥

अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वजः ।
प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पाण्डवः ॥ २० ॥

हृषीकेशं तदा वाक्यमिदमाह महीपते ।

अर्जुन उवाच—

सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥ २१ ॥

यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥ २२ ॥

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥ २३ ॥

संजय उवाच—

एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥

भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ।
उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥२५॥

तत्रापश्यत्स्थितान्पार्थः
पितॄनथ पितामहान् ।
आचार्यान्मातुलान्भ्रातॄ-
न्पुत्रान्पौत्रान्सखींस्तथा ॥ २६ ॥

श्वशुरान्सुहृदश्चैव
सेनयोरुभयोरपि ।
तान्समीक्ष्य स कौन्तेयः
सर्वान्बन्धूनवस्थितान् ॥ २७ ॥

कृपया परयाविष्टो विषीदन्निदमब्रवीत् ।

अर्जुन उवाच—

दृष्ट्वेमान्स्वजनान्कृष्ण युयुत्सून्समुपस्थितान् ॥

सीदन्ति मम गात्राणि मुखं च परिशुष्यति ।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥ २९ ॥

गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥

निमित्तानि च पश्यामि विपरीतानि केशव ।
न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥

न काङ्क्षे विजयं कृष्ण
न च राज्यं सुखानि च ।
किं नो राज्येन गोविन्द
किं भोगैर्जीवितेन वा ॥ ३२ ॥

येषामर्थे काङ्क्षितं नो
राज्यं भोगाः सुखानि च ।
त इमेऽवस्थिता युद्धे
प्राणांस्त्यक्त्वा धनानि च ॥ ३३ ॥

आचार्याः पितरः पुत्रा-
स्तथैव च पितामहाः ।
मातुलाः श्वशुराः पौत्राः
श्यालाः संबन्धिनस्तथा ॥ ३४ ॥

एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ।
पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥ ३६ ॥

तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान्सबान्धवान् ।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः ।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥ ३८ ॥

कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥ ३९ ॥

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ।
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ॥ ४० ॥

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥ ४१ ॥

संकरो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥

दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।
नरके नियतं वासो भवतीत्यनुशुश्रुम ॥ ४४ ॥

अहो बत महत्पापं कर्तुं व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥ ४५ ॥

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥ ४६ ॥

संजय उवाच—

एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥४७॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां
भीष्मपर्वणि श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादयोगो नाम
प्रथमोऽध्यायः ॥





श्रीमच्छंकरभगवत्पादविरचितम्

श्रीमद्भगवद्गीताभाष्यम्

द्वितीयोऽध्यायः

द्वितीयोऽध्यायः ॥

संजय उवाच—

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥ १ ॥

श्रीभगवानुवाच—

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ २ ॥

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥ ३ ॥

अर्जुन उवाच—

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥ ४ ॥

गुरूनहत्वा हि महानुभावान्
श्रेयो भोक्तुं भैक्षमपीह लोके।
हत्वार्थकामांस्तु गुरूनिहैव
भुञ्जीय भोगान्रुधिरप्रदिग्धान् ॥ ५ ॥

न चैतद्विद्मः कतरन्नो गरीयो
यद्वा जयेम यदि वा नो जयेयुः।
यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥ ६ ॥

कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसंमूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥ ७ ॥

न हि प्रपश्यामि ममापनुद्या-
द्यच्छोकमुच्छोषणमिन्द्रियाणाम्।
अवाप्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाधिपत्यम् ॥ ८ ॥

संजय उवाच—

एवमुक्त्वा हृषीकेशं गुडाकेशः परंतपः ।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥

तमुवाच हृषीकेशः प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥ १० ॥

अत्र 'दृष्ट्वा तु पाण्डवानीकम्' इत्यारभ्य यावत् 'न योत्स्य इति गोविन्दमुक्त्वा तूष्णी बभूव ह' इत्येतदन्तः प्राणिनां शोकमोहादिसंसारबीजभूतदोषोद्भवकारणप्रदर्शनार्थत्वेन व्याख्येयो ग्रन्थः । तथाहि— अर्जुनेन राज्यगुरुपुत्रमित्रसुहृत्स्वजनसंबन्धिबान्धवेषु 'अहमेतेषाम्' 'ममैते' इत्येवंप्रत्ययनिमित्तस्नेहविच्छेदादिनिमित्तौ आत्मन. शोकमोहौ प्रदर्शितौ 'कथं भीष्ममहं संख्ये' इत्यादिना । शोकमोहाभ्यां ह्यभिभूतविवेकविज्ञानः स्वत एव क्षत्रधर्मे युद्धे प्रवृत्तोऽपि तस्माद्युद्धादुपरराम, परधर्मं च भिक्षाजीवनादिकं कर्तुं प्रववृते । तथा च सर्वप्राणिनां शोकमोहादिदोषाविष्टचेतसां स्वभावत एव स्वधर्मपरित्याग. प्रतिषिद्धसेवा च स्यात् । स्वधर्मे प्रवृत्तानामपि तेषां वाङ्मन.कायादीनां प्रवृत्तिः फलाभिसधिपूर्विकैव साहंकारा च भवति । तत्रैवं सति धर्माधर्मोपचयात् इष्टानिष्टज-

न्मसुखदुःखादिप्राप्तिलक्षणः संसारः अनुपरतो भवति । इत्यतः ससारबीजभूतौ शोकमोहौ । तयोश्च सर्वकर्मसंन्यासपूर्वकादात्मज्ञानात् नान्यतो निवृत्तिरिति तदुपदिदिक्षुः सर्वलोकानुग्रहार्थम् अर्जुनं निमित्तीकृत्य आह भगवान्वासुदेवः—'अशोच्यान्' इत्यादि ॥

अत्र केचिदाहुः—सर्वकर्मसंन्यासपूर्वकादात्मज्ञाननिष्ठामात्रादेव केवलात् कैवल्यं न प्राप्यत एव । किं तर्हि ? अग्निहोत्रादिश्रौतस्मार्तकर्मसहितात् ज्ञानात् कैवल्यप्राप्तिरिति सर्वासु गीतासु निश्चितोऽर्थ इति । ज्ञापकं च आहुरस्यार्थस्य—'अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि' 'कर्मण्येवाधिकारस्ते' 'कुरु कर्मैव तस्मात्त्वम्' इत्यादि । हिंसादियुक्तत्वात् वैदिकं कर्म अधर्माय इतीयमप्याशङ्का न कार्या । कथम् ? क्षात्रं कर्म युद्धलक्षणं गुरुभ्रातृपुत्रादिहिंसालक्षणमत्यन्त क्रूरमपि स्वधर्म इति कृत्वा न अधर्माय; तदकरणे च 'ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि' इति ब्रुवता यावज्जीवादिश्रुतिचोदितानां पश्वादिहिंसालक्षणानां च कर्मणां प्रागेव नाधर्मत्वमिति सुनिश्चितमुक्तं भवति— इति ॥

तदसत्; ज्ञानकर्मनिष्ठयोर्विभागवचनाद्बुद्धिद्वयाश्रययोः । 'अशोच्यान्' इत्यादिना भगवता यावत् 'स्वधर्ममपि चावेक्ष्य'

इत्येतदन्तेन ग्रन्थेन यत्परमार्थात्मतत्त्वनिरूपण कृतम्, तत्सांख्यम्। तद्विषया बुद्धिः आत्मनो जन्मादिषड्विक्रियाभावादकर्ता आत्मेति प्रकरणार्थनिरूपणात् या जायते, सा सांख्यबुद्धिः। सा येषां ज्ञानिनामुचिता भवति, ते सांख्या.। एतस्या बुद्धेः जन्मन प्राक् आत्मनो देहादिव्यतिरिक्तत्वकर्तृत्वभोक्तृत्वाद्यपेक्षो धर्माधर्मविवेकपूर्वको मोक्षसाधनानुष्ठानलक्षणो योगः। तद्विषया बुद्धिः योगबुद्धिः। सा येषां कर्मिणामुचिता भवति ते योगिनः। तथा च भगवता विभक्ते द्वे बुद्धी निर्दिष्टे 'एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु' इति। तयोश्च सांख्यबुद्धयाश्रयां ज्ञानयोगेन निष्ठां सांख्यानां विभक्तां वक्ष्यति 'पुरा वेदात्मना मया प्रोक्ता' इति। तथा च योगबुद्धयाश्रयां कर्मयोगेन निष्ठां विभक्तां वक्ष्यति—'कर्मयोगेन योगिनाम्' इति। एव सांख्यबुद्धि योगबुद्धि च आश्रित्य द्वे निष्ठे विभक्ते भगवतैव उक्ते ज्ञानकर्मणोः कर्तृत्वाकर्तृत्वैकत्वानेकत्वबुद्धयाश्रययोः युगपदेकपुरुषाश्रयत्वासभवं पश्यता। यथा एतद्विभागवचनम्, तथैव दर्शितं शातपथीये ब्राह्मणे—'एतमेव प्रव्राजिनो लोकमिच्छन्तो ब्राह्मणाः प्रव्रजन्ति' इति सर्वकर्मसंन्यास विधाय तच्छेषेण 'कि प्रजया करिष्यामो येषां नोऽयमात्माय लोक.' इति। तत्र च

प्राक् दारपरिग्रहात् पुरुष. आत्मा प्राकृतो धर्मजिज्ञासोत्तरकालं लोकत्रयसाधनम्— पुत्रम्, द्विप्रकारं च वित्तं मानुष दैवं च, तत्र मानुष कर्मरूपं पितृलोकप्राप्तिसाधनं विद्यां च दैवं वित्तं देवलोकप्राप्तिसाधनम्— 'सोऽकामयत' इति अविद्याकामवत एव सर्वाणि कर्माणि श्रौतादीनि दर्शितानि। तेभ्य. 'व्युत्थाय, प्रव्रजन्ति' इति व्युत्थानमात्मानमेव लोकमिच्छतोऽकामस्य विहितम्। तदेतद्विभागवचनमनुपपन्न स्याद्यदि श्रौतकर्मज्ञानयोः समुच्चयोऽभिप्रेतः स्याद्भगवतः॥

न च अर्जुनस्य प्रश्न उपपन्नो भवति 'ज्यायसी चेत्कर्मणस्ते' इत्यादिः। एकपुरुषानुष्ठेयत्वासंभव बुद्धिकर्मणो. भगवता पूर्वमनुक्त कथमर्जुन. अश्रुतं बुद्धेश्च कर्मणो ज्यायस्त्व भगवत्यध्यारोपयेन्मृषैव 'ज्यायसी चेत्कर्मणस्ते मता बुद्धि.' इति॥

किच— यदि बुद्धिकर्मणो. सर्वेषां समुच्चय उक्त. स्यात् अर्जुनस्यापि स उक्त एवेति, 'यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम्' इति कथमुभयोरुपदेशे सति अन्यतरविषय एव प्रश्नः स्यात्? न हि पित्तप्रशमनार्थिनः वैद्येन मधुरं शीतलं च भोक्तव्यम् इत्युपदिष्टे तयोरन्यतरत्पित्तप्रशमनकारण ब्रूहि इति प्रश्नः संभवति॥

अथ अर्जुनस्य भगवदुक्तवचनार्थविवेकानवधारणनिमित्त प्रश्नः कल्प्येत, तथापि भगवता प्रश्नानुरूपं प्रतिवचनं देयम्— मया बुद्धिकर्मणोः समुच्चय उक्तः, किमर्थमित्थ त्व भ्रान्तोऽसि— इति । न तु पुन प्रतिवचनमननुरूपं पृष्टा-दन्यदेव 'द्वे निष्ठे मया पुरा प्रोक्ते' इति वक्तु युक्तम् ॥

नापि स्मार्तेनैव कर्मणा बुद्धे. समुच्चये अभिप्रेते विभाग-वचनादि सर्वमुपपन्नम् । किंच— क्षत्रियस्य युद्धं स्मार्तं कर्म स्वधर्म इति जानतः 'तत्कि कर्मणि घोरे मां नियो-जयसि' इति उपालम्भोऽनुपपन्नः ॥

तस्माद्गीताशास्त्रे ईषन्मात्रेणापि श्रौतेन स्मार्तेन वा कर्मणा आत्मज्ञानस्य समुच्चयो न केनचिद्दर्शयितु शक्यः । यस्य तु अज्ञानात् रागादिदोषतो वा कर्मणि प्रवृत्तस्य यज्ञेन दानेन तपसा वा विशुद्धसत्त्वस्य ज्ञानमुत्पन्न परमार्थतत्त्व-विषयम् 'एकमेवेदं सर्वं ब्रह्म अकर्तृ च' इति, तस्य कर्मणि कर्मप्रयोजने च निवृत्तेऽपि लोकसंग्रहार्थं यत्नपूर्वं यथा प्रवृत्ति , तथैव प्रवृत्तस्य यत्प्रवृत्तिरूपं दृश्यते न तत्कर्म येन बुद्धेः समुच्चयः स्यात्; यथा भगवतो वासुदेवस्य क्षत्रधर्म-चेष्टितं न ज्ञानेन समुच्चीयते पुरुषार्थसिद्धये, तद्वत् तत्फलाभि-सध्यहंकाराभावस्य तुल्यत्वाद्विदुषः । तत्त्वविन्नाहं करोमीति

मन्यते, न च तत्फलमभिसंधत्ते। यथा च स्वर्गादिकामार्थिनः अग्निहोत्रादिकर्मलक्षणधर्मानुष्ठानाय आहिताग्नेः काम्ये एव अग्निहोत्रादौ प्रवृत्तस्य सामि कृते विनष्टेऽपि कामे तदेव अग्निहोत्राद्यनुतिष्ठतोऽपि न तत्काम्यमग्निहोत्रादि भवति। तथा च दर्शयति भगवान्— 'कुर्वन्नपि न लिप्यते' 'न करोति न लिप्यते' इति तत्र तत्र ॥

यच्च 'पूर्वैः पूर्वतरं कृतम्' 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इति, तत्तु प्रविभज्य विज्ञेयम्। तत्कथम्? यदि तावत् पूर्वे जनकादय तत्त्वविदोऽपि प्रवृत्तकर्माण. स्यु., ते लोकसंग्रहार्थम् 'गुणा गुणेषु वर्तन्ते' इति ज्ञानेनैव संसिद्धिमास्थिताः, कर्मसंन्यासे प्राप्तेऽपि कर्मणा सहैव संसिद्धिमास्थिताः, न कर्मसंन्यासं कृतवन्त इत्यर्थः। अथ न ते तत्त्वविद., ईश्वरसमर्पितेन कर्मणा साधनभूतेन ससिद्धि सत्त्वशुद्धिम्, ज्ञानोत्पत्तिलक्षणां वा संसिद्धिम्, आस्थिता जनकादय इति व्याख्येयम्। एतमेवार्थं वक्ष्यति भगवान् 'सत्त्वशुद्धये कर्म कुर्वन्ति' इति। 'स्वकर्मणा तमभ्यर्च्य सिद्धि विन्दति मानवः' इत्युक्त्वा सिद्धिं प्राप्तस्य पुनर्ज्ञाननिष्ठां वक्ष्यति—'सिद्धि प्राप्तो यथा ब्रह्म' इत्यादिना ॥

तस्माद्गीताशास्त्रे केवलादेव तत्त्वज्ञानान्मोक्षप्राप्तिः न

कर्मसमुच्चितात् , इति निश्चितोऽर्थः । यथा चायमर्थः, तथा प्रकरणशो विभज्य तत्र तत्र दर्शयिष्यामः ॥

तत्रैवं धर्मसंमूढचेतसो मिथ्याज्ञानवतो महति शोकसागरे निमग्नस्य अर्जुनस्य अन्यत्रात्मज्ञानादुद्धरणमपश्यन् भगवान्वासुदेवः तत कृपया अर्जुनमुद्दिधारयिषुः आत्मज्ञानायावतारयन्नाह—

श्रीभगवानुवाच—

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥

अशोच्यान् इत्यादि । न शोच्या अशोच्या. भीष्मद्रोणादयः, सद्वृत्तत्वात् परमार्थस्वरूपेण च नित्यत्वात्, तान् अशोच्यान् अन्वशोचः अनुशोचितवानसि 'ते म्रियन्ते मन्निमित्तम्, अह तैर्विनाभूत किं करिष्यामि राज्यसुखादिना' इति । त्वं प्रज्ञावादान् प्रज्ञावतां बुद्धिमतां वादांश्च वचनानि च भाषसे । तदेतत् मौढ्यं पाण्डित्यं च विरुद्धम् आत्मनि दर्शयसि उन्मत्त इव इत्यभिप्रायः । यस्मात् गतासून् गतप्राणान् मृतान्, अगतासून् अगतप्राणान् जीवतश्च न अनुशोचन्ति पण्डिताः आत्मज्ञा । पण्डा आत्मवि-

षया बुद्धि येषां ते हि पण्डिताः, 'पाण्डित्यं निर्विद्य' इति श्रुतेः। परमार्थतस्तु तान् नित्यान् अशोच्यान् अनुशोचसि, अतो मूढोऽसि इत्यभिप्रायः॥

कुतस्ते अशोच्या., यतो नित्याः। कथम्?—

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्वे वयमतः परम्॥

न तु एव जातु कदाचित् अहं नासम्, किं तु आसमेव। अतीतेषु देहोत्पत्तिविनाशेषु घटादिषु वियदिव नित्य एव अहमासमित्यभिप्रायः। तथा न त्वं न आसी., कि तु आसीरेव। तथा न इमे जनाधिपाः न आसन्, कि तु आसन्नेव। तथा न च एव न भविष्याम., किं तु भविष्याम एव, सर्वे वयम् अत. अस्मात् देहविनाशात् परम् उत्तरकाले अपि। त्रिष्वपि कालेषु नित्या आत्मस्वरूपेण इत्यर्थः। देहभेदानुवृत्त्या बहुवचनम्, नात्मभेदाभिप्रायेण॥

तत्र कथमिव नित्य आत्मेति दृष्टान्तमाह—

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति॥ १३॥

देह· अस्य अस्तीति देही, तस्य देहिनो देहवतः आत्मन. अस्मिन् वर्तमाने देहे यथा येन प्रकारेण कौमारं कुमारभावो बाल्यावस्था, यौवनं यूनो भावो मध्यमावस्था, जरा वयोहानि. जीर्णावस्था, इत्येता. तिस्रः अवस्थाः अन्योन्यविलक्षणा· । तासां प्रथमावस्थानाशे न नाशः, द्वितीयावस्थोपजने न उपजन आत्मनः । किं तर्हि ? अविक्रियस्यैव द्वितीयतृतीयावस्थाप्राप्तिः आत्मनो दृष्टा । तथा तद्वदेव देहान् अन्यो देहो देहान्तरम्, तस्य प्राप्तिः देहान्तरप्राप्तिः अविक्रियस्यैव आत्मन· इत्यर्थः । धीरो धीमान्, तत्र एवं सति न मुह्यति न मोहमापद्यते ॥

यद्यपि आत्मविनाशनिमित्तो मोहो न सभवति नित्य आत्मा इति विजानत., तथापि शीतोष्णसुखदुःखप्राप्तिनिमित्तो मोहो लौकिको दृश्यते, सुखवियोगनिमित्तो मोहः दुःखसंयोगनिमित्तश्च शोक. । इत्येतदर्जुनस्य वचनमाशङ्क्य भगवानाह——

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥

मात्रा. आभि· मीयन्ते शब्दादय इति श्रोत्रादीनि इन्द्रि-

याणि । मात्राणां स्पर्शाः शब्दादिभिः संयोगाः । ते शीतोष्णसुखदुःखदाः शीतम् उष्णं सुखं दुःखं च प्रयच्छन्तीति । अथवा स्पृश्यन्त इति स्पर्शाः विषयाः शब्दादयः । मात्राश्च स्पर्शाश्च शीतोष्णसुखदुःखदाः । शीतं कदाचित् सुखं कदाचित् दुःखम् । तथा उष्णमपि अनियतस्वरूपम् । सुखदुःखे पुनः नियतरूपे यतो न व्यभिचरतः । अतः ताभ्यां पृथक् शीतोष्णयोः ग्रहणम् । यस्मात् ते मात्रास्पर्शादयः आगमापायिनः आगमापायशीलाः तस्मात् अनित्याः । अतः तान् शीतोष्णादीन् तितिक्षस्व प्रसहस्व । तेषु हर्षं विषादं वा मा कार्षीः इत्यर्थः ॥

शीतोष्णादीन् सहतः किं स्यादिति शृणु—

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥

यं हि पुरुषं समे दुःखसुखे यस्य तं समदुःखसुख सुखदुःखप्राप्तौ हर्षविषादरहितं धीरं धीमन्तं न व्यथयन्ति न चालयन्ति नित्यात्मदर्शनात् एते यथोक्ताः शीतोष्णादयः, सः नित्यात्मस्वरूपदर्शननिष्ठो द्वन्द्वसहिष्णुः अमृतत्वाय अमृतभावाय मोक्षायेत्यर्थः, कल्पते समर्थो भवति ॥

इतश्च शोकमोहौ अकृत्वा शीतोष्णादिसहनं युक्तम्, यस्मात्—

नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥

न असत. अविद्यमानस्य शीतोष्णादेः सकारणस्य न विद्यते नास्ति भावो भवनम् अस्तिता ॥

न हि शीतोष्णादि सकारणं प्रमाणैर्निरूप्यमाणं वस्तुसद्भवति । विकारो हि सः, विकारश्च व्यभिचरति । यथा घटादिसंस्थानं चक्षुषा निरूप्यमाणं मृद्व्यतिरेकेणानुपलब्धेरसत्, तथा सर्वो विकारः कारणव्यतिरेकेणानुपलब्धेरसन् । जन्मप्रध्वंसाभ्यां प्रागूर्ध्वं च अनुपलब्धेः कार्यस्य घटादेः मृदादिकारणस्य च तत्कारणव्यतिरेकेणानुपलब्धेरसत्त्वम् ॥

तदसत्त्वे सर्वाभावप्रसङ्ग इति चेत्, न, सर्वत्र बुद्धिद्वयोपलब्धे., सद्बुद्धिरसद्बुद्धिरिति । यद्विषया बुद्धिर्न व्यभिचरति. तत् सत्, यद्विषया व्यभिचरति, तदसत्; इति सदसद्विभागे बुद्धितन्त्रे स्थिते, सर्वत्र द्वे बुद्धी सर्वैरुपलभ्येते समानाधिकरणे न नीलोत्पलवत्, सन् घटः, सन् पट., सन् हस्ती इति । एवं सर्वत्र । तयोर्बुद्धयोः घटादिबुद्धिः व्यभि-

चरति । तथा च दर्शितम् । न तु सद्बुद्धिः । तस्मात् घटादिबुद्धिविषयः असन्, व्यभिचारात्; न तु सद्बुद्धिविषयः, अव्यभिचारात् ॥

घटे विनष्टे घटबुद्धौ व्यभिचरन्त्यां सद्बुद्धिरपि व्यभिचरतीति चेत्, न, पटादावपि सद्बुद्धिदर्शनात् । विशेषणविषयैव सा सद्बुद्धि ॥

सद्बुद्धिवत् घटबुद्धिरपि घटान्तरे दृश्यत इति चेत्, न, पटादौ अदर्शनात् ॥

सद्बुद्धिरपि नष्टे घटे न दृश्यत इति चेत्, न, विशेष्याभावात् । सद्बुद्धि विशेषणविषया सती विशेष्याभावे विशेषणानुपपत्तौ किंविषया स्यात्? न तु पुनः सद्बुद्धेः विषयाभावात् ॥

एकाधिकरणत्वं घटादिविशेष्याभावे न युक्तमिति चेत्, न, 'इदमुदकम्' इति मरीच्यादौ अन्यतराभावेऽपि सामानाधिकरण्यदर्शनात् ॥

तस्मादेहादेः द्वन्द्वस्य च सकारणस्य असतो न विद्यते भाव इति । तथा सतश्च आत्मनः अभावः अविद्यमानता न विद्यते, सर्वत्र अव्यभिचारात् इति अवोचाम ॥

एवम् आत्मानात्मनो. सदसतो: उभयोरपि दृष्ट: उपलब्ध. अन्तो निर्णय: सत् सदेव असत् असदेवेति, तु अनयो: यथोक्तयो: तत्त्वदर्शिभि: । तदिति सर्वनाम, सर्वं च ब्रह्म, तस्य नाम तदिति, तद्भाव: तत्त्वम्, ब्रह्मणो याथात्म्यम् । तत् द्रष्टु शील येषां ते तत्त्वदर्शिन , तै. तत्त्वदर्शिभि: । त्वमपि तत्त्वदर्शिनां दृष्टिमाश्रित्य शोक मोहं च हित्वा शीतोष्णादीनि नियतानियतरूपाणि द्वन्द्वानि 'विकारोऽयमसन्नेव मरीचिजलवन्मिथ्यावभासते' इति मनसि निश्चित्य तितिक्षस्व इत्यभिप्राय. ॥

कि पुनस्तत्, यत् सदेव सर्वदा इति, उच्यते—

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥१७॥

अविनाशि न विनष्टुं शीलं यस्येति । तुशब्द: असतो विशेषणार्थ. । तत् विद्धि विजानीहि । किम्? येन सर्वम् इदं जगत् ततं व्याप्तं सदाख्येन ब्रह्मणा साकाशम्, आकाशेनेव घटादय: । विनाशम् अदर्शनम् अभावम् । अव्ययस्य न व्येति उपचयापचयौ न याति इति अव्ययं तस्य अव्ययस्य । नैतत् सदाख्यं ब्रह्म स्वेन रूपेण व्येति व्यभिचरति, निरवयवत्वात्, देहादिवत् । नाप्यात्मीयेन, आत्मीयाभावात् ।

यथा देवदत्तो धनहान्या व्येति, न तु एवं ब्रह्म व्येति । अतः अव्ययस्य अस्य ब्रह्मणः विनाशं न कश्चित् कर्तुमर्हति, न कश्चित् आत्मानं विनाशयितुं शक्नोति ईश्वरोऽपि । आत्मा हि ब्रह्म, स्वात्मनि च क्रियाविरोधात् ॥

किं पुनस्तदसत्, यत्स्वात्मसत्तां व्यभिचरतीति, उच्यते—

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥

अन्तः विनाशः विद्यते येषां ते अन्तवन्तः । यथा मृगतृष्णिकादौ सद्बुद्धिः अनुवृत्ता प्रमाणनिरूपणान्ते विच्छिद्यते, स तस्य अन्तः, तथा इमे देहाः स्वप्नमायादेहादिवच्च अन्तवन्तः नित्यस्य शरीरिणः शरीरवतः अनाशिनः अप्रमेयस्य आत्मनः अन्तवन्त इति उक्ताः विवेकिभिरित्यर्थः । 'नित्यस्य' 'अनाशिनः' इति न पुनरुक्तम्, नित्यत्वस्य द्विविधत्वात् लोके, नाशस्य च । यथा देहो भस्मीभूतः अदर्शनं गतो नष्ट उच्यते । विद्यमानोऽपि यथा अन्यथा परिणतो व्याध्यादियुक्तो जातो नष्ट उच्यते । तत्र 'नित्यस्य' 'अनाशिनः' इति द्विविधेनापि नाशेन असंबन्धः अस्येत्यर्थः । अन्यथा पृथिव्यादिवदपि नित्यत्वं स्यात् आत्मनः; तत् मा भूदिति

'नित्यस्य' 'अनाशिनः' इत्याह । अप्रमेयस्य न प्रमेयस्य प्रत्यक्षादिप्रमाणैः अपरिच्छेद्यस्येत्यर्थः ॥

ननु आगमेन आत्मा परिच्छिद्यते, प्रत्यक्षादिना च पूर्वम् । न; आत्मनः स्वतःसिद्धत्वात् । सिद्धे हि आत्मनि प्रमातरि प्रमित्सोः प्रमाणान्वेषणा भवति । न हि पूर्वम् 'इत्थमहम्' इति आत्मानमप्रमाय पश्चात् प्रमेयपरिच्छेदाय प्रवर्तते । न हि आत्मा नाम कस्यचित् अप्रसिद्धो भवति । शास्त्रं तु अन्त्यं प्रमाणम् अतद्धर्माध्यारोपणमात्रनिवर्तकत्वेन प्रमाणत्वम् आत्मनः प्रतिपद्यते, न तु अज्ञातार्थज्ञापकत्वेन । तथा च श्रुतिः— 'यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः' इति ॥

यस्मादेवं नित्यः अविक्रियश्च आत्मा तस्मात् युध्यस्व, युद्धात् उपरमं मा कार्षीः इत्यर्थः ॥

न हि अत्र युद्धकर्तव्यता विधीयते, युद्धे प्रवृत्त एव हि असौ शोकमोहप्रतिबद्धः तूष्णीमास्ते । अतः तस्य प्रतिबन्धापनयनमात्रं भगवता क्रियते । तस्मात् 'युध्यस्व' इति अनुवादमात्रम्, न विधिः ॥

शोकमोहादिसंसारकारणनिवृत्त्यर्थं गीताशास्त्रम्, न प्रवर्तकम् इत्येतस्यार्थस्य साक्षिभूते ऋचौ आनिनाय भगवान् ।

यत्तु मन्यसे 'युद्धे भीष्मादयो मया हन्यन्ते' 'अहमेव तेषां हन्ता' इति, एषा बुद्धि. मृषैव ते । कथम्?—

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥

य एनं प्रकृतं देहिनं वेत्ति विजानाति हन्तारं हनन-क्रियाया: कर्तारं यश्च एनम् अन्यो मन्यते हतं देहहननेन 'हत. अहम्' इति हननक्रियाया. कर्मभूतम्, तौ उभौ न विजानीत: न ज्ञातवन्तौ अविवेकेन आत्मानम् । 'हन्ता अहम्' 'हत. अस्मि अहम्' इति देहहननेन आत्मानमहं-प्रत्ययविषयं यौ विजानीत तौ आत्मस्वरूपानभिज्ञौ इत्यर्थ: । यस्मात् न अयम् अत्मा हन्ति न हननक्रियाया: कर्ता भवति, न च हन्यते न च कर्म भवतीत्यर्थ:, अविक्रियत्वात् ॥

कथमविक्रय आत्मेति द्वितीयो मन्त्र:—

न जायते म्रियते वा कदाचि-
न्नायं भूत्वाभविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥ २० ॥

न जायते न उत्पद्यते, जनिलक्षणा वस्तुविक्रिया न आत्मनो विद्यते इत्यर्थः । तथा न म्रियते वा । वाशब्दः चार्थे । न म्रियते च इति अन्त्या विनाशलक्षणा विक्रिया प्रतिषिध्यते । कदाचिच्छब्दः सर्वविक्रियाप्रतिषेधै संबध्यते— न कदाचित् जायते, न कदाचित् म्रियते, इत्येवम् । यस्मात् अयम् आत्मा भूत्वा भवनक्रियामनुभूय पश्चात् अभविता अभाव गन्ता न भूयः पुन, तस्मात् न म्रियते । यो हि भूत्वा न भविता स म्रियत इत्युच्यते लोके । वाशब्दात् नशब्दाच्च अयमात्मा अभूत्वा वा भविता देहवत् न भूयः । तस्मात् न जायते । यो हि अभूत्वा भविता स जायत इत्युच्यते । नैवमात्मा । अतो न जायते । यस्मादेव तस्मात् अज., यस्मात् न म्रियते तस्मात् नित्यश्च । यद्यपि आद्यन्तयोर्विक्रिययो· प्रतिषेधे सर्वा विक्रियाः प्रतिषिद्धा भवन्ति, तथापि मध्यभाविनीनां विक्रियाणां स्वशब्दैरेव प्रतिषेधः कर्तव्यः अनुक्तानामपि यौवनादिसमस्तविक्रियाणां प्रतिषेधो यथा स्यात् इत्याह— शाश्वत इत्यादिना । शाश्वत इति अपक्षयलक्षणा विक्रिया प्रतिषिध्यते । शश्वद्भव· शाश्वत· । न अपक्षीयते स्वरूपेण, निरवयवत्वात् । नापि गुणक्षयेण अपक्षयः, निर्गुणत्वात् । अपक्षयविपरीतापि

वृद्धिलक्षणा विक्रिया प्रतिषिध्यते— पुराण इति । यो हि अवयवागमेन उपचीयते स वर्धते अभिनव इति च उच्यते । अय तु आत्मा निरवयवत्वात् पुरापि नव एवेति पुराणः, न वर्धते इत्यर्थः । तथा न हन्यते । हन्तिः अत्र विपरिणामार्थे द्रष्टव्यः अपुनरुक्तताये । न विपरिणम्यते इत्यर्थ । हन्यमाने विपरिणम्यमानेऽपि शरीरे । अस्मिन् मन्त्रे षड् भावविकारा लौकिकवस्तुविक्रिया आत्मनि प्रतिषिध्यन्ते । सर्वप्रकारविक्रियारहित आत्मा इति वाक्यार्थ. । यस्मादेवं तस्मात् 'उभौ तौ न विजानीतः' इति पूर्वेण मन्त्रेण अस्य सबन्ध. ॥

'य एनं वेत्ति हन्तारम्' इत्यनेन मन्त्रेण हननक्रियाया कर्ता कर्म च न भवति इति प्रतिज्ञाय, 'न जायते' इत्यनेन अविक्रियत्वं हेतुमुक्त्वा प्रतिज्ञातार्थमुपसहरति—

वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥

वेद विजानाति अविनाशिनम् अन्त्यभावविकाररहितं नित्यं विपरिणामरहितं यो वेद इति संबन्धः । एनं पूर्वेण मन्त्रेणोक्तलक्षणम् अजं जन्मरहितम् अव्ययम् अपक्षयरहितं कथं

केन प्रकारेण स विद्वान् पुरुषः अधिकृत. हन्ति हननक्रिया करोति, कथ वा घातयति हन्तार प्रयोजयति । न कथंचिन् कचित् हन्ति, न कथचित् कंचित् घातयति इति उभयत्र आक्षेप एवार्थ., प्रश्नार्थासभवात् । हेत्वर्थस्य च अविक्रियत्वस्य तुल्यत्वात् विदुष सर्वकर्मप्रतिषेध एव प्रकरणार्थ. अभिप्रेतो भगवता । हन्तेस्तु आक्षेप उदाहरणार्थत्वेन कथितः ॥

विदुषः क कर्मासभवहेतुविशेषं पश्यन् कर्माण्याक्षिपति भगवान् 'कथ स पुरुष' इति । ननु उक्त एवात्मन· अविक्रियत्वं सर्वकर्मासंभवकारणविशेषः । सत्यमुक्तः । न तु सः कारणविशेष, अन्यत्वात् विदुषः अविक्रियादात्मनः । न हि अविक्रिय स्थाणु विदितवतः कर्म न संभवति इति चेन्, न, विदुषः आत्मत्वात् । न देहादिसघातस्य विद्वत्ता । अतः पारिशेष्यात् असंहतः आत्मा विद्वान् अविक्रियः इति तस्य विदुष कर्मासंभवात् आक्षेपो युक्त 'कथ स पुरुषः' इति । यथा बुद्ध्याद्याहृतस्य शब्दाद्यर्थस्य अविक्रिय एव सन् बुद्धिवृत्त्यविवेकविज्ञानेन अविद्यया उपलब्धा आत्मा कल्प्यते, एवमेव आत्मानात्मविवेकज्ञानेन बुद्धिवृत्त्या विद्यया असत्यरूपयैव परमार्थतः अविक्रिय एव आत्मा विद्वानुच्यते । विदुषः कर्मासंभववचनात् यानि

कर्माणि शास्त्रेण विधीयन्ते तानि अविदुषो विहितानि इति भगवतो निश्चयोऽवगम्यते ॥

ननु विद्यापि अविदुष एव विधीयते, विदितविद्यस्य पिष्टपेषणवत् विद्याविधानानर्थक्यात् । तत्र अविदुषः कर्माणि विधीयन्ते न विदुषः इति विशेषो नोपपद्यते इति चेत्, न, अनुष्ठेयस्य भावाभावविशेषोपपत्तेः । अग्निहोत्रादिविध्यर्थज्ञानोत्तरकालम् अग्निहोत्रादिकर्म अनेकसाधनोपसंहारपूर्वकमनुष्ठेयम् 'कर्ता अहम्, मम कर्तव्यम्' इत्येवंप्रकारविज्ञानवतः अविदुषः यथा अनुष्ठेयं भवति, न तु तथा 'न जायते' इत्याद्यात्मस्वरूपविध्यर्थज्ञानोत्तरकालभावि किंचिदनुष्ठेय भवति, किं तु 'नाहं कर्ता, नाहं भोक्ता' इत्याद्यात्मैकत्वाकर्तृत्वादिविषयज्ञानात् नान्यदुत्पद्यते इति एष विशेष उपपद्यते । यः पुनः 'कर्ता अहम्' इति वेत्ति आत्मानम्, तस्य 'मम इद कर्तव्यम्' इति अवश्यंभाविनी बुद्धिः स्यात्; तदपेक्षया सः अधिक्रियते इति तं प्रति कर्माणि संभवन्ति । स च अविद्वान्, 'उभौ तौ न विजानीतः' इति वचनात्, विशेषितस्य च विदुषः कर्माक्षेपवचनाच्च 'कथं स पुरुषः' इति । तस्मात् विशेषितस्य अविक्रियात्मदर्शिनः विदुषः मुमुक्षोश्च सर्वकर्मसंन्यासे एव अधिकारः । अत एव

भगवान् नारायणः सांख्यान् विदुष अविदुषश्च कर्मिण. प्रविभज्य द्वे निष्ठे ग्राहयति— 'ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्' इति । तथा च पुत्राय आह भगवान् व्यासः— 'द्वाविमावथ पन्थानौ' इत्यादि । तथा च क्रियापथश्चैव पुरस्तात् पश्चात्संन्यासश्चेति । एतमेव विभागं पुनः पुनर्दर्शयिष्यति भगवान्— अतत्त्ववित् 'अहंकारविमूढात्मा कर्ताहमिति मन्यते', तत्त्ववित्तु नाहं करोमि इति । तथा च 'सर्वकर्माणि मनसा संन्यस्यास्ते' इत्यादि ॥

तत्र केचित्पण्डितंमन्या वदन्ति— 'जन्मादिषड्भावविक्रियारहित· अविक्रियः अकर्ता एकः अहमात्मा' इति न कस्यचित् ज्ञानम् उत्पद्यते, यस्मिन् सति सर्वकर्मसंन्यासः उपदिश्यते इति । तन्न, 'न जायते' इत्यादिशास्त्रोपदेशानर्थक्यप्रसङ्गात् । यथा च शास्त्रोपदेशसामर्थ्यात् धर्माधर्मास्तित्वविज्ञानं कर्तुश्च देहान्तरसंबन्धविज्ञानमुत्पद्यते, तथा शास्त्रात् तस्यैव आत्मनः अविक्रियत्वाकर्तृत्वैकत्वादिविज्ञानं कस्मात् नोत्पद्यते इति प्रष्टव्याः ते । करणागोचरत्वात् इति चेत्, न, 'मनसैवानुद्रष्टव्यम्' इति श्रुतेः । शास्त्राचार्योपदेशशमदमादिसस्कृतं मनः आत्मदर्शने करणम् । तथा च तदधिगमाय अनुमाने आगमे च सति ज्ञानं नोत्पद्यत इति

साहसमात्रमेतत् । ज्ञान च उत्पद्यमान तद्विपरीतमज्ञानम् अवश्य बाधते इत्यभ्युपगन्तव्यम् । तच्च अज्ञानं दर्शितम् 'हन्ता अहम्, हतः अस्मि' इति 'उभौ तौ न विजानीतः' इति । अत्र च आत्मनः हननक्रियाया. कर्तृत्वं कर्मत्वं हेतुकर्तृत्वं च अज्ञानकृतं दर्शितम् । तच्च सर्वक्रियास्वपि समानं कर्तृत्वादेः अविद्याकृतत्वम्, अविक्रियत्वात् आत्मन. । विक्रियावान् हि कर्ता आत्मन कर्मभूतमन्य प्रयोजयति 'कुरु' इति । तदेतत् अविशेषेण विदुषः सर्वक्रियासु कर्तृत्व हेतुकर्तृत्वं च प्रतिषेधति भगवान्वासुदेवः विदुषः कर्माधिकाराभावप्रदर्शनार्थम् 'वेदाविनाशिनं...कथं स पुरुष' इत्यादिना । क पुनः विदुष. अधिकार इति एतदुक्तं पूर्वमेव 'ज्ञानयोगेन सांख्यानाम्' इति । तथा च सर्वकर्मसंन्यासं वक्ष्यति 'सर्वकर्माणि मनसा' इत्यादिना ॥

ननु मनसा इति वचनात् न वाचिकानां कायिकाना च संन्यासः इति चेत्, न, सर्वकर्माणि इति विशेषितत्वात् । मानसानामेव सर्वकर्मणामिति चेत्, न, मनोव्यापारपूर्वकत्वाद्वाक्कायव्यापाराणां मनोव्यापाराभावे तदनुपपत्तेः । शास्त्रीयाणां वाक्कायकर्मणां कारणानि मानसानि कर्माणि वर्जयित्वा अन्यानि सर्वकर्माणि मनसा संन्य-

स्येदिति चेत्, न, 'नैव कुर्वन्न कारयन्' इति विशेषणात्। सर्वकर्मसंन्यासः अयं भगवता उक्तः मरिष्यतः न जीवतः इति चेत्, न, 'नवद्वारे पुरे देही आस्ते' इति विशेषणानुपपत्तेः। न हि सर्वकर्मसंन्यासेन मृतस्य तद्देहे आसनं संभवति। अकुर्वतः अकारयतश्च देहे संन्यस्य इति संबन्धः न देहे आस्ते इति चेत्, न, सर्वत्र आत्मनः अविक्रियत्वावधारणात्, आसनक्रियायाश्च अधिकरणापेक्षत्वात्, तदनपेक्षत्वाच्च संन्यासस्य। संपूर्वस्तु न्यासशब्दः अत्र त्यागार्थः, न निक्षेपार्थः। तस्मात् गीताशास्त्रे आत्मज्ञानवत् संन्यासे एव अधिकारः, न कर्मणि इति तत्र तत्र उपरिष्टात् आत्मज्ञानप्रकरणे दर्शयिष्यामः ॥

प्रकृतं तु वक्ष्यामः। तत्र आत्मनः अविनाशित्वं प्रतिज्ञातम्। तत्किमिवेति, उच्यते—

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ॥ २२ ॥

वासांसि वस्त्राणि जीर्णानि दुर्बलतां गतानि यथा लोके

विहाय परित्यज्य नवानि अभिनवानि गृह्णाति उपादत्ते नरः पुरुषः अपराणि अन्यानि, तथा तद्वदेव शरीराणि विहाय जीर्णानि अन्यानि संयाति संगच्छति नवानि देही आत्मा पुरुषवत् अविक्रिय एवेत्यर्थः ॥

कस्मात् अविक्रिय एवेति, आह—

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥२३॥

एनं प्रकृतं देहिनं न च्छिन्दन्ति शस्त्राणि, निरवयवत्वात् न अवयवविभागं कुर्वन्ति। शस्त्राणि अस्यादीनि। तथा न एनं दहति पावकः, अग्निरपि न भस्मीकरोति। तथा न च एनं क्लेदयन्ति आपः। अपां हि सावयवस्य वस्तुनः आर्द्रीभावकरणेन अवयवविश्लेषापादने सामर्थ्यम्। तत् न निरवयवे आत्मनि संभवति। तथा स्नेहवत् द्रव्यं स्नेहशोषणेन नाशयति वायुः। एनं तु आत्मानं न शोषयति मारुतोऽपि ॥

यतः एवं तस्मात्—

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥२४॥

यस्मात् अन्योन्यनाशहेतुभूतानि एनमात्मान नाशयितुं नोत्सहन्ते अस्यादीनि तस्मात् नित्यः । नित्यत्वात् सर्वगतः । सर्वगतत्वात् स्थाणुः इव, स्थिर इत्येतत् । स्थिरत्वात् अचलः अयम् आत्मा । अतः सनातनः चिरंतनः, न कारणात्कुतश्चित् निष्पन्नः, अभिनव इत्यर्थः ॥

नैतेषां श्लोकानां पौनरुक्त्यं चोदनीयम्, यतः एकेनैव श्लोकेन आत्मन· नित्यत्वमविक्रियत्वं चोक्तम् 'न जायते म्रियते वा' इत्यादिना । तत्र यदेव आत्मविषयं किंचिदुच्यते, तत् एतस्मात् श्लोकार्थात् न अतिरिच्यते, किंचिच्छब्दतः पुनरुक्तम्, किंचिदर्थत इति । दुर्बोधत्वात् आत्मवस्तुन पुन पुनः प्रसङ्गमापाद्य शब्दान्तरेण तदेव वस्तु निरूपयति भगवान् वासुदेवः कथं नु नाम संसारिणामसंसारित्वबुद्धिगोचरतामापन्नं सत् अव्यक्त तत्त्वं संसारनिवृत्तये स्यात् इति ॥

किंच—

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ २५ ॥

सर्वकरणाविषयत्वात् न व्यज्यत इति अव्यक्तः अयम्

आत्मा । अत एव अचिन्त्यः अयम् । यद्धि इन्द्रियगोचरः तत् चिन्ताविषयत्वमापद्यते । अयं त्वात्मा अनिन्द्रियगोचरत्वात् अचिन्त्यः । अत एव अविकार्यः, यथा क्षीरं दध्यातञ्चनादिना विकारि न तथा अयमात्मा । निरवयवत्वाच्च अविक्रियः । न हि निरवयवं किंचित् विक्रियात्मकं दृष्टम् । अविक्रियत्वात् अविकार्यं अयम् आत्मा उच्यते । तस्मात् एव यथोक्तप्रकारेण एनम् आत्मानं विदित्वा त्वं न अनुशोचितुमर्हसि हन्ताहमेषाम् । मयैते हन्यन्त इति ॥

आत्मनः अनित्यत्वमभ्युपगम्य इदमुच्यते—

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ॥२६॥

अथ च इति अभ्युपगमार्थः । एनं प्रकृतमात्मानं नित्यजातं लोकप्रसिद्धया प्रत्यनेकशरीरोत्पत्ति जातो जात इति मन्यसे तथा प्रतितत्तद्विनाशं नित्य वा मन्यसे मृतं मृतो मृत इति; तथापि तथाभावेऽपि आत्मनि त्व महाबाहो, न एवं शोचितुमर्हसि, जन्मवतो जन्म नाशवतो नाशश्चेत्येतावदवश्यंभाविनाविति ॥

तथा च सति—

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥२७॥

जातस्य हि लब्धजन्मनः ध्रुव अव्यभिचारी मृत्युः मरणं ध्रुवं जन्म मृतस्य च । तस्मादपरिहार्योऽयं जन्ममरणलक्षणोऽर्थः । तस्मिन्नपरिहार्येऽर्थे न त्व शोचितुमर्हसि ॥

कार्यकरणसंघातात्मकान्यपि भूतान्युद्दिश्य शोको न युक्त कर्तुम्, यत —

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८ ॥

अव्यक्तादीनि अव्यक्तम् अदर्शनम् अनुपलब्धिः आदिः येषां भूतानां पुत्रमित्रादिकार्यकरणसंघातात्मकानां तानि अव्यक्तादीनि भूतानि प्रागुत्पत्तेः, उत्पन्नानि च प्राङ्मरणात् व्यक्तमध्यानि । अव्यक्तनिधनान्येव पुनः अव्यक्तम् अदर्शनं निधन मरण येषां तानि अव्यक्तनिधनानि । मरणादूर्ध्वमप्यव्यक्ततामेव प्रतिपद्यन्ते इत्यर्थः । तथा चोक्तम्— 'अदर्शनादापतित पुनश्चादर्शनं गत । नासौ तव न तस्य त्व वृथा का परिदेवना' इति । तत्र का परिदेवना को वा प्रलापः अदृष्टदृष्टप्रनष्टभ्रान्तिभूतेषु भूतेष्वित्यर्थः ॥

दुर्विज्ञेयोऽयं प्रकृत आत्मा; किं त्वामेवैकमुपालभे साधारणे भ्रान्तिनिमित्ते। कथं दुर्विज्ञेयोऽयमात्मा इत्यत आह—

आश्चर्यवत्पश्यति कश्चिदेन-
माश्चर्यवद्वदति तथैव चान्यः।
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वाप्येनं वेद न चैव कश्चित्॥ २९॥

आश्चर्यवत् आश्चर्यम् अदृष्टपूर्वम् अद्भुतम् अकस्माद्दृश्यमानं तेन तुल्यं आश्चर्यवत् आश्चर्यमिव एनम् आत्मान पश्यति कश्चित्। आश्चर्यवत् एनं वदति तथैव च अन्यः। आश्चर्यवच्च एनमन्यः शृणोति। श्रुत्वा दृष्ट्वा उक्त्वापि एनमात्मानं वेद न चैव कश्चित्। अथवा योऽयमात्मानं पश्यति स आश्चर्यतुल्यः, यो वदति यश्च शृणोति सः अनेकसहस्रेषु कश्चिदेव भवति। अतो दुर्बोध आत्मा इत्यभिप्रायः॥

अथेदानीं प्रकरणार्थमुपसंहरन्ब्रूते—

देही नित्यमवध्योऽयं देहे सर्वस्य भारत।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि॥

देही शरीरी नित्यं सर्वदा सर्वावस्थासु अवध्यः निरव-

यवत्वान्नित्यत्वाच्च तत्र अवध्योऽयं देहे शरीरे सर्वस्य सर्वगतत्वात्स्थावरादिषु स्थितोऽपि सर्वस्य प्राणिजातस्य देहे वध्यमानेऽपि अयं देही न वध्यः यस्मात्, तस्मात् भीष्मादीनि सर्वाणि भूतानि उद्दिश्य न त्व शोचितुमर्हसि ॥

इह परमार्थतत्त्वापेक्षायां शोको मोहो वा न संभवतीत्युक्तम् । न केवलं परमार्थतत्त्वापेक्षायामेव । कि तु—

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥

स्वधर्ममपि स्वो धर्मः क्षत्रियस्य युद्ध तमपि अवेक्ष्य त्वं न विकम्पितुं प्रचलितुम् नार्हसि क्षत्रियस्य स्वाभाविकाद्धर्मात आत्मस्वाभाव्यादित्यभिप्रायः । तच्च युद्धं पृथिवीजयद्वारेण धर्मार्थं प्रजारक्षणार्थं चेति धर्मादनपेतं परं धर्म्यम् । तस्मात् धर्म्यात् युद्धात् श्रेय· अन्यत् क्षत्रियस्य न विद्यते हि यस्मात् ॥

कुतश्च तत् युद्धं कर्तव्यमिति, उच्यते—

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥

यदृच्छया च अप्रार्थिततया उपपन्नम् आगतं स्वर्गद्वारम् अपावृतम् उद्घाटितं ये एतत् ईदृश युद्ध लभन्ते क्षत्रिया: हे पार्थ, कि न सुखिन· ते ?

एव कर्तव्यताप्राप्तमपि—

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥

अथ चेत् त्वम् इमं धर्म्यं धर्मादनपेतं विहितं संग्रामं युद्ध न करिष्यसि चेत्, ततः तदकरणात् स्वधर्मं कीर्तिं च महादेवादिसमागमनिमित्तां हित्वा केवलं पापम् अवाप्स्यसि ॥

न केवल स्वधर्मकीर्तिपरित्याग —

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।
संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥ ३४ ॥

अकीर्तिं चापि युद्धे भूतानि कथयिष्यन्ति ते तव अव्ययां दीर्घकालाम् । धर्मात्मा शूर इत्येवमादिभिः गुणैः संभावितस्य च अकीर्तिः मरणात् अतिरिच्यते, संभावितस्य च अकीर्तेः वरं मरणमित्यर्थः ॥

किच—

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥

भयात् कर्णादिभ्य रणात् युद्धात् उपरतं निवृत्तं मंस्यन्ते चिन्तयिष्यन्ति न कृपयेति त्वां महारथा. दुर्योधनप्रभृतय. । येषां च त्वं दुर्योधनादीना बहुमतो बहुभिः गुणैः युक्त. इत्येवं मत बहुमतः भूत्वा पुनः यास्यसि लाघवं लघुभावम् ॥

किच—

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥

अवाच्यवादान् अवक्तव्यवादांश्च बहून् अनेकप्रकारान् वदिष्यन्ति तव अहिता शत्रवः निन्दन्तः कुत्सयन्तः तव त्वदीयं सामर्थ्यं निवातकवचादियुद्धनिमित्तम् । ततः तस्मात् निन्दाप्राप्तेर्दुःखात् दु.खतरं नु किम्, ततः कष्टतरं दु ख नास्तीत्यर्थः ॥

युद्धे पुनः क्रियमाणे कर्णादिभि —

हतो वा प्राप्स्यसि स्वर्गं
जित्वा वा भोक्ष्यसे महीम् ।

तस्मादुत्तिष्ठ कौन्तेय
युद्धाय कृतनिश्चयः ॥ ३७ ॥

हतो वा प्राप्स्यसि स्वर्गम्, हत सन् स्वर्गं प्राप्स्यसि। जित्वा वा कर्णादीन् शूरान् भोक्ष्यसे महीम्। उभयथापि तव लाभ एवेत्यभिप्रायः। यत एव तस्मात् उत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चय. 'जेष्यामि शत्रून्, मरिष्यामि वा' इति निश्चयं कृत्वेत्यर्थः ॥

तत्र युद्धं स्वधर्म इत्येवं युध्यमानस्योपदेशमिमं शृणु—

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥

सुखदुःखे समे तुल्ये कृत्वा, रागद्वेषावप्यकृत्वेत्येतत्। तथा लाभालाभौ जयाजयौ च समौ कृत्वा ततो युद्धाय युज्यस्व घटस्व। न एव युद्धं कुर्वन् पापम् अवाप्स्यसि। इत्येष उपदेशः प्रासङ्गिक. ॥

शोकमोहापनयनाय लौकिको न्याय· 'स्वधर्ममपि चावेक्ष्य' इत्याद्यैः श्लोकैरुक्तः, न तु तात्पर्येण। परमार्थदर्शनमिह प्रकृतम्। तच्चोक्तमुपसंह्रियते— 'एषा तेऽभिहिता'

इति शास्त्रविषयविभागप्रदर्शनाय । इह हि प्रदर्शिते पुनः शास्त्रविषयविभागे उपरिष्टात् 'ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्' इति निष्ठाद्वयविषयं शास्त्रं सुखं प्रवर्तिष्यते, श्रोतारश्च विषयविभागेन सुखं ग्रहीष्यन्ति इत्यत आह—

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥

एषा ते तुभ्यम् अभिहिता उक्ता सांख्ये परमार्थवस्तुविवेकविषये बुद्धिः ज्ञानं साक्षात् शोकमोहादिसंसारहेतुदोषनिवृत्तिकारणम् । योगे तु तत्प्राप्त्युपाये नि सङ्गतया द्वन्द्वप्रहाणपूर्वकम् ईश्वराराधनार्थे कर्मयोगे कर्मानुष्ठाने समाधियोगे च इमाम् अनन्तरमेवोच्यमानां बुद्धि शृणु । तां च बुद्धि स्तौति प्ररोचनार्थम्—बुद्ध्या यया योगविषयया युक्त. हे पार्थ, कर्मबन्धं कर्मैव धर्माधर्माख्यो बन्ध. कर्मबन्ध. त प्रहास्यसि ईश्वरप्रसादनिमित्तज्ञानप्राप्त्यैव इत्यभिप्रायः ॥

किंच अन्यत्—

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥

न इह मोक्षमार्गे कर्मयोगे अभिक्रमनाशः अभिक्रमणमभिक्रमः प्रारम्भः तस्य नाशः नास्ति यथा कृष्यादेः। योगविषये प्रारम्भस्य न अनैकान्तिकफलत्वमित्यर्थः। किंच—नापि चिकित्सावत् प्रत्यवायः विद्यते भवति। किं तु स्वल्पमपि अस्य धर्मस्य योगधर्मस्य अनुष्ठितं त्रायते रक्षति महतः भयात् संसारभयात् जन्ममरणादिलक्षणात्॥

येयं सांख्ये बुद्धिरुक्ता योगे च, वक्ष्यमाणलक्षणा सा—

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्॥

व्यवसायात्मिका निश्चयस्वभावा एका एव बुद्धिः इतरविपरीतबुद्धिशाखाभेदस्य बाधिका, सम्यक्प्रमाणजनितत्वात्, इह श्रेयोमार्गे हे कुरुनन्दन। याः पुनः इतराः विपरीतबुद्धयः, यासां शाखाभेदप्रचारवशात् अनन्तः अपारः अनुपरतः संसारो नित्यप्रततो विस्तीर्णो भवति, प्रमाणजनितविवेकबुद्धिनिमित्तवशाच्च उपरतास्वनन्तभेदबुद्धिषु संसारोऽप्युपरमते ता बुद्धयः बहुशाखाः बह्व्यः शाखाः यासां ता बहुशाखाः, बहुभेदा इत्येतत्। प्रतिशाखाभेदेन हि अनन्ताश्च बुद्धयः। केषाम्? अव्यवसायिनां प्रमाणजनितविवेकबुद्धिरहितानामित्यर्थः॥

येषां व्यवसायात्मिका बुद्धिर्नास्ति ते—

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥

याम् इमां वक्ष्यमाणा पुष्पितां पुष्पित इव वृक्षः शोभमानां श्रूयमाणरमणीयां वाचं वाक्यलक्षणां प्रवदन्ति । के ? अविपश्चितः अमेधसः अविवेकिन इत्यर्थः । वेदवादरताः बह्वर्थवादफलसाधनप्रकाशकेषु वेदवाक्येषु रताः हे पार्थ, न अन्यत् स्वर्गपश्वादिफलसाधनेभ्यः कर्मभ्यः अस्ति इति एवं वादिनः वदनशीलाः ॥

ते च—

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३ ॥

कामात्मानः कामस्वभावाः, कामपरा इत्यर्थः । स्वर्गपराः स्वर्गः परः पुरुषार्थः येषां ते स्वर्गपराः स्वर्गप्रधानाः । जन्मकर्मफलप्रदा कर्मणः फलं कर्मफलं जन्मैव कर्मफलं जन्मकर्मफलं तत् प्रददातीति जन्मकर्मफलप्रदा, तां वाचम् । प्रवदन्ति इत्यनुषज्यते । क्रियाविशेषबहुलां क्रियाणां विशेषाः क्रियाविशेषाः ते बहुला यस्यां वाचि तां स्वर्गपशुपुत्राद्यर्था. यया

वाचा बाहुल्येन प्रकाश्यन्ते । भोगैश्वर्यगति प्रति भोगश्च ऐश्वर्यं च भोगैश्वर्ये, तयोर्गति. प्राप्तिः भोगैश्वर्यगतिः, तां प्रति साधनभूताः ये क्रियाविशेषाः तद्बहुलां तां वाचं प्रवदन्त. मूढा. संसारे परिवर्तन्ते इत्यभिप्राय. ॥

तेषां च—

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥

भोगैश्वर्यप्रसक्तानां भोगः कर्तव्यः ऐश्वर्यं च इति भोगैश्वर्ययोरेव प्रणयवतां तदात्मभूतानाम् । तया क्रियाविशेषबहुलया वाचा अपहृतचेतसाम् आच्छादितविवेकप्रज्ञानां व्यवसायात्मिका सांख्ये योगे वा बुद्धिः समाधौ समाधीयते अस्मिन् पुरुषोपभोगाय सर्वमिति समाधिः अन्तःकरणं बुद्धिः तस्मिन् समाधौ, न विधीयते न भवति इत्यर्थ. ॥

ये एवं विवेकबुद्धिरहिताः तेषां कामात्मनां यत् फल तदाह—

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥

त्रैगुण्यविषयाः त्रैगुण्यं संसारो विषयः प्रकाशयितव्यः येषां ते वेदाः त्रैगुण्यविषयाः। त्वं तु निस्त्रैगुण्यो भव अर्जुन, निष्कामो भव इत्यर्थः। निर्द्वन्द्वः सुखदुःखहेतू सप्रतिपक्षौ पदार्थौ द्वन्द्वशब्दवाच्यौ, ततः निर्गत. निर्द्वन्द्वो भव। नित्यसत्त्वस्थः सदा सत्त्वगुणाश्रितो भव। तथा निर्योगक्षेमः अनुपात्तस्य उपादानं योगः, उपात्तस्य रक्षणं क्षेम., योग-क्षेमप्रधानस्य श्रेयसि प्रवृत्तिर्दुष्करा इत्यतः निर्योगक्षेमो भव। आत्मवान् अप्रमत्तश्च भव। एष तव उपदेशः स्वधर्म-मनुतिष्ठतः॥

सर्वेषु वेदोक्तेषु कर्मसु यान्युक्तान्यनन्तानि फलानि तानि नापेक्ष्यन्ते चेत्, किमर्थं तानि ईश्वरायेत्यनुष्ठीयन्ते इत्युच्यते, शृणु—

यावानर्थ उदपाने सर्वतःसंप्लुतोदके।
तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः॥४६॥

यथा लोके कूपतडागाद्यनेकस्मिन् उदपाने परिच्छिन्नोदके यावान् यावत्परिमाणः स्नानपानादिः अर्थः फलं प्रयोजनं स सर्वः अर्थः सर्वतःसंप्लुतोदकेऽपि यः अर्थः तावानेव संपद्यते, तत्र अन्तर्भवतीत्यर्थः। एवं तावान् तावत्परिमाण

एव संपद्यते सर्वेषु वेदेषु वेदोक्तेषु कर्मसु यः अर्थः यत्कर्मफलं सः अर्थः ब्राह्मणस्य संन्यासिनः परमार्थतत्त्वं विजानतः यः अर्थः यत् विज्ञानफलं सर्वतःसंप्लुतोदकस्थानीयं तस्मिन् तावानेव संपद्यते तत्रैवान्तर्भवतीत्यर्थः । 'यथा कृताय विजितायाधरेयाः संयन्त्येवमेनं सर्वं तदभिसमेति यत् किंचित् प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद' इति श्रुतेः । 'सर्वं कर्माखिलम्' इति च वक्ष्यति । तस्मात् प्राक् ज्ञाननिष्ठाधिकारप्राप्तेः कर्मण्यधिकृतेन कूपतडागाद्यर्थस्थानीयमपि कर्म कर्तव्यम् ॥

तव च—

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥ ४७ ॥

कर्मण्येव अधिकारः न ज्ञाननिष्ठायां ते तव । तत्र च कर्म कुर्वतः मा फलेषु अधिकारः अस्तु, कर्मफलतृष्णा मा भूत् कदाचन कस्यांचिदप्यवस्थायामित्यर्थः । यदा कर्मफले तृष्णा ते स्यात् तदा कर्मफलप्राप्तेः हेतुः स्याः, एवं मा कर्मफलहेतुः भूः । यदा हि कर्मफलतृष्णाप्रयुक्तः कर्मणि प्रवर्तते तदा कर्मफलस्यैव जन्मनो हेतुर्भवेत् । यदि कर्मफलं

नेष्यते, किं कर्मणा दुःखरूपेण? इति मा ते तव सङ्ग अस्तु अकर्मणि अकरणे प्रीतिर्मा भूत् ॥

यदि कर्मफलप्रयुक्तेन न कर्तव्यं कर्म, कथं तर्हि कर्तव्यमिति; उच्यते—

योगस्थः कुरु कर्माणि
सङ्गं त्यक्त्वा धनंजय ।
सिद्ध्यसिद्ध्योः समो भूत्वा
समत्वं योग उच्यते ॥ ४८ ॥

योगस्थः सन् कुरु कर्माणि केवलमीश्वरार्थम्; तत्रापि 'ईश्वरो मे तुष्यतु' इति सङ्गं त्यक्त्वा धनंजय । फलतृष्णाशून्येन क्रियमाणे कर्मणि सत्त्वशुद्धिजा ज्ञानप्राप्तिलक्षणा सिद्धिः, तद्विपर्ययजा असिद्धिः, तयोः सिद्ध्यसिद्ध्योः अपि समः तुल्यः भूत्वा कुरु कर्माणि । कोऽसौ योगः यत्रस्थः कुरु इति उक्तम्? इदमेव तत्— सिद्ध्यसिद्ध्योः समत्वं योगः उच्यते ॥

यत्पुनः समत्वबुद्धियुक्तमीश्वराराधनार्थं कर्मोक्तम्, एतस्मात्कर्मणः—

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥ ४९ ॥

दूरेण अतिविप्रकर्षेण अत्यन्तमेव हि अवरम् अधमं निकृष्टं कर्म फलार्थिना क्रियमाणं बुद्धियोगात् समत्वबुद्धियुक्तात् कर्मणः, जन्ममरणादिहेतुत्वात् । हे धनंजय, यत एवं ततः योगविषयायां बुद्धौ तत्परिपाकजायां वा सांख्यबुद्धौ शरणम् आश्रयमभयप्राप्तिकारणम् अन्विच्छ प्रार्थयस्व, परमार्थज्ञानशरणो भवेत्यर्थः । यतः 'अवरं कर्म कुर्वाणा कृपणाः दीनाः फलहेतवः फलतृष्णाप्रयुक्ताः सन्तः, 'यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपणः' इति श्रुतेः ॥

समत्वबुद्धियुक्तः सन् स्वधर्ममनुतिष्ठन् यत्फलं प्राप्नोति तच्छृणु—

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥

बुद्धियुक्तः कर्मसमत्वविषयया बुद्धया युक्तः बुद्धियुक्तः सः जहाति परित्यजति इह अस्मिन् लोके उभे सुकृतदुष्कृते पुण्यपापे सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण यतः, तस्मात् समत्वबुद्धियोगाय युज्यस्व घटस्व । योगो हि कर्मसु कौशलम्,

स्वधर्माख्येषु कर्मसु वर्तमानस्य या सिद्ध्यसिद्ध्योः समत्वबुद्धिः ईश्वरार्पितचेतस्तया तत् कौशलं कुशलभावः । तद्धि कौशलं यत् बन्धनस्वभावान्यपि कर्माणि समत्वबुद्ध्या स्वभावान् निवर्तन्ते । तस्मात्समत्वबुद्धियुक्तो भव त्वम् ॥

यस्मात्—

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥

कर्मजं फलं त्यक्त्वा इति व्यवहितेन संबन्धः । इष्टानिष्टदेहप्राप्तिः कर्मजं फलं कर्मभ्यो जातं बुद्धियुक्ताः समत्वबुद्धियुक्ताः सन्तः हि यस्मात् फलं त्यक्त्वा परित्यज्य मनीषिणः ज्ञानिनो भूत्वा, जन्मबन्धविनिर्मुक्ताः जन्मैव बन्धः जन्मबन्धः तेन विनिर्मुक्ताः जीवन्त एव जन्मबन्धात् विनिर्मुक्ताः सन्तः, पदं परमं विष्णोः मोक्षाख्यं गच्छन्ति अनामयं सर्वोपद्रवरहितमित्यर्थः । अथवा 'बुद्धियोगाद्धनंजय' इत्यारभ्य परमार्थदर्शनलक्षणैव सर्वतःसंप्लुतोदकस्थानीया कर्मयोगजसत्त्वशुद्धिजनिता बुद्धिर्दर्शिता, साक्षात्सुकृतदुष्कृतप्रहाणादिहेतुत्वश्रवणात् ॥

योगानुष्ठानजनितसत्त्वशुद्धिजा बुद्धिः कदा प्राप्स्यते इत्युच्यते—

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥

यदा यस्मिन्काले ते तव मोहकलिलं मोहात्मकमविवेकरूपं कालुष्यं येन आत्मानात्मविवेकबोध कलुषीकृत्य विषयं प्रत्यन्तःकरणं प्रवर्तते, तत् तव बुद्धिः व्यतितरिष्यति व्यतिक्रमिष्यति, अतिशुद्धभावमापत्स्यते इत्यर्थः । तदा तस्मिन् काले गन्तासि प्राप्स्यसि निर्वेदं वैराग्यं श्रोतव्यस्य श्रुतस्य च, तदा श्रोतव्यं श्रुतं च ते निष्फलं प्रतिभातीत्यभिप्रायः ॥

मोहकलिलात्ययद्वारेण लब्धात्मविवेकजप्रज्ञः कदा कर्मयोगजं फल परमार्थयोगमवाप्स्यामीति चेत्, तत् शृणु—

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥

श्रुतिविप्रतिपन्ना अनेकसाध्यसाधनसंबन्धप्रकाशनश्रुतिभिः श्रवणैः प्रवृत्तिनिवृत्तिलक्षणैः विप्रतिपन्ना नानाप्रतिपन्ना विक्षिप्ता सती ते तव बुद्धि. यदा यस्मिन् काले स्थास्यति स्थिरीभूता भविष्यति निश्चला विक्षेपचलनवर्जिता सती समाधौ, समाधीयते चित्तमस्मिन्निति समाधिः आत्मा, तस्मिन् आत्मनि इत्येतत् । अचला तत्रापि विकल्पवर्जिता

इत्येतत् । बुद्धिः अन्तःकरणम् । तदा तस्मिन्काले योगम् अवाप्स्यसि विवेकप्रज्ञां समाधि प्राप्स्यसि ॥

प्रश्नबीजं प्रतिलभ्य अर्जुन उवाच लब्धसमाधिप्रज्ञस्य लक्षणबुभुत्सया—

अर्जुन उवाच—

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥

स्थिता प्रतिष्ठिता 'अहमस्मि परं ब्रह्म' इति प्रज्ञा यस्य स. स्थितप्रज्ञः तस्य स्थितप्रज्ञस्य का भाषा किं भाषणं वचनं कथमसौ परैर्भाष्यते समाधिस्थस्य समाधौ स्थितस्य हे केशव । स्थितधीः स्थितप्रज्ञः स्वयं वा किं प्रभाषेत । किम् आसीत व्रजेत किम् आसनं व्रजनं वा तस्य कथमित्यर्थः । स्थितप्रज्ञस्य लक्षणमनेन श्लोकेन पृच्छथते ॥

यो ह्यादित एव संन्यस्य कर्माणि ज्ञानयोगनिष्ठायां प्रवृत्त, यश्च कर्मयोगेन, तयोः 'प्रजहाति' इत्यारभ्य आ अध्यायपरिसमाप्तेः स्थितप्रज्ञलक्षणं साधनं चोपदिश्यते । सर्वत्रैव हि अध्यात्मशास्त्रे कृतार्थलक्षणानि यानि तान्येव साधनानि उपदिश्यन्ते, यत्नसाध्यत्वात् । यानि यत्नसाध्यानि साध-

नानि लक्षणानि च भवन्ति तानि श्रीभगवानुवाच—

श्रीभगवानुवाच—

प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥

प्रजहाति प्रकर्षेण जहाति परित्यजति यदा यस्मिन्काले सर्वान् समस्तान् कामान् इच्छाभेदान् हे पार्थ, मनोगतान् मनसि प्रविष्टान् हृदि प्रविष्टान् । सर्वकामपरित्यागे तुष्टिकारणाभावात् शरीरधारणनिमित्तशेषे च सति उन्मत्तप्रमत्तस्येव प्रवृत्ति प्राप्ता, इत्यत उच्यते—आत्मन्येव प्रत्यगात्मस्वरूपे एव आत्मना स्वेनैव बाह्यलाभनिरपेक्षः तुष्ट परमार्थदर्शनामृतरसलाभेन अन्यस्मादलंप्रत्ययवान् स्थितप्रज्ञः स्थिता प्रतिष्ठिता आत्मानात्मविवेकजा प्रज्ञा यस्य स. स्थितप्रज्ञः विद्वान् तदा उच्यते । त्यक्तपुत्रवित्तलोकैषणः संन्यासी आत्माराम आत्मक्रीडः स्थितप्रज्ञ इत्यर्थः ॥

किच—

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ५६ ॥

दुःखेषु आध्यात्मिकादिषु प्राप्तेषु न उद्विग्नं न प्रक्षुभितं

दुःखप्राप्तौ मनो यस्य सोऽयम् अनुद्विग्नमनाः । तथा सुखेषु प्राप्तेषु विगता स्पृहा तृष्णा यस्य, न अग्निरिव इन्धनाद्याधाने सुखान्यनु विवर्धते स विगतस्पृहः । वीतरागभयक्रोधः. रागश्च भय च क्रोधश्च वीता विगता यस्मात् स वीतरागभयक्रोधः । स्थितधी स्थितप्रज्ञो मुनि. संन्यासी तदा उच्यते ॥

किच—

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥

यः मुनिः सर्वत्र देहजीवितादिष्वपि अनभिस्नेहः अभिस्नेहवर्जितः तत्तत् प्राप्य शुभाशुभं तत्तत् शुभं अशुभं वा लब्ध्वा न अभिनन्दति न द्वेष्टि शुभं प्राप्य न तुष्यति न हृष्यति, अशुभं च प्राप्य न द्वेष्टि इत्यर्थः । तस्य एवं हर्षविषादवर्जितस्य विवेकजा प्रज्ञा प्रतिष्ठिता भवति ॥

किच—

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥

यदा संहरते सम्यगुपसंहरते च अयं ज्ञाननिष्ठायां प्रवृत्तो

यतिः कूर्मः अङ्गानि इव यथा कूर्मः भयात् स्वान्यङ्गानि उपसंहरति सर्वशः सर्वतः, एवं ज्ञाननिष्ठः इन्द्रियाणि इन्द्रियार्थेभ्यः सर्वविषयेभ्यः उपसंहरते । तस्य प्रज्ञा प्रतिष्ठिता इत्युक्तार्थं वाक्यम् ॥

तत्र विषयाननाहरतः आतुरस्यापि इन्द्रियाणि कूर्माङ्गानीव संह्रियन्ते न तु तद्विषयो रागः स कथं संह्रियते इति उच्यते—

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ ५९ ॥

यद्यपि विषयाः विषयोपलक्षितानि विषयशब्दवाच्यानि इन्द्रियाणि निराहारस्य अनाह्रियमाणविषयस्य कष्टे तपसि स्थितस्य मूर्खस्यापि विनिवर्तन्ते देहिनो देहवतः रसवर्जं रसो रागो विषयेषु यः तं वर्जयित्वा । रसशब्दो रागे प्रसिद्धः, स्वरसेन प्रवृत्तः रसिकः रसज्ञः, इत्यादिदर्शनात् । सोऽपि रसो रञ्जनारूपः सूक्ष्मः अस्य यतेः परं परमार्थतत्त्वं ब्रह्म दृष्ट्वा उपलभ्य 'अहमेव तत्' इति वर्तमानस्य निवर्तते निर्बीज विषयविज्ञानं संपद्यते इत्यर्थः । न असति सम्यग्दर्शने रसस्य उच्छेदः । तस्मात् सम्यग्दर्शनात्मिकायाः प्रज्ञायाः स्थैर्यं कर्तव्यमित्यभिप्रायः ॥

सम्यग्दर्शनलक्षणप्रज्ञास्थैर्यं चिकीर्षता आदौ इन्द्रियाणि स्ववशे स्थापयितव्यानि, यस्मात्तदनवस्थापने दोषमाह—

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥

यततः प्रयत्नं कुर्वतः हि यस्मात् कौन्तेय पुरुषस्य विपश्चितः मेधाविनः अपि इति व्यवहितेन संबन्धः । इन्द्रियाणि प्रमाथीनि प्रमथनशीलानि विषयाभिमुखं हि पुरुषं विक्षोभयन्ति आकुलीकुर्वन्ति, आकुलीकृत्य च हरन्ति प्रसभं प्रसह्य प्रकाशमेव पश्यतो विवेकविज्ञानयुक्तं मनः ॥

यतः तस्मात्—

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥

तानि सर्वाणि संयम्य संयमनं वशीकरणं कृत्वा युक्तः समाहितः सन् आसीत मत्परः अहं वासुदेवः सर्वप्रत्यगात्मा परो यस्य सः मत्परः, 'न अन्योऽहं तस्मात्' इति आसीत इत्यर्थः । एवमासीनस्य यतेः वशे हि यस्य इन्द्रियाणि वर्तन्ते अभ्यासबलात् तस्य प्रज्ञा प्रतिष्ठिता ॥

अथेदानी पराभविष्यत. सर्वानर्थमूलमिदमुच्यते—

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते ॥

ध्यायतः चिन्तयत. विषयान् शब्दादीन् विषयविशेषान् आलोचयतः पुंस. पुरुषस्य सङ्गः आसक्तिः प्रीतिः तेषु विषयेषु उपजायते उत्पद्यते । सङ्गात् प्रीतेः संजायते समुत्पद्यते कामः तृष्णा । कामात् कुतश्चित् प्रतिहतात् क्रोधः अभिजायते ॥

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥

क्रोधात् भवति संमोहः अविवेकः कार्याकार्यविषयः । क्रुद्धो हि संमूढः सन् गुरुमप्याक्रोशति । संमोहात् स्मृति-विभ्रम. शास्त्राचार्योपदेशाहितसंस्कारजनितायाः स्मृतेः स्यात् विभ्रमो भ्रंशः स्मृत्युत्पत्तिनिमित्तप्राप्तौ अनुत्पत्ति. । ततः स्मृतिभ्रंशात् बुद्धिनाश बुद्धेर्नाशः । कार्याकार्यविषयविवेका-योग्यता अन्तःकरणस्य बुद्धेर्नाश उच्यते । बुद्धिनाशात् प्रणश्यति । तावदेव हि पुरुषः यावदन्तःकरणं तदीयं

कार्याकार्यविषयविवेकयोग्यम् । तदयोग्यत्वे नष्ट एव पुरुषो भवति । अत तस्यान्त.करणस्य बुद्धेर्नाशात् प्रणश्यति पुरुषार्थायोग्यो भवतीत्यर्थः ॥

सर्वानर्थस्य मूलमुक्त विषयाभिध्यानम् । अथ इदानीं मोक्षकारणमिदमुच्यते—

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥

रागद्वेषवियुक्तै रागश्च द्वेषश्च रागद्वेषौ, तत्पुरःसरा हि इन्द्रियाणां प्रवृत्तिः स्वाभाविकी, तत्र यो मुमुक्षुः भवति सः ताभ्यां वियुक्तै· श्रोत्रादिभिः इन्द्रियैः विषयान् अवर्जनीयान् चरन् उपलभमान आत्मवश्यै. आत्मन वश्यानि वशीभूतानि इन्द्रियाणि तै. आत्मवश्यैः विधेयात्मा इच्छात विधेयः आत्मा अन्तःकरणं यस्य सः अयं प्रसादम् अधिगच्छति । प्रसादः प्रसन्नता स्वास्थ्यम् ॥

प्रसादे सति कि स्यात् इत्युच्यते—

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५ ॥

प्रसादे सर्वदुःखानाम् आध्यात्मिकादीनां हानिः विनाशः अस्य यतेः उपजायते । किंच— प्रसन्नचेतसः स्वस्थान्तःकरणस्य हि यस्मात् आशु शीघ्रं बुद्धिः पर्यवतिष्ठते आकाशमिव परि समन्तात् अवतिष्ठते, आत्मस्वरूपेणैव निश्चलीभवतीत्यर्थः ॥

एवं प्रसन्नचेतसः अवस्थितबुद्धेः कृतकृत्यता यतः, तस्मात् रागद्वेषवियुक्तैः इन्द्रियैः शास्त्राविरुद्धेषु अवर्जनीयेषु युक्तः समाचरेत् इति वाक्यार्थः ॥

सेयं प्रसन्नता स्तूयते—

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥

नास्ति न विद्यते न भवतीत्यर्थः, बुद्धिः आत्मस्वरूपविषया अयुक्तस्य असमाहितान्तःकरणस्य । न च अस्ति अयुक्तस्य भावना आत्मज्ञानाभिनिवेशः । तथा— न च अस्ति अभावयतः आत्मज्ञानाभिनिवेशमकुर्वतः शान्तिः उपशमः । अशान्तस्य कुतः सुखम् ? इन्द्रियाणां हि विषयसेवातृष्णातः निवृत्तिर्या तत्सुखम्, न विषयविषया तृष्णा । दुःखमेव हि सा । न तृष्णायां सत्यां सुखस्य गन्धमात्रमप्युपपद्यते इत्यर्थः ॥

अयुक्तस्य कस्माद्बुद्धिर्नास्ति इत्युच्यते—

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ ६७ ॥

इन्द्रियाणां हि यस्मात् चरतां स्वस्वविषयेषु प्रवर्तमानानां यत् मनः अनुविधीयते अनुप्रवर्तते तत् इन्द्रियविषयविकल्पनेन प्रवृत्तं मनः अस्य यतेः हरति प्रज्ञाम् आत्मानात्मविवेकजां नाशयति । कथम् ? वायुः नावमिव अम्भसि उदके जिगमिषतां मार्गादुद्धृत्य उन्मार्गे यथा वायुः नावं प्रवर्तयति, एवमात्मविषयां प्रज्ञां हृत्वा मनो विषयविषयां करोति ॥

'यततो हि' इत्युपन्यस्तस्यार्थस्य अनेकधा उपपत्तिमुक्त्वा तं चार्थमुपपाद्य उपसंहरति—

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥

इन्द्रियाणां प्रवृत्तौ दोष उपपादितो यस्मात्, तस्मात् यस्य यतेः हे महाबाहो, निगृहीतानि सर्वशः सर्वप्रकारैः मानसादिभेदैः इन्द्रियाणि इन्द्रियार्थेभ्यः शब्दादिभ्यः तस्य प्रज्ञा प्रतिष्ठिता ॥

योऽयं लौकिको वैदिकश्च व्यवहार, स उत्पन्नविवेकज्ञानस्य स्थितप्रज्ञस्य अविद्याकार्यत्वात् अविद्यानिवृत्तौ निवर्तते, अविद्यायाश्च विद्याविरोधात् निवृत्तिः, इत्येतमर्थं स्फुटीकुर्वन् आह—

या निशा सर्वभूतानां
तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि
सा निशा पश्यतो मुनेः ॥ ६९ ॥

या निशा रात्रिः सर्वपदार्थानामविवेककरी तमःस्वभावत्वात् सर्वभूतानां सर्वेषां भूतानाम् । किं तत् परमार्थतत्त्व स्थितप्रज्ञस्य विषयः । यथा नक्तंचराणाम् अहरेव सदन्येषां निशा भवति, तद्वत् नक्तंचरस्थानीयानामज्ञाना सर्वभूतानां निशेव निशा परमार्थतत्त्वम्, अगोचरत्वादतद्बुद्धीनाम् । तस्यां परमार्थतत्त्वलक्षणायामज्ञाननिद्राया. प्रबुद्धो जागर्ति सयमी संयमवान्, जितेन्द्रियो योगीत्यर्थ. । यस्यां ग्राह्यग्राहकभेदलक्षणायामविद्यानिशायां प्रसुप्तान्येव भूतानि जाग्रति इति उच्यन्ते, यस्यां निशायां प्रसुप्ता इव स्वप्नदृशः, सा निशा अविद्यारूपत्वात् परमार्थतत्त्वं पश्यतो मुनेः ॥

अतः कर्माणि अविद्यावस्थायामेव चोद्यन्ते, न विद्यावस्थायाम् । विद्यायां हि सत्याम् उदिते सवितरि शार्वरमिव तमः प्रणाशमुपगच्छति अविद्या । प्राक् विद्योत्पत्तेः अविद्या प्रमाणबुद्ध्या गृह्यमाणा क्रियाकारकफलभेदरूपा सती सर्वकर्महेतुत्व प्रतिपद्यते । न अप्रमाणबुद्ध्या गृह्यमाणाया कर्महेतुत्वोपपत्ति, 'प्रमाणभूतेन वेदेन मम चोदितं कर्तव्यं कर्म' इति हि कर्मणि कर्ता प्रवर्तते, न 'अविद्यामात्रमिद सर्वं निशेव' इति । यस्य पुनः 'निशेव अविद्यामात्रमिदं सर्वं भेदजातम्' इति ज्ञानं तस्य आत्मज्ञस्य सर्वकर्मसंन्यासे एव अधिकारो न प्रवृत्तौ । तथा च दर्शयिष्यति—'तद्बुद्ध्यस्तदात्मान.' इत्यादिना ज्ञाननिष्ठायामेव तस्य अधिकारम् ॥

तत्रापि प्रवर्तकप्रमाणाभावे प्रवृत्त्यनुपपत्ति इति चेत्, न; स्वात्मविषयत्वादात्मविज्ञानस्य । न हि आत्मनः स्वात्मनि प्रवर्तकप्रमाणापेक्षता, आत्मत्वादेव । तदन्तत्वाच्च सर्वप्रमाणानां प्रमाणत्वस्य । न हि आत्मस्वरूपाधिगमे सति पुनः प्रमाणप्रमेयव्यवहारः संभवति । प्रमातृत्वं हि आत्मनः निवर्तयति अन्यं प्रमाणम्; निवर्तयदेव च अप्रमाणीभवति, स्वप्नकालप्रमाणमिव प्रबोधे । लोके च वस्त्वधिगमे प्रवृत्ति-

हेतुत्वादर्शनात् प्रमाणस्य । तस्मात् न आत्मविदः कर्मण्यधिकार इति सिद्धम् ॥

विदुष. त्यक्तैषणस्य स्थितप्रज्ञस्य यतेरेव मोक्षप्राप्तिः, न तु असंन्यासिनः कामकामिनः इत्येतमर्थं दृष्टान्तेन प्रतिपादयिष्यन् आह—

आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे
स शान्तिमाप्नोति न कामकामी ॥ ७० ॥

आपूर्यमाणम् अद्भि. अचलप्रतिष्ठम् अचलतया प्रतिष्ठा अवस्थितिः यस्य तम् अचलप्रतिष्ठं समुद्रम् आपः सर्वतो गता प्रविशन्ति स्वात्मस्थमविक्रियमेव सन्तं यद्वत्, तद्वत् कामा विषयसंनिधावपि सर्वतः इच्छाविशेषाः यं पुरुषम्— समुद्रमिव आपः— अविकुर्वन्तः प्रविशन्ति सर्वे आत्मन्येव प्रलीयन्ते न स्वात्मवशं कुर्वन्ति, स. शान्ति मोक्षम् आप्नोति, न इतरः कामकामी, काम्यन्त इति कामाः विषयाः तान् कामयितुं शीलं यस्य सः कामकामी, नैव प्राप्नोति इत्यर्थः ॥

यस्मादेवं तस्मात्—

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ।
निर्ममो निरहंकारः स शान्तिमधिगच्छति ॥

विहाय परित्यज्य कामान् यः संन्यासी पुमान् सर्वान् अशेषतः कात्स्न्र्येन चरति, जीवनमात्रचेष्टाशेषः पर्यटतीत्यर्थः । निःस्पृहः शरीरजीवनमात्रेऽपि निर्गता स्पृहा यस्य सः निःस्पृहः सन्, निर्ममः शरीरजीवनमात्राक्षिप्तपरिग्रहेऽपि ममेदम् इत्यभिनिवेशवर्जितः, निरहंकारः विद्यावत्त्वादिनिमित्तात्मसंभावनारहितः इत्येतत् । सः एवंभूतः स्थितप्रज्ञः ब्रह्मवित् शान्ति सर्वसंसारदुःखोपरमलक्षणां निर्वाणाख्याम् अधिगच्छति प्राप्नोति ब्रह्मभूतो भवति इत्यर्थः ॥

सैषा ज्ञाननिष्ठा स्तूयते—

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां
भीष्मपर्वणि श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे साङ्ख्ययोगो नाम
द्वितीयोऽध्यायः ॥

एषा यथोक्ता ब्राह्मी ब्रह्मणि भवा इयं स्थितिः सर्वं कर्म संन्यस्य ब्रह्मरूपेणैव अवस्थानम् इत्येतत्। हे पार्थ, न एनां स्थिति प्राप्य लब्ध्वा न विमुह्यति न मोहं प्राप्नोति। स्थित्वा अस्यां स्थितौ ब्राह्मथां यथोक्तायां अन्तकालेऽपि अन्त्ये वयस्यपि ब्रह्मनिर्वाणं ब्रह्मनिर्वृति मोक्षम् ऋच्छति गच्छति। किमु वक्तव्यं ब्रह्मचर्यादेव संन्यस्य यावज्जीवं यो ब्रह्मण्येव अवतिष्ठते स ब्रह्मनिर्वाणमृच्छति इति॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपाद-
शिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
द्वितीयोऽध्यायः॥



श्रीमच्छंकरभगवत्पादविरचितम्

श्रीमद्भगवद्गीताभाष्यम्

तृतीयोऽध्यायः

तृतीयोऽध्यायः ॥



स्त्रस्य प्रवृत्तिनिवृत्तिविषयभूते द्वे बुद्धी भगवता निर्दिष्टे, सांख्ये बुद्धि. योगे बुद्धिः इति च । तत्र 'प्रजहाति यदा कामान्' इत्यारभ्य आ अध्यायपरिसमाप्ते सांख्यबुद्ध्याश्रितानां संन्यासं कर्तव्यमुक्त्वा तेषां तन्निष्ठतयैव च कृतार्थता उक्ता—'एषा ब्राह्मी स्थितिः' इति । अर्जुनाय च 'कर्मण्येवाधिकारस्ते...मा ते सङ्गोऽस्त्वकर्मणि' इति कर्मैव कर्तव्यमुक्तवान् योगबुद्धिमाश्रित्य, न तत एव श्रेयःप्राप्तिम् उक्तवान् । तदेतदालक्ष्य पर्याकुलीकृतबुद्धिः अर्जुनः उवाच । कथं भक्ताय श्रेयोर्थिने यत् साक्षात् श्रेयःप्राप्तिसाधनं सांख्यबुद्धिनिष्ठां श्रावयित्वा मां कर्मणि दृष्टानेकानर्थयुक्ते पारंपर्येणापि अनैकान्तिकश्रेयःप्राप्तिफले नियुञ्ज्यात् इति युक्तः पर्याकुलीभावः अर्जुनस्य, तदनुरूपश्च प्रश्न 'ज्यायसी

चेत्' इत्यादिः, प्रश्नापाकरणवाक्यं च भगवतः युक्तं यथोक्तविभागविषये शास्त्रे ॥

केचित्तु— अर्जुनस्य प्रश्नार्थमन्यथा कल्पयित्वा तत्प्रतिकूलं भगवत प्रतिवचनं वर्णयन्ति, यथा च आत्मना संबन्धग्रन्थे गीतार्थो निरूपित तत्प्रतिकूलं च इह पुनः प्रश्नप्रतिवचनयोः अर्थं निरूपयन्ति । कथम्? तत्र संबन्धग्रन्थे तावत्— सर्वेषामाश्रमिणां ज्ञानकर्मणोः समुच्चयः गीताशास्त्रे निरूपितः अर्थ इत्युक्तम्, पुन. विशेषितं च यावज्जीवश्रुतिचोदितानि कर्माणि परित्यज्य केवलादेव ज्ञानात् मोक्षः प्राप्यते इत्येतत् एकान्तेनैव प्रतिषिद्धमिति । इह तु आश्रमविकल्प दर्शयता यावज्जीवश्रुतिचोदितानामेव कर्मणां परित्याग उक्त । तत् कथम् ईदृशं विरुद्धमर्थम् अर्जुनाय ब्रूयात् भगवान्, श्रोता वा कथं विरुद्धमर्थमवधारयेत् ॥

तत्रैतत् स्यात्—गृहस्थानामेव श्रौतकर्मपरित्यागेन केवलादेव ज्ञानात् मोक्ष प्रतिषिध्यते, न तु आश्रमान्तराणामिति । एतदपि पूर्वोत्तरविरुद्धमेव । कथम्? सर्वाश्रमिणां ज्ञानकर्मणोः समुच्चयो गीताशास्त्रे निश्चित अर्थ. इति प्रतिज्ञाय इह कथं तद्विरुद्धं केवलादेव ज्ञानात् मोक्षं ब्रूयात् आश्रमान्तराणाम् ॥

. अथ मत श्रौतकर्मापेक्षया एतद्वचनम् 'केवलादेव ज्ञानात् श्रौतकर्मरहितात् गृहस्थानां मोक्ष प्रतिषिध्यते' इति; तत्र गृहस्थानां विद्यमानमपि स्मार्तं कर्म अविद्यमानवत् उपेक्ष्य 'ज्ञानादेव केवलात्' इत्युच्यते इति। एतदपि विरुद्धम । कथम्? गृहस्थस्यैव स्मार्तकर्मणा समुच्चितात् ज्ञानात् मोक्ष प्रतिषिध्यते न तु आश्रमान्तराणामिति कथं विवेकिभि. शक्यमवधारयितुम्। किच—यदि मोक्षसाधनत्वेन स्मार्तानि कर्माणि ऊर्ध्वरेतसां समुच्चीयन्ते तथा गृहस्थस्यापि इष्यतां स्मार्तैरेव समुच्चयो न श्रौतै. ॥

अथ श्रौतैः स्मार्तैश्च गृहस्थस्यैव समुच्चयः मोक्षाय, ऊर्ध्वरेतसां तु स्मार्तकर्ममात्रसमुच्चितात् ज्ञानात् मोक्ष इति। तत्रैवं सति गृहस्थस्य आयासबाहुल्यात्, श्रौतं स्मार्तं च बहुदुःखरूप कर्म शिरसि आरोपितं स्यात् ॥

अथ गृहस्थस्यैव आयासबाहुल्यकारणात् मोक्षः स्यात्, न आश्रमान्तराणां श्रौतनित्यकर्मरहितत्वात् इति। तदप्यसत्, सर्वोपनिषत्सु इतिहासपुराणयोगशास्त्रेषु च ज्ञानाङ्गत्वेन मुमुक्षो. सर्वकर्मसन्यासविधानात्, आश्रमविकल्पसमुच्चयविधानाच्च श्रुतिस्मृत्यो ॥

सिद्धस्तर्हि सर्वाश्रमिणां ज्ञानकर्मणोः समुच्चयः— न, मुमुक्षो. सर्वकर्मसंन्यासविधानात् । 'पुत्रैषणाया वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति' 'तस्मात् न्यासमेषां तपसामतिरिक्तमाहुः' 'न्यास एवात्यरेचयत्' इति, 'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः' इति च । 'ब्रह्मचर्यादेव प्रव्रजेत्' इत्याद्याः श्रुतय. । 'त्यज धर्ममधर्मं च उभे सत्यानृते त्यज । उभे सत्यानृते त्यक्त्वा येन त्यजसि तत्त्यज । ससारमेव नि.सारं दृष्ट्वा सारदिदृक्षया । प्रव्रजन्त्यकृतोद्वाहा. परं वैराग्यमाश्रिताः' इति बृहस्पति. । 'कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते । तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः' इति शुकानुशासनम् । इहापि च 'सर्वकर्माणि मनसा संन्यस्य' इत्यादि ॥

मोक्षस्य च अकार्यत्वात् मुमुक्षोः कर्मानर्थक्यम् । नित्यानि प्रत्यवायपरिहारार्थानि इति चेत्, न; असंन्यासिविषयत्वात् प्रत्यवायप्राप्तेः । न हि अग्निकार्याद्यकरणात् संन्यासिनः प्रत्यवाय. कल्पयितुं शक्यः, यथा ब्रह्मचारिणामसंन्यासिनामपि कर्मिणाम् । न तावत् नित्यानां कर्मणामभावादेव भावरूपस्य प्रत्यवायस्य उत्पत्तिः कल्पयितुं शक्या, 'कथमसतः

सज्जायेत' इति असतः सज्जन्मासंभवश्रुतेः । यदि विहिताकरणात् असंभाव्यमपि प्रत्यवायं ब्रूयात् वेदः, तदा अनर्थकरः वेदः अप्रमाणमित्युक्तं स्यात्, विहितस्य करणाकरणयोः दुःखमात्रफलत्वात् । तथा च कारकं शास्त्रं न ज्ञापकम् इत्यनुपपन्नार्थं कल्पितं स्यात् । न चैतदिष्टम् । तस्मात् न संन्यासिनां कर्माणि । अतो ज्ञानकर्मणोः समुच्चयानुपपत्तिः; 'ज्यायसी चेत् कर्मणस्ते मता बुद्धि' इति अर्जुनस्य प्रश्नानुपपत्तेश्च ॥

यदि हि भगवता द्वितीयेऽध्याये ज्ञानं कर्म च समुच्चित्य त्वया अनुष्ठेयम् इत्युक्तं स्यात्, ततः अर्जुनस्य प्रश्नः अनुपपन्नः 'ज्यायसी चेत्कर्मणस्ते मता बुद्धिः' इति । अर्जुनाय चेत् बुद्धिकर्मणी त्वया अनुष्ठेये इत्युक्ते, या कर्मणो ज्यायसी बुद्धिः सापि उक्तैव इति 'तत् किं कर्मणि घोरे मां नियोजयसि केशव' इति उपालम्भः प्रश्नो वा न कथंचन उपपद्यते । न च अर्जुनस्यैव ज्यायसी बुद्धिः न अनुष्ठेया इति भगवता उक्त पूर्वम् इति कल्पयितुं युक्तम्, येन 'ज्यायसी चेत्' इति विवेकतः प्रश्नः स्यात् ॥

यदि पुनः एकस्य पुरुषस्य ज्ञानकर्मणोर्विरोधात् युगपदनुष्ठानं न संभवतीति भिन्नपुरुषानुष्ठेयत्वं भगवता पूर्वमुक्तं

स्यात्, ततोऽयं प्रश्न उपपन्न 'ज्यायसी चेत्' इत्यादिः। अविवेकत. प्रश्नकल्पनायामपि भिन्नपुरुषानुष्ठेयत्वेन ज्ञानकर्मनिष्ठयोः भगवतः प्रतिवचन नोपपद्यते। न च अज्ञाननिमित्तं भगवत्प्रतिवचनं कल्पनीयम्। अस्माच्च भिन्नपुरुषानुष्ठेयत्वेन ज्ञानकर्मनिष्ठयोः भगवतः प्रतिवचनदर्शनात् ज्ञानकर्मणोः समुच्चयानुपपत्तिः। तस्मात् केवलादेव ज्ञानात् मोक्ष इत्येषोऽर्थो निश्चितो गीतासु सर्वोपनिषत्सु च॥

ज्ञानकर्मणो· 'एक वद निश्चित्य' इति च एकविषयैव प्रार्थना अनुपपन्ना, उभयो समुच्चयसभवे। 'कुरु कर्मैव तस्मात्त्वम्' इति च ज्ञाननिष्ठासंभवम् अर्जुनस्य अवधारणेन दर्शयिष्यति॥

अर्जुन उवाच—

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन।
तत्किं कर्मणि घोरे मां नियोजयसि केशव॥१॥

ज्यायसी श्रेयसी चेत् यदि कर्मण. सकाशात् ते तव मता अभिप्रेता बुद्धिः ज्ञानं हे जनार्दन। यदि बुद्धिकर्मणी समुच्चिते इष्टे तदा एकं श्रेयःसाधनमिति कर्मणो ज्यायसी बुद्धिः इति कर्मणः अतिरिक्तकरणं बुद्धेरनुपपन्नम्

अर्जुनेन कृतं स्यात्, न हि तदेव तस्मात् फलतोऽतिरिक्तं स्यात् । तथा च, कर्मणः श्रेयस्करी भगवतोक्ता बुद्धिः, अश्रेयस्करं च कर्म कुर्विति मां प्रतिपादयति, तत् किं नु कारणमिति भगवत उपालम्भमिव कुर्वन् तत् किं कस्मात् कर्मणि घोरे क्रूरे हिंसालक्षणे मां नियोजयसि केशव इति च यदाह, तच्च नोपपद्यते । अथ स्मार्तेनैव कर्मणा समुच्चयः सर्वेषां भगवता उक्तः अर्जुनेन च अवधारितश्चेत्, 'तत्किं कर्मणि घोरे मां नियोजयसि' इत्यादि कथं युक्तं वचनम् ॥

किंच—

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥२॥

व्यामिश्रेणेव, यद्यपि विविक्ताभिधायी भगवान्, तथापि मम मन्दबुद्धेः व्यामिश्रमिव भगवद्वाक्यं प्रतिभाति । तेन मम बुद्धिं मोहयसि इव, मम बुद्धिव्यामोहापनयाय हि प्रवृत्तः त्वं तु कथं मोहयसि ? अतः ब्रवीमि बुद्धिं मोहयसि इव मे मम इति । त्वं तु भिन्नकर्तृकयोः ज्ञानकर्मणोः एकपुरुषानुष्ठानासंभवं यदि मन्यसे, तत्रैवं सति तत् तयोः एकं बुद्धिं कर्म वा इदमेव अर्जुनस्य योग्यं बुद्धिशक्त्यवस्थानुरूपमिति निश्चित्य वद ब्रूहि, येन ज्ञानेन कर्मणा वा

अन्यतरेण श्रेयः अहम् आप्नुयां प्राप्नुयाम्, इति यदुक्तं तदपि नोपपद्यते ॥

यदि हि कर्मनिष्ठायां गुणभूतमपि ज्ञानं भगवता उक्तं स्यात्, तत् कथं तयोः 'एकं वद' इति एकविषयैव अर्जुनस्य शुश्रूषा स्यात्। न हि भगवता पूर्वमुक्तम् 'अन्यतरदेव ज्ञानकर्मणोः वक्ष्यामि, नैव द्वयम्' इति, येन उभयप्राप्त्यसंभवम् आत्मनो मन्यमानः एकमेव प्रार्थयेत् ॥

प्रश्नानुरूपमेव प्रतिवचनं श्रीभगवानुवाच—

श्रीभगवानुवाच—

लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ॥

लोके अस्मिन् शास्त्रार्थानुष्ठानाधिकृतानां त्रैवर्णिकानां द्विविधा द्विप्रकारा निष्ठा स्थितिः अनुष्ठेयतात्पर्यं पुरा पूर्वं सर्गादौ प्रजाः सृष्ट्वा तासाम् अभ्युदयनिःश्रेयसप्राप्तिसाधनं वेदार्थसंप्रदायमाविष्कुर्वता प्रोक्ता मया सर्वज्ञेन ईश्वरेण हे अनघ अपाप। तत्र का सा द्विविधा निष्ठा इत्याह— तत्र ज्ञानयोगेन ज्ञानमेव योगः तेन सांख्यानाम् अत्मानात्मविषयविवेकविज्ञानवतां ब्रह्मचर्याश्रमादेव कृतसंन्यासानां वेदान्त-

विज्ञानसुनिश्चितार्थानां परमहंसपरिव्राजकानां ब्रह्मण्येव अवस्थितानां निष्ठा प्रोक्ता । कर्मयोगेन कर्मैव योगः कर्मयोगः तेन कर्मयोगेन योगिनां कर्मिणां निष्ठा प्रोक्ता इत्यर्थः । यदि च एकेन पुरुषेण एकस्मै पुरुषार्थाय ज्ञानं कर्म च समुच्चित्य अनुष्ठेयं भगवता इष्टम् उक्तं वक्ष्यमाणं वा गीतासु वेदेषु चोक्तम्, कथमिह अर्जुनाय उपसन्नाय प्रियाय विशिष्टभिन्नपुरुषकर्तृके एव ज्ञानकर्मनिष्ठे ब्रूयात्? यदि पुनः 'अर्जुनः ज्ञानं कर्म च द्वयं श्रुत्वा स्वयमेवानुष्ठास्यति अन्येषां तु भिन्नपुरुषानुष्ठेयतां वक्ष्यामि इति' मतं भगवतः कल्प्येत, तदा रागद्वेषवान् अप्रमाणभूतो भगवान् कल्पितः स्यात् । तच्चायुक्तम् । तस्मात् कयापि युक्त्या न समुच्चयो ज्ञानकर्मणोः ॥

यत् अर्जुनेन उक्तं कर्मणो ज्यायस्त्वं बुद्धेः, तच्च स्थितम्, अनिराकरणात् । तस्याश्च ज्ञाननिष्ठायाः संन्यासिनामेवानुष्ठेयत्वम्, भिन्नपुरुषानुष्ठेयत्ववचनात् । भगवतः एवमेव अनुमतमिति गम्यते ॥

'मां च बन्धकारणे कर्मण्येव नियोजयसि' इति विषण्णमनसमर्जुनम् 'कर्म नारभे' इत्येवं मन्वानमालक्ष्य आह भगवान्— न कर्मणामनारम्भात् इति । अथवा— ज्ञानकर्म-

निष्ठयोः परस्परविरोधात् एकेन पुरुषेण युगपत् अनुष्ठातुमशक्यत्वे सति इतरेतरानपेक्षयोरेव पुरुषार्थहेतुत्वे प्राप्ते कर्मनिष्ठाया ज्ञाननिष्ठाप्राप्तिहेतुत्वेन पुरुषार्थहेतुत्वम्, न स्वातन्त्र्येण, ज्ञाननिष्ठा तु कर्मनिष्ठोपायलब्धात्मिका सती स्वातन्त्र्येण पुरुषार्थहेतुः अन्यानपेक्षा, इत्येतमर्थं प्रदर्शयिष्यन् आह भगवान्—

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥

न कर्मणां क्रियाणां यज्ञादीनाम् इह जन्मनि जन्मान्तरे वा अनुष्ठितानाम् उपात्तदुरितक्षयहेतुत्वेन सत्त्वशुद्धिकारणानां तत्कारणत्वेन च ज्ञानोत्पत्तिद्वारेण ज्ञाननिष्ठाहेतूनाम्, 'ज्ञानमुत्पद्यते पुसां क्षयात्पापस्य कर्मणः । यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि ' इत्यादिस्मरणात्, अनारम्भात् अननुष्ठानात् नैष्कर्म्यं निष्कर्मभावं कर्मशून्यतां ज्ञानयोगेन निष्ठां निष्क्रियात्मस्वरूपेणैव अवस्थानमिति यावत् । पुरुषः न अश्नुते न प्राप्नोतीत्यर्थः ॥

कर्मणामनारम्भान्नैष्कर्म्यं नाश्नुते इति वचनात् तद्विपर्ययात् तेषामारम्भात् नैष्कर्म्यमश्नुते इति गम्यते । कस्मात् पुनः कारणात् कर्मणामनारम्भान्नैष्कर्म्यं नाश्नुते इति ?

उच्यते, कर्मारम्भस्यैव नैष्कर्म्योपायत्वात् । न ह्युपायमन्तरेण उपेयप्राप्तिरस्ति । कर्मयोगोपायत्वं च नैष्कर्म्यलक्षणस्य ज्ञानयोगस्य, श्रुतौ इह च, प्रतिपादनात् । श्रुतौ तावत् प्रकृतस्य आत्मलोकस्य वेद्यस्य वेदनोपायत्वेन 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन' इत्यादिना कर्मयोगस्य ज्ञानयोगोपायत्वं प्रतिपादितम् । इहापि च— 'संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः' 'योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये' 'यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्' इत्यादि प्रतिपादयिष्यति ॥

ननु च 'अभयं सर्वभूतेभ्यो दत्त्वा नैष्कर्म्यमाचरेत्' इत्यादौ कर्तव्यकर्मसंन्यासादपि नैष्कर्म्यप्राप्तिं दर्शयति । लोके च कर्मणामनारम्भान्नैष्कर्म्यमिति प्रसिद्धतरम् । अतश्च नैष्कर्म्यार्थिनः किं कर्मारम्भेण ? इति प्राप्तम् । अत आह— न च संन्यसनादेवेति । नापि संन्यसनादेव केवलात् कर्मपरित्यागमात्रादेव ज्ञानरहितात् सिद्धिं नैष्कर्म्यलक्षणां ज्ञानयोगेन निष्ठां समधिगच्छति न प्राप्नोति ॥

कस्मात् पुनः कारणात् कर्मसंन्यासमात्रादेव केवलात् ज्ञानरहितात् सिद्धिं नैष्कर्म्यलक्षणां पुरुषो नाधिगच्छति इति हेत्वाकाङ्क्षायामाह—

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ५ ॥

न हि यस्मात् क्षणमपि कालं जातु कदाचिन् कश्चित् तिष्ठति अकर्मकृत् सन् । कस्मात्? कार्यते प्रवर्त्यते हि यस्मात् अवश एव अस्वतन्त्र एव कर्म सर्वः प्राणी प्रकृतिजैः प्रकृतितो जातैः सत्त्वरजस्तमोभिः गुणैः । अज्ञ इति वाक्यशेषः, यतो वक्ष्यति 'गुणैर्यो न विचाल्यते' इति । सांख्यानां पृथक्करणात् अज्ञानामेव हि कर्मयोगः, न ज्ञानिनाम् । ज्ञानिनां तु गुणैरचाल्यमानानां स्वतश्चलनाभावात् कर्मयोगो नोपपद्यते । तथा च व्याख्यातम् 'वेदाविनाशिनम्' इत्यत्र ॥

यत्त्वनात्मज्ञ. चोदित कर्म नारभते इति तदसदेवेत्याह—

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥

कर्मेन्द्रियाणि हस्तादीनि संयम्य संहृत्य यः आस्ते तिष्ठति मनसा स्मरन् चिन्तयन् इन्द्रियार्थान् विषयान् विमूढात्मा विमूढान्त.करणः मिथ्याचारो मृषाचार पापाचारः स उच्यते ॥

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥ ६ ॥

यस्तु पुन. कर्मण्यधिकृतः अज्ञः बुद्धीन्द्रियाणि मनसा नियम्य आरभते अर्जुन कर्मेन्द्रियै. वाक्पाण्यादिभिः । किमारभते इत्याह— कर्मयोगम् असक्तः सन् फलाभिसंधिवर्जितः सः विशिष्यते इतरस्मात् मिथ्याचारात् ॥

यतः एवम् अतः—

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिध्येदकर्मणः ॥ ८ ॥

नियतं नित्यं शास्त्रोपदिष्टम्, यो यस्मिन् कर्मणि अधिकृतः फलाय च श्रुतं तत् नियतं कर्म, तत् कुरु त्वं हे अर्जुन, यत. कर्म ज्यायः अधिकतरं फलतः, हि यस्मात् अकर्मणः अकरणात् अनारम्भात् । कथम्? शरीरयात्रा शरीरस्थितिः अपि च ते तव न प्रसिध्येत् प्रसिद्धि न गच्छेत् अकर्मणः अकरणात् । अतः दृष्ट. कर्माकर्मणोर्विशेषो लोके ॥

यच्च मन्यसे बन्धार्थत्वात् कर्म न कर्तव्यमिति तदप्यसत् । कथम्—

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥ ९ ॥

'यज्ञो वै विष्णुः' इति श्रुतेः यज्ञः ईश्वरः, तदर्थं यत् क्रियते तत् यज्ञार्थं कर्म । तस्मात् कर्मणः अन्यत्र अन्येन कर्मणा लोकः अयम् अधिकृतः कर्मकृत् कर्मबन्धनः कर्म बन्धनं यस्य सोऽयं कर्मबन्धनः लोकः, न तु यज्ञार्थात् । अतः तदर्थं यज्ञार्थं कर्म कौन्तेय, मुक्तसङ्गः कर्मफलसङ्ग-वर्जितः सन् समाचर निर्वर्तय ॥

इतश्च अधिकृतेन कर्म कर्तव्यम्—

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥

सहयज्ञाः यज्ञसहिताः प्रजाः त्रयो वर्णाः ताः सृष्ट्वा उत्पाद्य पुरा पूर्वं सर्गादौ उवाच उक्तवान् प्रजापतिः प्रजानां स्रष्टा अनेन यज्ञेन प्रसविष्यध्वं प्रसवः वृद्धिः उत्पत्तिः तं कुरुध्वम् । एष यज्ञः वः युष्माकम् अस्तु भवतु इष्टकामधुक् इष्टान् अभिप्रेतान् कामान् फलविशेषान् दोग्धीति इष्ट-कामधुक् ॥

कथम्—

देवान्भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ ११ ॥

देवान् इन्द्रादीन् भावयत वर्धयत अनेन यज्ञेन । ते देवा भावयन्तु आप्याययन्तु वृष्ट्यादिना वः युष्मान् । एवं परस्परम् अन्योन्यं भावयन्तः श्रेयः परं मोक्षलक्षणं ज्ञानप्राप्तिक्रमेण अवाप्स्यथ । स्वर्गं वा परं श्रेयः अवाप्स्यथ ॥

किंच—

इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥१२॥

इष्टान् अभिप्रेतान् भोगान् हि वः युष्मभ्यं देवाः दास्यन्ते वितरिष्यन्ति स्त्रीपशुपुत्रादीन् यज्ञभाविताः यज्ञैः वर्धिताः तोषिताः इत्यर्थः । तैः देवैः दत्तान् भोगान् अप्रदाय अदत्त्वा, आनृण्यमकृत्वा इत्यर्थः, एभ्यः देवेभ्यः, यः भुङ्क्ते स्वदेहेन्द्रियाण्येव तर्पयति स्तेन एव तस्कर एव सः देवाद्रिस्वापहारी ॥

ये पुनः—

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥

देवयज्ञादीन् निर्वर्त्य तच्छिष्टम् अशनम् अमृताख्यम् अशितु शीलं येषां ते यज्ञशिष्टाशिनः सन्तः मुच्यन्ते सर्वकिल्बिषै. सर्वपापै. चुल्ल्यादिपञ्चसूनाकृतैः प्रमादकृतहिंसादिजनितैश्च अन्यैः । ये तु आत्मंभरयः, भुञ्जते ते तु अघं पापं स्वयमपि पापाः—ये पचन्ति पाकं निर्वर्तयन्ति आत्मकारणात् आत्महेतोः ॥

इतश्च अधिकृतेन कर्म कर्तव्यम् जगच्चक्रप्रवृत्तिहेतुर्हि कर्म । कथमिति उच्यते—

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥ १४ ॥

अन्नात् भुक्तात् लोहितरेतःपरिणतात् प्रत्यक्षं भवन्ति जायन्ते भूतानि । पर्जन्यात् वृष्टे. अन्नस्य संभवः अन्नसंभवः । यज्ञात् भवति पर्जन्यः, 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' इति स्मृतेः । यज्ञः अपूर्वम् । स च यज्ञः कर्मसमुद्भवः

ऋत्विग्यजमानयोश्च व्यापारः कर्म, तत् समुद्भव यस्य यज्ञस्य अपूर्वस्य स यज्ञ. कर्मसमुद्भव ॥

तच्चैवंविधं कर्म कुतो जातमित्याह—

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥

कर्म ब्रह्मोद्भवं ब्रह्म वेदः सः उद्भवः कारणं प्रकाशको यस्य तत् कर्म ब्रह्मोद्भवं विद्धि विजानीहि । ब्रह्म पुन. वेदाख्यम् अक्षरसमुद्भवम् अक्षरं ब्रह्म परमात्मा समुद्भवो यस्य तत् अक्षरसमुद्भवम् । ब्रह्म वेद इत्यर्थः । यस्मात् साक्षात् परमात्माख्यात् अक्षरात् पुरुषनिःश्वासवत् समुद्भूतं ब्रह्म तस्मात् सर्वार्थप्रकाशकत्वात् सर्वगतम्, सर्वगतमपि सत् नित्यं सदा यज्ञविधिप्रधानत्वात् यज्ञे प्रतिष्ठितम् ॥

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥

एवम् इत्थम् ईश्वरेण वेदयज्ञपूर्वकं जगच्चक्रं प्रवर्तितं न अनुवर्तयति इह लोके यः कर्मणि अधिकृत. सन् अघायुः अघं पापम् आयुः जीवनं यस्य सः अघायुः, पापजीवनः

इति यावत् । इन्द्रियारामः इन्द्रियैः आरामः आरमणम् आक्रीडा विषयेषु यस्य स. इन्द्रियारामः मोघं वृथा हे पार्थ, स जीवति ॥

तस्मात् अज्ञेन अधिकृतेन कर्तव्यमेव कर्मेति प्रकरणार्थः । प्राक् आत्मज्ञाननिष्ठायोग्यताप्राप्तेः तादर्थ्येन कर्मयोगानुष्ठानम् अधिकृतेन अनात्मज्ञेन कर्तव्यमेवेत्येतत् 'न कर्मणामनारम्भात्' इत्यत आरभ्य 'शरीरयात्रापि च ते न प्रसिध्येदकर्मणः' इत्येवमन्तेन प्रतिपाद्य, 'यज्ञार्थात् कर्मणोऽन्यत्र' इत्यादिना 'मोघं पार्थ स जीवति' इत्येवमन्तेनापि ग्रन्थेन प्रासङ्गिकम् अधिकृतस्य अनात्मविदः कर्मानुष्ठाने बहु कारणमुक्तम् । तदकरणे च दोषसकीर्तनं कृतम् ॥

एवं स्थिते किमेवं प्रवर्तितं चक्रं सर्वेणानुवर्तनीयम्, आहोस्वित् पूर्वोक्तकर्मयोगानुष्ठानोपायप्राप्याम् अनात्मविदः ज्ञानयोगेनैव निष्ठाम् आत्मविद्भिः सांख्यैः अनुष्ठेयामप्राप्तेनैव, इत्येवमर्थम् अर्जुनस्य प्रश्नमाशङ्क्य स्वयमेव वा शास्त्रार्थस्य विवेकप्रतिपत्त्यर्थम् 'एतं वै तमात्मानं विदित्वा निवृत्तमिथ्याज्ञानाः सन्तः ब्राह्मणाः मिथ्याज्ञानवद्भिः अवश्यं कर्तव्येभ्यः पुत्रैषणादिभ्यो व्युत्थायाथ भिक्षाचर्यं शरीरस्थितिमात्रप्रयुक्तं चरन्ति न तेषामात्मज्ञाननिष्ठाव्यतिरेकेण अन्यत्

कार्यमस्ति' इत्येवं श्रुत्यर्थमिह गीताशास्त्रे प्रतिपिपादयिषितमाविष्कुर्वन् आह भगवान्—

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥

यस्तु सांख्यः आत्मज्ञाननिष्ठः आत्मरतिः आत्मन्येव रतिः न विषयेषु यस्य सः आत्मरतिरेव स्यात् भवेत् आत्मतृप्तश्च आत्मनैव तृप्तः न अन्नरसादिना सः मानवः मनुष्यः संन्यासी आत्मन्येव च संतुष्टः । संतोषो हि बाह्यार्थलाभे सर्वस्य भवति, तमनपेक्ष्य आत्मन्येव च संतुष्ट सर्वतो वीततृष्ण इत्येतत् । य. ईदृशः आत्मवित् तस्य कार्यं करणीयं न विद्यते नास्ति इत्यर्थः ॥

किंच—

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ १८ ॥

नैव तस्य परमात्मरतेः कृतेन कर्मणा अर्थः प्रयोजनमस्ति । अस्तु तर्हि अकृतेन अकरणेन प्रत्यवायाख्य अनर्थः, न अकृतेन इह लोके कश्चन कश्चिदपि प्रत्यवायप्राप्तिरूपः आत्महानिलक्षणो वा नैव अस्ति । न च अस्य सर्वभूतेषु

ब्रह्मादिस्थावरान्तेषु भूतेषु कश्चित् अर्थव्यपाश्रयः प्रयोजननिमित्तक्रियासाध्य. व्यपाश्रयः व्यपाश्रयणम् आलम्बनं कंचिन् भूतविशेषमाश्रित्य न साध्यः कश्चिदर्थः अस्ति, येन तदर्थो क्रिया अनुष्ठेया स्यात्। न त्वम् एतस्मिन् सर्वतःसंप्लुतोदकस्थानीये सम्यग्दर्शने वर्तसे ॥

यतः एवम्—

तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥ १९ ॥

तस्मात् असक्तः सङ्गवर्जितः सततं सर्वदा कार्यं कर्तव्यं नित्यं कर्म समाचर निर्वर्तय । असक्तो हि यस्मात् समाचरन् ईश्वरार्थं कर्म कुर्वन् परं मोक्षम् आप्नोति पूरुषः सत्त्वशुद्धिद्वारेण इत्यर्थः ॥

यस्माच्च—

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥ २० ॥

कर्मणैव हि यस्मात् पूर्वे क्षत्रियाः विद्वांसः संसिद्धि मोक्षं गन्तुम् आस्थिताः प्रवृत्ताः । के ? जनकादयः जनका-

श्वपतिप्रभृतयः । यदि ते प्राप्तसम्यग्दर्शना., ततः लोकसंग्रहार्थं प्रारब्धकर्मत्वात् कर्मणा सहैव असंन्यस्यैव कर्म संसिद्धिमास्थिता इत्यर्थः । अथ अप्राप्तसम्यग्दर्शना जनकादय', तदा कर्मणा सत्त्वशुद्धिसाधनभूतेन क्रमेण संसिद्धिमास्थिता इति व्याख्येय श्लोक । अथ मन्यसे पूर्वैरपि जनकादिभि अजानद्भिरेव कर्तव्यं कर्म कृतम्, तावता नावश्यमन्येन कर्तव्य सम्यग्दर्शनवता कृतार्थेनेति; तथापि प्रारब्धकर्मायत्तः त्वं लोकसंग्रहम् एव अपि लोकस्य उन्मार्गप्रवृत्तिनिवारणं लोकसंग्रह., तमेवापि प्रयोजनं संपश्यन् कर्तुम् अर्हसि ॥

लोकसंग्रहः किमर्थं कर्तव्य इत्युच्यते—

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ २१ ॥

यद्यत् कर्म आचरति करोति श्रेष्ठः प्रधानः तत्तदेव कर्म आचरति इतरः अन्यः जन. तदनुगतः । किच सः श्रेष्ठः यत् प्रमाणं कुरुते लौकिकं वैदिकं वा लोकः तत् अनुवर्तते तदेव प्रमाणीकरोति इत्यर्थः ॥

यदि अत्र ते लोकसंग्रहकर्तव्यतायां विप्रतिपत्तिः तर्हि मां कि न पश्यसि?—

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥ २२ ॥

न मे मम पार्थ न अस्ति न विद्यते कर्तव्यं त्रिषु अपि लोकेषु किंचन किंचिदपि । कस्मात्? न अनवाप्तम् अप्राप्तम् अवाप्तव्यं प्रापणीयम्, तथापि वर्ते एव च कर्मणि अहम् ॥

यदि ह्यहं न वर्तेय जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥२३॥

यदि हि पुनः अहं न वर्तेय जातु कदाचित् कर्मणि अतन्द्रित अनलस. सन् मम श्रेष्ठस्य सतः वर्त्म मार्गम् अनुवर्तन्ते मनुष्या हे पार्थ, सर्वशः सर्वप्रकारैः ॥

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।
संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥

उत्सीदेयुः विनश्येयु. इमे सर्वे लोकाः लोकस्थितिनिमित्तस्य कर्मणः अभावात् न कुर्यां कर्म चेत् अहम् । किंच, संकरस्य च कर्ता स्याम् । तेन कारणेन उपहन्याम् इमा. प्रजा । प्रजानामनुग्रहाय प्रवृत्त. उपहतिम् उपहननं कुर्याम् इत्यर्थः । मम ईश्वरस्य अननुरूपमापद्येत ॥

यदि पुनः अहमिव त्वं कृतार्थबुद्धिः, आत्मवित् अन्यो वा, तस्यापि आत्मन. कर्तव्याभावेऽपि परानुग्रह एव कर्तव्य इत्याह—

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥२५॥

सक्ताः कर्मणि 'अस्य कर्मणः फलं मम भविष्यति' इति केचित् अविद्वांसः यथा कुर्वन्ति भारत, कुर्यात् विद्वान् आत्मवित् तथा असक्त. सन् । तद्वत् किमर्थं करोति ? तत् शृणु— चिकीर्षुः कर्तुमिच्छु. लोकसंग्रहम् ॥

एव लोकसंग्रहं चिकीर्षोः न मम आत्मविद. कर्तव्यमस्ति अन्यस्य वा लोकसंग्रहं मुक्त्वा । तत तस्य आत्मविदः इदमुपदिश्यते—

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ॥

बुद्धेर्भेदः बुद्धिभेदः 'मया इद कर्तव्यं भोक्तव्यं चास्य कर्मणः फलम्' इति निश्चयरूपाया बुद्धेः भेदनं चालनं बुद्धिभेदः तं न जनयेत् न उत्पादयेत् अज्ञानाम् अविवेकिनां

कर्मसङ्गिनां कर्मणि आसक्तानां आसङ्गवताम् । किं नु कुर्यात्? जोषयेत् कारयेत् सर्वकर्माणि विद्वान् स्वयं तदेव अविदुषां कर्म युक्त. अभियुक्तः समाचरन् ॥

अविद्वानज्ञः कथं कर्मसु सज्जते इत्याह—

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ताहमिति मन्यते ॥ २७॥

प्रकृतेः प्रकृतिः प्रधानं सत्त्वरजस्तमसां गुणानां साम्यावस्था तस्याः प्रकृतेः गुणैः विकारैः कार्यकरणरूपैः क्रियमाणानि कर्माणि लौकिकानि शास्त्रीयाणि च सर्वशः सर्वप्रकारैः अहंकारविमूढात्मा कार्यकरणसंघातात्मप्रत्ययः अहंकारः तेन विविधं नानाविधं मूढः आत्मा अन्तःकरणं यस्य सः अयं कार्यकरणधर्मा कार्यकरणाभिमानी अविद्यया कर्माणि आत्मनि मन्यमानः तत्तत्कर्मणाम् अहं कर्ता इति मन्यते ॥

यः पुनर्विद्वान्—

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥ २८॥

तत्त्ववित् तु महाबाहो । कस्य तत्त्ववित्? गुणकर्मवि-

भागयोः गुणविभागस्य कर्मविभागस्य च तत्त्ववित् इत्यर्थः । गुणाः करणात्मकाः गुणेषु विषयात्मकेषु वर्तन्ते न आत्मा इति मत्वा न सज्जते सक्तिं न करोति ॥

ये पुनः—

प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु ।
तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् ॥

प्रकृतेः गुणैः सम्यक् मूढाः संमोहिताः सन्त सज्जन्ते गुणानां कर्मसु गुणकर्मसु 'वयं कर्म कुर्मः फलाय' इति । तान् कर्मसङ्गिनः अकृत्स्नविदः कर्मफलमात्रदर्शिनः मन्दान् मन्दप्रज्ञान् कृत्स्नवित् आत्मवित् स्वयं न विचालयेत् बुद्धि-भेदकरणमेव चालनं तत् न कुर्यात् इत्यर्थः ॥

कथं पुनः कर्मण्यधिकृतेन अज्ञेन मुमुक्षुणा कर्म कर्तव्य-मिति, उच्यते—

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥

मयि वासुदेवे परमेश्वरे सर्वज्ञे सर्वात्मनि सर्वाणि कर्मा-णि संन्यस्य निक्षिप्य अध्यात्मचेतसा विवेकबुद्धया 'अहं

कर्ता ईश्वराय भृत्यवत् करोमि' इत्यनया बुद्ध्या । किंच, निराशीः त्यक्ताशीः निर्ममः ममभावश्च निर्गतः यस्य तव स त्वं निर्ममो भूत्वा युध्यस्व विगतज्वरः विगतसंतापः विगतशोकः सन्नित्यर्थः ॥

यदेतन्मम मतं कर्म कर्तव्यम् इति सप्रमाणमुक्तं तत् तथा—

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥

ये मे मदीयम् इदं मतं नित्यम् अनुतिष्ठन्ति अनुवर्तन्ते मानवा मनुष्याः श्रद्धावन्तः श्रद्दधानाः अनसूयन्तः असूयां च मयि परमगुरौ वासुदेवे अकुर्वन्तः, मुच्यन्ते तेऽपि एवंभूताः कर्मभिः धर्माधर्माख्यैः ॥

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥३२॥

ये तु तद्विपरीताः एतत् मम मतम् अभ्यसूयन्तः निन्दन्तः न अनुतिष्ठन्ति नानुवर्तन्ते मे मतम्, सर्वेषु ज्ञानेषु विविधं मूढा ते । सर्वज्ञानविमूढान् तान् विद्धि जानीहि नष्टान् नाशं गतान् अचेतसः अविवेकिनः ॥

कस्मात् पुनः कारणात् त्वदीयं मतं नानुतिष्ठन्ति, परधर्मान् अनुतिष्ठन्ति, स्वधर्मं च नानुवर्तन्ते, त्वत्प्रतिकूलाः कथं न बिभ्यति त्वच्छासनातिक्रमदोषात् ? तत्राह—

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥

सदृशम् अनुरूपं चेष्टते चेष्टां करोति । कस्य ? स्वस्याः स्वकीयायाः प्रकृतेः । प्रकृतिर्नाम पूर्वकृतधर्माधर्मादिसंस्कारः वर्तमानजन्मादौ अभिव्यक्तः, सा प्रकृतिः । तस्याः सदृशमेव सर्वो जन्तुः ज्ञानवानपि चेष्टते, किं पुनर्मूर्खः । तस्मात् प्रकृतिं यान्ति अनुगच्छन्ति भूतानि प्राणिनः । निग्रहः निषेधरूपः किं करिष्यति मम वा अन्यस्य वा ॥

यदि सर्वो जन्तुः आत्मनः प्रकृतिसदृशमेव चेष्टते, न च प्रकृतिशून्यः कश्चित् अस्ति, ततः पुरुषकारस्य विषयानुपपत्तेः शास्त्रानर्थक्यप्राप्तौ इदमुच्यते—

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥

इन्द्रियस्येन्द्रियस्य अर्थे सर्वेन्द्रियाणामर्थे शब्दादिविषये

परिग्रहण सं०....10373.....
ग्रन्थालय, के. उ. ति. शि. संस्थान
सारनाथ, वाराणसी

इष्टे रागः अनिष्टे द्वेषः इत्येवं प्रतीन्द्रियार्थे रागद्वेषौ अवश्यंभाविनौ तत्र अयं पुरुषकारस्य शास्त्रार्थस्य च विषय उच्यते। शास्त्रार्थे प्रवृत्तः पूर्वमेव रागद्वेषयोर्वशं नागच्छेत्। या हि पुरुषस्य प्रकृतिः सा रागद्वेषपुरःसरैव स्वकार्ये पुरुषं प्रवर्तयति। तदा स्वधर्मपरित्यागः परधर्मानुष्ठानं च भवति। यदा पुनः रागद्वेषौ तत्प्रतिपक्षेण नियमयति तदा शास्त्रदृष्टिरेव पुरुषः भवति, न प्रकृतिवशः। तस्मात् तयोः रागद्वेषयोः वशं न आगच्छेत्, यतः तौ हि अस्य पुरुषस्य परिपन्थिनौ श्रेयोमार्गस्य विघ्नकर्तारौ तस्करौ इव पथीत्यर्थः॥

तत्र रागद्वेषप्रयुक्तो मन्यते शास्त्रार्थमप्यन्यथा 'परधर्मोऽपि धर्मत्वात् अनुष्ठेय एव' इति, तदसत्—

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥ ३५॥

श्रेयान् प्रशस्यतरः स्वो धर्मः स्वधर्मः विगुणः अपि विगतगुणोऽपि अनुष्ठीयमानः परधर्मात् स्वनुष्ठितात् साङ्गुण्येन संपादितादपि। स्वधर्मे स्थितस्य निधनं मरणमपि श्रेयः परधर्मे स्थितस्य जीवितात्। कस्मात्? परधर्मः भयावहः नरकादिलक्षणं भयमावहति यतः॥

यद्यपि अनर्थमूलम् 'ध्यायतो विषयान्पुंसः' इति 'राग-द्वेषौ ह्यस्य परिपन्थिनौ' इति च उक्तम्, विक्षिप्तम् अनव-धारितं च तदुक्तम्। तत् संक्षिप्तं निश्चितं च इदमेवेति ज्ञातुमिच्छन् अर्जुनः उवाच 'ज्ञाते हि तस्मिन् तदुच्छेदाय यत्नं कुर्याम्' इति

अर्जुन उवाच—

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥

अथ केन हेतुभूतेन प्रयुक्त. सन् राज्ञेव भृत्यः अयं पापं कर्म चरति आचरति पूरुषः पुरुष. स्वयम् अनिच्छन् अपि हे वार्ष्णेय वृष्णिकुलप्रसूत, बलात् इव नियोजितः राज्ञेव इत्युक्तो दृष्टान्तः ॥

शृणु त्वं तं वैरिणं सर्वानर्थकरं यं त्वं पृच्छसि इति भगवान् उवाच—

श्रीभगवानुवाच—

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥

'ऐश्वर्यस्य समग्रस्य धर्मस्य यशस श्रियः । वैराग्य-

स्याथ मोक्षस्य षण्णां भग इतीङ्गना' ऐश्वर्यादिषट्कं यस्मिन् वासुदेवे नित्यमप्रतिबद्धत्वेन सामस्त्येन च वर्तते, 'उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति' उत्पत्त्यादिविषयं च विज्ञानं यस्य स वासुदेव. वाच्यः भगवान् इति ॥

काम एष. सर्वलोकशत्रुः यन्निमित्ता सर्वानर्थप्राप्तिः प्राणिनाम् । स एष कामः प्रतिहतः केनचित् क्रोधत्वेन परिणमते । अतः क्रोधः अपि एष एव रजोगुणसमुद्भवः रजश्च तत् गुणश्च रजोगुणः सः समुद्भवः यस्य सः कामः रजोगुणसमुद्भवः, रजोगुणस्य वा समुद्भवः । कामो हि उद्भूतः रजः प्रवर्तयन् पुरुषं प्रवर्तयति ; 'तृष्णया हि अहं कारितः' इति दुःखिनां रजःकार्ये सेवादौ प्रवृत्तानां प्रलापः श्रूयते । महाशनः महत् अशनं अस्येति महाशनः ; अत एव महापाप्मा, कामेन हि प्रेरितः जन्तुः पापं करोति । अतः विद्धि एनं कामम् इह संसारे वैरिणम् ॥

कथं वैरी इति दृष्टान्तैः प्रत्याययति—

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८ ॥

धूमेन सहजेन आव्रियते वह्निः प्रकाशात्मकः अप्रकाशात्मकेन, यथा वा आदर्शो मलेन च, यथा उल्बेन च जरायुणा गर्भवेष्टनेन आवृतः आच्छादितः गर्भः तथा तेन इदम् आवृतम् ॥

किं पुनस्तत् इदंशब्दवाच्यं यत् कामेनावृतमित्युच्यते—

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ३९ ॥

आवृतम् एतेन ज्ञानं ज्ञानिनः नित्यवैरिणा, ज्ञानी हि जानाति 'अनेन अहमनर्थे प्रयुक्तः' इति पूर्वमेव । दुःखी च भवति नित्यमेव । अतः असौ ज्ञानिनो नित्यवैरी, न तु मूर्खस्य । स हि कामं तृष्णाकाले मित्रमिव पश्यन् तत्कार्ये दुःखे प्राप्ते जानाति 'तृष्णया अहं दुःखित्वमापादितः' इति, न पूर्वमेव । अतः ज्ञानिन एव नित्यवैरी । किरूपेण? कामरूपेण कामः इच्छैव रूपमस्य इति कामरूपः तेन दुष्पूरेण दुःखेन पूरणमस्य इति दुष्पूरः तेन अनलेन न अस्य अलं पर्याप्तिः विद्यते इत्यनलः तेन च ॥

किमधिष्ठानः पुनः कामः ज्ञानस्य आवरणत्वेन वैरी सर्वस्य लोकस्य? इत्यपेक्षायामाह, ज्ञाते हि शत्रोरधिष्ठाने

सुखेन निबर्हणं कर्तुं शक्यत इति—

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४० ॥

इन्द्रियाणि मन· बुद्धिश्च अस्य कामस्य अधिष्ठानम् आश्रयः उच्यते । एतैः इन्द्रियादिभिः आश्रयैः विमोहयति विविधं मोहयति एष कामः ज्ञानम् आवृत्य आच्छाद्य देहिनं शरीरिणम् ॥

यतः एवम्—

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥४१॥

तस्मात् त्वम् इन्द्रियाणि आदौ पूर्वमेव नियम्य वशीकृत्य भरतर्षभ पाप्मानं पापाचारं कामं प्रजहिहि परित्यज एनं प्रकृतं वैरिणं ज्ञानविज्ञाननाशनं ज्ञानं शास्त्रतः आचार्यतश्च आत्मादीनाम् अवबोध·, विज्ञानं विशेषतः तदनुभवः, तयोः ज्ञानविज्ञानयोः श्रेयःप्राप्तिहेत्वोः नाशनं नाशकरं प्रजहिहि आत्मनः परित्यजेत्यर्थः ॥

इन्द्रियाण्यादौ नियम्य कामं शत्रुं जहिहि इत्युक्तम्, तत्र किमाश्रयः काम जह्यात् इत्युच्यते—

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥४२॥

इन्द्रियाणि श्रोत्रादीनि पञ्च देहं स्थूलं बाह्यं परिच्छिन्नं च अपेक्ष्य सौक्ष्म्यान्तरत्वव्यापित्वाद्यपेक्षया पराणि प्रकृष्टानि आहुः पण्डिताः । तथा इन्द्रियेभ्यः परं मनः संकल्पविकल्पात्मकम् । तथा मनसः तु परा बुद्धिः निश्चयात्मिका । तथा य सर्वदृश्येभ्य. बुद्धयन्तेभ्य आभ्यन्तरः, य देहिनम् इन्द्रियादिभिः आश्रयैः युक्तः कामः ज्ञानावरणद्वारेण मोहयति इत्युक्तम् । बुद्धेः परतस्तु सः सः बुद्धेः द्रष्टा पर आत्मा ॥

ततः किम्—

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥४३॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां
भीष्मपर्वणि श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम
तृतीयोऽध्यायः ॥

एवं बुद्धे परम् आत्मानं बुद्ध्वा ज्ञात्वा संस्तभ्य सम्यक् स्तम्भनं कृत्वा आत्मानं स्वेनैव आत्मना संस्कृतेन मनसा सम्यक् समाधायेत्यर्थः । जहि एनं शत्रुं हे महाबाहो कामरूपं दुरासदं दुःखेन आसदः आसादनं प्राप्तिः यस्य त दुरासदं दुर्विज्ञेयानेकविशेषमिति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपाद-
शिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
तृतीयोऽध्यायः ॥



श्रीमच्छंकरभगवत्पादविरचितम्

श्रीमद्भगवद्गीताभाष्यम्

चतुर्थोऽध्यायः

चतुर्थोऽध्यायः ॥



योऽयं योगः अध्यायद्वयेनोक्तः ज्ञाननिष्ठालक्षणः, ससंन्यासः कर्मयोगोपायः, यस्मिन् वेदार्थः परिसमाप्तः, प्रवृत्तिलक्षणः निवृत्तिलक्षणश्च, गीतासु च सर्वासु अयमेव योगो विवक्षितो भगवता । अतः परिसमाप्तं वेदार्थ मन्वानः तं वंशकथनेन स्तौति श्रीभगवान्—

श्रीभगवानुवाच—

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥

इमम् अध्यायद्वयेनोक्तं योगं विवस्वते आदित्याय सर्गादौ प्रोक्तवान् अहं जगत्परिपालयितॄणां क्षत्रियाणां बलाधानाय तेन योगबलेन युक्ताः समर्था भवन्ति ब्रह्म परिरक्षितुम् । ब्रह्मक्षत्रे परिपालिते जगत् परिपालयितुमलम् । अव्ययम् अव्ययफलत्वात् । न ह्यस्य योगस्य सम्यग्दर्शननिष्ठालक्षणस्य

मोक्षाख्यं फलं व्येति । स च विवस्वान् मनवे प्राह । मनु. इक्ष्वाकवे स्वपुत्राय आदिराजाय अब्रवीत् ॥

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परंतप ॥ २ ॥

एवं क्षत्रियपरम्पराप्राप्तम् इमं राजर्षयः राजानश्च ते ऋषयश्च राजर्षय विदुः इमं योगम् । स योगः कालेन इह महता दीर्घेण नष्टः विच्छिन्नसंप्रदायः संवृत्तः । हे परंतप, आत्मनः विपक्षभूता. परा इति उच्यन्ते, तान् शौर्यतेजोगभस्तिभि. भानुरिव तापयतीति परतपः शत्रुतापन इत्यर्थ ॥

दुर्बलानजितेन्द्रियान् प्राप्य नष्टं योगमिममुपलभ्य लोकं च अपुरुषार्थसंबन्धिनम्—

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥

स एव अयं मया ते तुभ्यम् अद्य इदानी योगः प्रोक्त पुरातनः भक्तः असि मे सखा च असि इति । रहस्यं हि यस्मात् एतत् उत्तमं योगः ज्ञानम् इत्यर्थः ॥

भगवता विप्रतिषिद्धमुक्तमिति मा भूत् कस्यचित् बुद्धि

इति परिहारार्थं चोद्यमिव कुर्वन अर्जुन उवाच—

अर्जुन उवाच—

अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥

अपरम् अर्वाक् वसुदेवगृहे भवतो जन्म । परं पूर्वं सर्गादौ जन्म उत्पत्तिः विवस्वतः आदित्यस्य । तत् कथम् एतत् विजानीयाम् अविरुद्धार्थतया, यः त्वमेव आदौ प्रोक्तवान् इमं योगं स एव इदानी मह्यं प्रोक्तवानसि इति ॥

या वासुदेवे अनीश्वरासर्वज्ञाशङ्का मूर्खाणाम्, तां परिहरन् श्रीभगवानुवाच, यदर्थो ह्यर्जुनस्य प्रश्नः—

श्रीभगवानुवाच—

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥ ५ ॥

बहूनि मे मम व्यतीतानि अतिक्रान्तानि जन्मानि तव च हे अर्जुन । तानि अहं वेद जाने सर्वाणि न त्वं वेत्थ न जानीषे, धर्माधर्मादिप्रतिबद्धज्ञानशक्तित्वात् । अहं पुनः नित्यशुद्धबुद्धमुक्तस्वभावत्वात् अनावरणज्ञानशक्तिरिति वेद अहं हे परंतप ॥

कथं तर्हि तव नित्येश्वरस्य धर्माधर्मभावेऽपि जन्म इति, उच्यते—

अजोऽपि सन्नव्ययात्मा
भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामधिष्ठाय
संभवाम्यात्ममायया ॥ ६ ॥

अजोऽपि जन्मरहितोऽपि सन्, तथा अव्ययात्मा अक्षीणज्ञानशक्तिस्वभावोऽपि सन्, तथा भूतानां ब्रह्मादिस्तम्बपर्यन्तानाम् ईश्वरः ईशनशीलोऽपि सन्, प्रकृतिं स्वां मम वैष्णवी मायां त्रिगुणात्मिकाम्, यस्या वशे सर्वं जगत् वर्तते, यया मोहितं सत् स्वमात्मानं वासुदेवं न जानाति, तां प्रकृति स्वाम् अधिष्ठाय वशीकृत्य संभवामि देहवानिव भवामि जात इव आत्ममायया आत्मनः मायया, न परमार्थतो लोकवत् ॥

तच्च जन्म कदा किमर्थं च इत्युच्यते—

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥

यदा यदा हि धर्मस्य ग्लानिः हानिः वर्णाश्रमादिलक्षणस्य

प्राणिनामभ्युदयनिःश्रेयससाधनस्य भवति भारत, अभ्युत्थानम् उद्भवः अधर्मस्य, तदा तदा आत्मानं सृजामि अहं मायया ॥

किमर्थम् ? —

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ८ ॥

परित्राणाय परिरक्षणाय साधूनां सन्मार्गस्थानाम्, विनाशाय च दुष्कृतां पापकारिणाम्, किंच धर्मसंस्थापनार्थाय धर्मस्य सम्यक् स्थापनं तदर्थं संभवामि युगे युगे प्रतियुगम् ॥

तत्—

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥

जन्म मायारूपं कर्म च साधूनां परित्राणादि मे मम दिव्यम् अप्राकृतम् ऐश्वरम् एवं यथोक्तं यः वेत्ति तत्त्वतः तत्त्वेन यथावत् त्यक्त्वा देहम् इमं पुनर्जन्म पुनरुत्पत्तिं न एति न प्राप्नोति । माम् एति आगच्छति सः मुच्यते हे अर्जुन ॥

नैष मोक्षमार्ग इदानी प्रवृत्तः ; किं तर्हि ? पूर्वमपि—

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ १० ॥

वीतरागभयक्रोधा. रागश्च भयं च क्रोधश्च वीताः विगता येभ्यः ते वीतरागभयक्रोधाः मन्मयाः ब्रह्मविद. ईश्वराभेद-दर्शिनः मामेव च परमेश्वरम् उपाश्रिताः केवलज्ञाननिष्ठा इत्यर्थः । बहव. अनेके ज्ञानतपसा ज्ञानमेव च परमात्मविषयं तपः तेन ज्ञानतपसा पूताः परां शुद्धि गताः सन्त मद्भावम् ईश्वरभावं मोक्षम् आगताः समनुप्राप्ता. । इतरतपोनिरपेक्षज्ञाननिष्ठा इत्यस्य लिङ्गम् 'ज्ञानतपसा' इति विशेषणम् ॥

तव तर्हि रागद्वेषौ स्तः, येन केभ्यश्चिदेव आत्मभावं प्रयच्छसि न सर्वेभ्यः इत्युच्यते—

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥

ये यथा येन प्रकारेण येन प्रयोजनेन यत्फलार्थितया मां प्रपद्यन्ते तान् तथैव तत्फलदानेन भजामि अनुगृह्णामि अहम् इत्येतत् । तेषां मोक्षं प्रति अनर्थित्वात् । न हि एकस्य मुमुक्षुत्वं फलार्थित्व च युगपत् संभवति । अतः ये फला-

र्थिनः तान् फलप्रदानेन, ये यथोक्तकारिणस्तु अफलार्थिनः मुमुक्षवश्च तान् ज्ञानप्रदानेन, ये ज्ञानिनः संन्यासिनः मुमुक्षवश्च तान् मोक्षप्रदानेन, तथा आर्तान् आर्तिहरणेन इत्येवं यथा प्रपद्यन्ते ये तान् तथैव भजामि इत्यर्थः । न पुनः रागद्वेषनिमित्तं मोहनिमित्तं वा कंचित् भजामि । सर्वथापि सर्वावस्थस्य मम ईश्वरस्य वर्त्म मार्गम् अनुवर्तन्ते मनुष्याः— यत्फलार्थितया यस्मिन् कर्मणि अधिकृताः ये प्रयतन्ते ते मनुष्या अत्र उच्यन्ते— हे पार्थ सर्वशः सर्वप्रकारैः ॥

यदि तव ईश्वरस्य रागादिदोषाभावात् सर्वप्राणिषु अनुजिघृक्षायां तुल्यायां सर्वफलप्रदानसमर्थे च त्वयि सति 'वासुदेवः सर्वम्' इति ज्ञानेनैव मुमुक्षवः सन्तः कस्मात् त्वामेव सर्वे न प्रतिपद्यन्ते इति ? शृणु तत्र कारणम्—

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥

काङ्क्षन्तः अभीप्सन्तः कर्मणां सिद्धिं फलनिष्पत्तिं प्रार्थयन्तः यजन्ते इह अस्मिन् लोके देवताः इन्द्राग्न्यायाः ; 'अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानाम्' इति श्रुतेः । तेषां हि भिन्नदेवता-

याजिनां फलाकाङ्क्षिणां क्षिप्रं शीघ्रं हि यस्मात् मानुषे लोके, मनुष्यलोके हि शास्त्राधिकारः। 'क्षिप्रं हि मानुषे लोके' इति विशेषणात् अन्येष्वपि कर्मफलसिद्धिं दर्शयति भगवान्। मानुषे लोके वर्णाश्रमादिकर्माणि इति विशेषः, तेषां च वर्णाश्रमाद्यधिकारिकर्मणां फलसिद्धिः क्षिप्रं भवति। कर्मजा कर्मणो जाता ॥

मानुषे एव लोके वर्णाश्रमादिकर्माधिकारः, न अन्येषु लोकेषु इति नियमः किंनिमित्त इति? अथवा वर्णाश्रमादि-प्रविभागोपेताः मनुष्याः मम वर्त्म अनुवर्तन्ते सर्वशः इत्युक्तम्। कस्मात्पुनः कारणात् नियमेन तवैव वर्त्म अनुवर्तन्ते न अन्यस्य इति? उच्यते—

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥

चत्वार एव वर्णाः चातुर्वर्ण्यं मया ईश्वरेण सृष्टम् उत्पादितम्, 'ब्राह्मणोऽस्य मुखमासीत्' इत्यादिश्रुतेः। गुणकर्मविभागशः गुणविभागश कर्मविभागशश्च। गुणाः सत्त्वरजस्तमांसि। तत्र सात्त्विकस्य सत्त्वप्रधानस्य ब्राह्मणस्य 'शमो दमस्तपः' इत्यादीनि कर्माणि, सत्त्वोपसर्जनरजःप्रधा-

नस्य क्षत्रियस्य शौर्यतेजःप्रभृतीनि कर्माणि, तमउपसर्जनरजःप्रधानस्य वैश्यस्य कृष्यादीनि कर्माणि, रजउपसर्जनतमःप्रधानस्य शूद्रस्य शुश्रूषैव कर्म इत्येवं गुणकर्मविभागशः चातुर्वर्ण्यं मया सृष्टम् इत्यर्थः । तच्च इदं चातुर्वर्ण्यं न अन्येषु लोकेषु, अतः मानुषे लोके इति विशेषणम् । हन्त तर्हि चातुर्वर्ण्यस्य सर्गादेः कर्मणः कर्तृत्वात् तत्फलेन युज्यसे, अतः न त्वं नित्यमुक्तः नित्येश्वरश्च इति ? उच्यते—यद्यपि मायासंव्यवहारेण तस्य कर्मणः कर्तारमपि सन्त मा परमार्थत. विद्धि अकर्तारम् । अत एव अव्ययम् असंसारिणं च मां विद्धि ॥

येषां तु कर्मणां कर्तारं मां मन्यसे परमार्थतः तेषाम् अकर्ता एवाहम् , यतः—

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥

न मां तानि कर्माणि लिम्पन्ति देहाद्यारम्भकत्वेन, अहंकाराभावात् । न च तेषां कर्मणां फलेषु मे मम स्पृहा तृष्णा । येषां तु संसारिणाम् 'अहं कर्ता' इत्यभिमानः कर्मसु, स्पृहा तत्फलेषु च, तान् कर्माणि लिम्पन्ति इति युक्तम् , तदभावात् न मां कर्माणि लिम्पन्ति । इति एवं यः

अन्योऽपि माम् आत्मत्वेन अभिजानाति 'नाहं कर्ता न मे कर्मफले स्पृहा' इति सः कर्मभिः न बध्यते, तस्यापि न देहाद्यारम्भकाणि कर्माणि भवन्ति इत्यर्थः ॥

'नाहं कर्ता न मे कर्मफले स्पृहा' इति—

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ १५ ॥

एवं ज्ञात्वा कृतं कर्म पूर्वैः अपि अतिक्रान्तैः मुमुक्षुभिः । कुरु तेन कर्मैव त्वम्, न तूष्णीमासनं नापि संन्यासः कर्तव्यः, तस्मात् त्वं पूर्वैरपि अनुष्ठितत्वात्, यदि अनात्मज्ञः त्वं तदा आत्मशुद्ध्यर्थम्, तत्त्वविच्चेत् लोकसंग्रहार्थं पूर्वैः जनकादिभिः पूर्वतरं कृतं न अधुनातनं कृतं निर्वर्तितम् ॥

तत्र कर्म चेत् कर्तव्यं त्वद्वचनादेव करोम्यहम्, किं विशेषितेन 'पूर्वैः पूर्वतरं कृतम्' इत्युच्यते, यस्मात् महत् वैषम्यं कर्मणि । कथम्?—

किं कर्म किमकर्मेति
कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि
यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १६ ॥

कि कर्म किं च अकर्म इति कवय. मेधाविनः अपि अत्र अस्मिन् कर्मादिविषये मोहिताः मोहं गताः । तत् अतः ते तुभ्यम् अहं कर्म अकर्म च प्रवक्ष्यामि, यत् ज्ञात्वा विदित्वा कर्मादि मोक्ष्यसे अशुभात् संसारात् ॥

न चैतत्त्वया मन्तव्यम्—कर्म नाम देहादिचेष्टा लोकप्रसिद्धम्, अकर्म नाम तदक्रिया तूष्णीमासनम्; किं तत्र बोद्धव्यम्? इति । कस्मात्, उच्यते—

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥१७॥

कर्मणः शास्त्रविहितस्य हि यस्मात् अपि अस्ति बोद्धव्यम्, बोद्धव्यं च अस्त्येव विकर्मणः प्रतिषिद्धस्य, तथा अकर्मणश्च तूष्णींभावस्य बोद्धव्यम् अस्ति इति त्रिष्वप्यध्याहारः कर्तव्य । यस्मात् गहना विषमा दुर्ज्ञेया— कर्मणः इति उपलक्षणार्थं कर्मादीनाम्— कर्माकर्मविकर्मणां गतिः याथात्म्यं तत्त्वम् इत्यर्थः ॥

किं पुनस्तत्त्वं कर्मादेः यत् बोद्धव्यं वक्ष्यामि इति प्रतिज्ञातम्? उच्यते—

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥

कर्मणि, क्रियते इति कर्म व्यापारमात्रम्, तस्मिन् कर्मणि अकर्म कर्माभावं यः पश्येत्, अकर्मणि च कर्माभावे कर्तृतन्त्रत्वात् प्रवृत्तिनिवृत्त्योः—वस्तु अप्राप्यैव हि सर्व एव क्रियाकारकादिव्यवहारः अविद्याभूमौ एव—कर्म यः पश्येत् पश्यति, सः बुद्धिमान् मनुष्येषु, सः युक्तः योगी च, कृत्स्नकर्मकृत् समस्तकर्मकृच्च स., इति स्तूयते कर्माकर्मणोरितरेतरदर्शी ॥

ननु किमिदं विरुद्धमुच्यते 'कर्मणि अकर्म यः पश्येत्' इति 'अकर्मणि च कर्म' इति, न हि कर्म अकर्म स्यात्, अकर्म वा कर्म। तत्र विरुद्धं कथं पश्येत् द्रष्टा?— न, अकर्म एव परमार्थतः सत् कर्मवत् अवभासते मूढदृष्टेः लोकस्य, तथा कर्मैव अकर्मवत्। तत्र यथाभूतदर्शनार्थमाह भगवान्— 'कर्मण्यकर्म यः पश्येत्' इत्यादि। अतो न विरुद्धम्। बुद्धिमत्त्वाद्युपपत्तेश्च। 'बोद्धव्यम्' इति च यथाभूतदर्शनमुच्यते। न च विपरीतज्ञानात् अशुभात् मोक्षणं स्यात्; 'यत् ज्ञात्वा मोक्ष्यसेऽशुभात्' इति च उक्तम्। तस्मात् कर्माकर्मणी विपर्ययेण गृहीते प्राणिभि

तद्विपर्ययग्रहणनिवृत्त्यर्थं भगवतो वचनम् 'कर्मण्यकर्म यः' इत्यादि । न च अत्र कर्माधिकरणमकर्म अस्ति, कुण्डे बदराणीव । नापि अकर्माधिकरणं कर्मास्ति, कर्माभावत्वादकर्मणः । अतः विपरीतगृहीते एव कर्माकर्मणी लौकिकैः, यथा मृगतृष्णिकायामुदकं शुक्तिकायां वा रजतम् । ननु कर्म कर्मैव सर्वेषां न क्वचित् व्यभिचरति— तन् न, नौस्थस्य नावि गच्छन्त्यां तटस्थेषु अगतिषु नगेषु प्रतिकूलगतिदर्शनात्, दूरेषु चक्षुषा असंनिकृष्टेषु गच्छत्सु गत्यभावदर्शनात्, एवम् इहापि अकर्मणि कर्मदर्शनं कर्मणि च अकर्मदर्शनं विपरीतदर्शनं येन तन्निराकरणार्थमुच्यते 'कर्मण्यकर्म यः पश्येत्' इत्यादि ॥

तदेतत् उक्तप्रतिवचनमपि असकृत् अत्यन्तविपरीतदर्शनभावाततया मोमुह्यमानो लोकः श्रुतमपि असकृत तत्त्वं विस्मृत्य विस्मृत्य मिथ्याप्रसङ्गम् अवतार्यावतार्य चोदयति इति पुनः पुनः उत्तरमाह भगवान्, दुर्विज्ञेयत्वं च आलक्ष्य वस्तुनः । 'अव्यक्तोऽयमचिन्त्योऽयम्' 'न जायते म्रियते' इत्यादिना आत्मनि कर्माभावः श्रुतिस्मृतिन्यायप्रसिद्ध. उक्त वक्ष्यमाणश्च । तस्मिन् आत्मनि कर्माभावे अकर्मणि कर्मविपरीतदर्शनम् अत्यन्तनिरूढम्, यतः, 'कि कर्म किमकर्मेति

कवयोऽप्यत्र मोहिताः'। देहाद्याश्रयं कर्म आत्मन्यध्यारोप्य 'अहं कर्ता, मम एतत् कर्म, मया अस्य कर्मणः फलं भोक्तव्यम्' इति च, तथा 'अहं तूष्णीं भवामि, येन अहं निरायासः अकर्मा सुखी स्याम्' इति कार्यकरणाश्रयं व्यापारोपरमं तत्कृतं च सुखित्वम् आत्मनि अध्यारोप्य 'न करोमि किंचित्, तूष्णी सुखमासे' इति अभिमन्यते लोकः। तत्रेदं लोकस्य विपरीतदर्शनापनयाय आह भगवान्— 'कर्मण्यकर्म यः पश्येत्' इत्यादि ॥

अत्र च कर्म कर्मैव सत् कार्यकरणाश्रयं कर्मरहिते अविक्रिये आत्मनि सर्वैः अध्यस्तम्, यतः पण्डितोऽपि 'अहं करोमि' इति मन्यते। अतः आत्मसमवेततया सर्वलोकप्रसिद्धे कर्मणि नदीकूलस्थेष्विव वृक्षेषु गतिप्रातिलोम्येन अकर्म कर्माभावं यथाभूतं गत्यभावमिव वृक्षेषु यः पश्येत्, अकर्मणि च कार्यकरणव्यापारोपरमे कर्मवत् आत्मनि अध्यारोपिते, 'तूष्णीं अकुर्वन् सुखं आसे' इत्यहंकाराभिसंधिहेतुत्वात्, तस्मिन् अकर्मणि च कर्म यः पश्येत्, यः एवं कर्माकर्मविभागज्ञः सः बुद्धिमान् पण्डितः मनुष्येषु, सः युक्तः योगी कृत्स्नकर्मकृच्च सः अशुभात् मोक्षितः कृतकृत्यो भवति इत्यर्थः ॥

अयं श्लोकः अन्यथा व्याख्यातः कैश्चित् । कथम् ? नित्यानां किल कर्मणाम् ईश्वरार्थे अनुष्ठीयमानानां तत्फलाभावात् अकर्माणि तानि उच्यन्ते गौण्या वृत्त्या । तेषां च अकरणम् अकर्म, तच्च प्रत्यवायफलत्वात् कर्म उच्यते गौण्यैव वृत्त्या । तत्र नित्ये कर्मणि अकर्म यः पश्येत् फलाभावात्; यथा धेनुरपि गौः अगौः इत्युच्यते क्षीराख्य फलं न प्रयच्छति इति, तद्वत् । तथा नित्याकरणे तु अकर्मणि च कर्म यः पश्येत् नरकादिप्रत्यवायफलं प्रयच्छति इति ॥

नैतत् युक्त व्याख्यानम् । एवं ज्ञानात् अशुभात् मोक्षानुपपत्तेः 'यज्ज्ञात्वा मोक्ष्यसेऽशुभात्' इति भगवता उक्त वचनं बाध्येत । कथम् ? नित्यानामनुष्ठानात् अशुभात् स्यात् नाम मोक्षणम्, न तु तेषां फलाभावज्ञानात् । न हि नित्यानां फलाभावज्ञानम् अशुभमुक्तिफलत्वेन चोदितम्, नित्यकर्मज्ञान वा । न च भगवतैवेहोक्तम् । एतेन अकर्मणि कर्मदर्शनं प्रत्युक्तम् । न हि अकर्मणि 'कर्म' इति दर्शनं कर्तव्यतया इह चोद्यते, नित्यस्य तु कर्तव्यतामात्रम् । न च 'अकरणात् नित्यस्य प्रत्यवायो भवति' इति विज्ञानात् किंचित् फलं स्यात् । नापि नित्याकरणं ज्ञेयत्वेन चोदितम् । नापि 'कर्म

अकर्म' इति मिथ्यादर्शनात् अशुभात् मोक्षणं बुद्धिमत्त्वं युक्तता कृत्स्नकर्मकृत्त्वादि च फलम् उपपद्यते, स्तुतिर्वा । मिथ्याज्ञानमेव हि साक्षात् अशुभरूपम् । कुतः अन्यस्माद्-शुभात् मोक्षणम्? न हि तमः तमसो निवर्तकं भवति ॥

ननु कर्मणि यत् अकर्मदर्शनम् अकर्मणि वा कर्मदर्शनं न तत् मिथ्याज्ञानम्, किं तर्हि? गौणं फलभावाभावनिमित्तम्— न, कर्माकर्मविज्ञानादपि गौणात् फलस्य अश्रवणात् । नापि श्रुतहान्यश्रुतपरिकल्पनायां कश्चित् विशेष उपलभ्यते । स्वशब्देनापि शक्यं वक्तुम् 'नित्यकर्मणां फलं नास्ति, अकरणाच्च तेषां नरकपातः स्यात्' इति, तत्र व्याजेन परव्यामोहरूपेण 'कर्मण्यकर्म यः पश्येत्' इत्यादिना किम्? तत्र एवं व्याचक्षाणेन भगवतोक्तं वाक्य लोकव्यामोहार्थमिति व्यक्तं कल्पितं स्यात्। न च एतत् छद्मरूपेण वाक्येन रक्षणीयं वस्तु, नापि शब्दान्तरेण पुनः पुनः उच्यमानं सुबोधं स्यात् इत्येवं वक्तुं युक्तम् । 'कर्मण्येवाधिकारस्ते' इत्यत्र हि स्फुटतर उक्तः अर्थः, न पुनर्वक्तव्यो भवति । सर्वत्र च प्रशस्तं बोद्धव्यं च कर्तव्यमेव । न निष्प्रयोजनं बोद्धव्यमित्युच्यते ॥

न च मिथ्याज्ञानं बोद्धव्यं भवति, तत्प्रत्युपस्थापितं वा वस्त्वाभासम् । नापि नित्यानाम् अकरणात् अभावात् प्रत्य-

वायभावोत्पत्तिः, 'नासतो विद्यते भावः' इति वचनात् 'कथं असतः सज्जायेत' इति च दर्शितम् असतः सज्जन्म-प्रतिषेधात् । असतः सदुत्पत्तिं ब्रुवता असदेव सद्भवेत्, स-च्चापि असत् भवेत् इत्युक्तं स्यात् । तच्च अयुक्तम्, सर्व-प्रमाणविरोधात् । न च निष्फलं विदध्यात् कर्म शास्त्रम्, दुःखस्वरूपत्वात्, दुःखस्य च बुद्धिपूर्वकतया कार्यत्वानुपपत्तेः । तदकरणे च नरकपाताभ्युपगमात् अनर्थायैव उभयथापि करणे च अकरणे च शास्त्रं निष्फलं कल्पितं स्यात् । स्वाभ्युपगमविरोधश्च 'नित्यं निष्फलं कर्म' इति अभ्युप-गम्य 'मोक्षफलाय' इति ब्रुवतः । तस्मात् यथाश्रुत एवार्थः 'कर्मण्यकर्म यः' इत्यादेः । तथा च व्याख्यातः अस्माभिः श्लोकः ॥

तदेतत् कर्मणि अकर्मदर्शनं स्तूयते—

यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥

यस्य यथोक्तदर्शिनः सर्वे यावन्तः समारम्भाः सर्वाणि कर्माणि, समारभ्यन्ते इति समारम्भाः, कामसंकल्पवर्जिताः कामैः तत्कारणैश्च संकल्पैः वर्जिताः मुधैव चेष्टामात्रा अनु-

ष्ठीयन्ते; प्रवृत्तेन चेत् लोकसंग्रहार्थम्, निवृत्तेन चेत् जीवनमात्रार्थम्। तं ज्ञानाग्निदग्धकर्माण कर्मादौ अकर्मादिदर्शनं ज्ञानं तदेव अग्निः तेन ज्ञानाग्निना दग्धानि शुभाशुभलक्षणानि कर्माणि यस्य तम् आहुः परमार्थतः पण्डितं बुधा ब्रह्मविद्. ॥

यस्तु अकर्मादिदर्शी, सः अकर्मादिदर्शनादेव निष्कर्मा संन्यासी जीवनमात्रार्थचेष्टः सन् कर्मणि न प्रवर्तते, यद्यपि प्राक् विवेकतः प्रवृत्त· । यस्तु प्रारब्धकर्मा सन् उत्तरकालमुत्पन्नात्मसम्यग्दर्शनः स्यात्, सः सर्वकर्मणि प्रयोजनमपश्यन् ससाधनं कर्म परित्यजत्येव । सः कुतश्चित् निमित्तात् कर्मपरित्यागासंभवे सति कर्मणि तत्फले च सङ्गरहिततया स्वप्रयोजनाभावात् लोकसंग्रहार्थं पूर्ववत् कर्मणि प्रवृत्तोऽपि नैव किंचित् करोति, ज्ञानाग्निदग्धकर्मत्वात् तदीयं कर्म अकर्मैव संपद्यते इत्येतमर्थं दर्शयिष्यन् आह—

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः।
कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः ॥

त्यक्त्वा कर्मसु अभिमानं फलासङ्गं च यथोक्तेन ज्ञानेन नित्यतृप्तः निराकाङ्क्षो विषयेषु इत्यर्थः । निराश्रयः आश्रय-

रहितः, आश्रयो नाम यत् आश्रित्य पुरुषार्थं सिसाधयिषति, दृष्टादृष्टफलसाधनाश्रयरहित इत्यर्थः । विदुषा क्रियमाणं कर्म परमार्थतोऽकर्मैव, तस्य निष्क्रियात्मदर्शनसंपन्नत्वात् । तेन एवंभूतेन स्वप्रयोजनाभावात् ससाधन कर्म परित्यक्तव्यमेव इति प्राप्ते, ततः निर्गमासंभवात् लोकसग्रहचिकीर्षया शिष्टविगर्हणापरिजिहीर्षया वा पूर्ववत् कर्मणि अभिप्रवृत्तोऽपि निष्क्रियात्मदर्शनसंपन्नत्वात् नैव किंचित् करोति सः ॥

यः पुनः पूर्वोक्तविपरीतः प्रागेव कर्मारम्भात् ब्रह्मणि सर्वान्तरे प्रत्यगात्मनि निष्क्रिये संजातात्मदर्शनः स दृष्टादृष्टेष्टविषयाशीर्विवर्जिततया दृष्टादृष्टार्थे कर्मणि प्रयोजनमपश्यन् ससाधनं कर्म संन्यस्य शरीरयात्रामात्रचेष्टः यतिः ज्ञाननिष्ठो मुच्यते इत्येतमर्थं दर्शयितुमाह—

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥

निराशीः निर्गताः आशिषः यस्मात् सः निराशीः, यतचित्तात्मा चित्तम् अन्तःकरणम् आत्मा बाह्यः कार्यकरणसंघातः तौ उभावपि यतौ संयतौ येन सः यतचित्तात्मा, त्यक्तसर्वपरिग्रहः त्यक्तः सर्वः परिग्रहः येन सः त्यक्तसर्व-

परिग्रहः, शारीर शरीरस्थितिमात्रप्रयोजनम्, केवलं तत्रापि अभिमानवर्जितम्, कर्म कुर्वन् न आप्नोति न प्राप्नोति किल्बिषम् अनिष्टरूपं पापं धर्मं च। धर्मोऽपि मुमुक्षोः किल्बिषमेव बन्धापादकत्वात्। तस्मात् ताभ्यां मुक्तः भवति, संसारात् मुक्तो भवति इत्यर्थः॥

'शारीरं केवलं कर्म' इत्यत्र किं शरीरनिर्वर्त्यं शारीर कर्म अभिप्रेतम्, आहोस्वित् शरीरस्थितिमात्रप्रयोजनं शारीरं कर्म इति? किं च अतः यदि शरीरनिर्वर्त्यं शारीरं कर्म यदि वा शरीरस्थितिमात्रप्रयोजनं शारीरम् इति? उच्यते— यदा शरीरनिर्वर्त्यं कर्म शारीरम् अभिप्रेतं स्यात्, तदा दृष्टादृष्टप्रयोजनं कर्म प्रतिषिद्धमपि शरीरेण कुर्वन् नाप्नोति किल्बिषम् इति ब्रुवतो विरुद्धाभिधानं प्रसज्येत। शास्त्रीयं च कर्म दृष्टादृष्टप्रयोजनं शरीरेण कुर्वन् नाप्नोति किल्बिषम् इत्यपि ब्रुवतः अप्राप्तप्रतिषेधप्रसङ्गः। 'शारीरं कर्म कुर्वन्' इति विशेषणात् केवलशब्दप्रयोगाच्च वाङ्मनसनिर्वर्त्यं कर्म विधिप्रतिषेधविषयं धर्माधर्मशब्दवाच्यं कुर्वन् प्राप्नोति किल्बिषम् इत्युक्तं स्यात्। तत्रापि वाङ्मनसाभ्यां विहितानुष्ठानपक्षे किल्बिषप्राप्तिवचनं विरुद्धम् आपद्येत। प्रतिषिद्धसेवापक्षेऽपि भूतार्थानुवादमात्रम् अनर्थकं स्यात्। यदा तु शरीरस्थिति-

मात्रप्रयोजनं शारीरं कर्म अभिप्रेतं भवेत्, तदा दृष्टादृष्टप्रयोजनं कर्म विधिप्रतिषेधगम्यं शरीरवाङ्मनसनिर्वर्त्यम् अन्यत् अकुर्वन् तैरेव शरीरादिभिः शरीरस्थितिमात्रप्रयोजनं केवलशब्दप्रयोगात् 'अहं करोमि' इत्यभिमानवर्जित शरीरादिचेष्टामात्रं लोकदृष्ट्या कुर्वन् नाप्नोति किल्बिषम् । एवंभूतस्य पापशब्दवाच्यकिल्बिषप्राप्त्यसंभवात् किल्बिषं संसारं न आप्नोति, ज्ञानाग्निदग्धसर्वकर्मत्वात् अप्रतिबन्धेन मुच्यत एव इति पूर्वोक्तसम्यग्दर्शनफलानुवाद एव एषः । एवम् 'शारीरं केवलं कर्म' इत्यस्य अर्थस्य परिग्रहे निरवद्यं भवति ॥

त्यक्तसर्वपरिग्रहस्य यतेः अन्नादेः शरीरस्थितिहेतोः परिग्रहस्य अभावात् याचनादिना शरीरस्थितौ कर्तव्यतायां प्राप्तायाम् 'अयाचितमसंक्लृप्तमुपपन्नं यदृच्छया' इत्यादिना वचनेन अनुज्ञातं यतेः शरीरस्थितिहेतोः अन्नादेः प्राप्तिद्वारम् आविष्कुर्वन् आह—

यदृच्छालाभसंतुष्टो द्वन्द्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥

यदृच्छालाभसंतुष्टः अप्रार्थितोपनतो लाभो यदृच्छालाभः तेन संतुष्टः संजातालंप्रत्ययः । द्वन्द्वातीतः द्वन्द्वैः

शीतोष्णादिभिः हन्यमानोऽपि अविषण्णचित्तः द्वन्द्वातीतः उच्यते । विमत्सरः विगतमत्सरः निर्वैरबुद्धिः समः तुल्यः यदृच्छालाभस्य सिद्धौ असिद्धौ च । यः एवंभूतो यतिः अन्नादेः शरीरस्थितिहेतोः लाभालाभयोः समः हर्षविषाद-वर्जितः कर्मादौ अकर्मादिदर्शी यथाभूतात्मदर्शननिष्ठः सन् शरीरस्थितिमात्रप्रयोजने भिक्षाटनादिकर्मणि शरीरादिनिर्वर्त्ये 'नैव किंचित् करोम्यहम्, गुणा गुणेषु वर्तन्ते' इत्येवं सदा संपरिचक्षाणः आत्मनः कर्तृत्वाभावं पश्यन्नैव किंचित् भिक्षाटनादिकं कर्म करोति, लोकव्यवहारसामान्यदर्शनेन तु लौकिकैः आरोपितकर्तृत्वे भिक्षाटनादौ कर्मणि कर्ता भवति । स्वानुभवेन तु शास्त्रप्रमाणादिजनितेन अकर्तैव । स एवं पराध्यारोपितकर्तृत्वः शरीरस्थितिमात्रप्रयोजनं भिक्षा-टनादिकं कर्म कृत्वापि न निबध्यते बन्धहेतोः कर्मणः सहेतुकस्य ज्ञानाग्निना दग्धत्वात् इति उक्तानुवाद एव एषः ॥

'त्यक्त्वा कर्मफलासङ्गम्' इत्यनेन श्लोकेन यः प्रारब्ध-कर्मा सन् यदा निष्क्रियब्रह्मात्मदर्शनसंपन्नः स्यात् तदा तस्य आत्मनः कर्तृकर्मप्रयोजनाभावदर्शिनः कर्मपरित्यागे प्राप्ते कुतश्चिन्निमित्तात् तदसंभवे सति पूर्ववत् तस्मिन् कर्मणि अभिप्रवृत्तस्य अपि 'नैव किंचित् करोति सः'

इति कर्माभावः प्रदर्शितः । यस्य एवं कर्माभावो दर्शितः तस्यैव—

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ २३ ॥

गतसङ्गस्य सर्वतोनिवृत्तासक्तेः, मुक्तस्य निवृत्तधर्माधर्मादिबन्धनस्य, ज्ञानावस्थितचेतसः ज्ञाने एव अवस्थितं चेतः यस्य सोऽयं ज्ञानावस्थितचेताः तस्य, यज्ञाय यज्ञनिर्वृत्त्यर्थम् आचरतः निर्वर्तयतः कर्म समग्रं सह अग्रेण फलेन वर्तते इति समग्रं कर्म तत् समग्रं प्रविलीयते विनश्यति इत्यर्थः ॥

कस्मात् पुनः कारणात् क्रियमाणं कर्म स्वकार्यारम्भम् अकुर्वत् समग्रं प्रविलीयते इत्युच्यते यतः—

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥ २४ ॥

ब्रह्म अर्पणं येन करणेन ब्रह्मवित् हविः अग्नौ अर्पयति तत् ब्रह्मैव इति पश्यति, तस्य आत्मव्यतिरेकेण अभावं पश्यति, यथा शुक्तिकायां रजताभावं पश्यति, तदुच्यते ब्रह्मैव अर्पणमिति, यथा यद्रजतं तत् शुक्तिकैवेति । 'ब्रह्म

अर्पणम्' इति असमस्ते पदे। यत् अर्पणबुद्धया गृह्यते लोके तत् अस्य ब्रह्मविदः ब्रह्मैव इत्यर्थः। ब्रह्म हविः तथा यत् हविर्बुद्धया गृह्यमाणं तत् ब्रह्मैव अस्य। तथा 'ब्रह्माग्नौ' इति समस्तं पदम्। अग्निरपि ब्रह्मैव यत्र हूयते ब्रह्मणा कर्त्रा, ब्रह्मैव कर्तेत्यर्थः। यत् तेन हुतं हवनक्रिया तत् ब्रह्मैव। यत् तेन गन्तव्यं फलं तदपि ब्रह्मैव ब्रह्मकर्मसमाधिना ब्रह्मैव कर्म ब्रह्मकर्म तस्मिन् समाधिः यस्य सः ब्रह्मकर्मसमाधिः तेन ब्रह्मकर्मसमाधिना ब्रह्मैव गन्तव्यम्॥

एवं लोकसंग्रहं चिकीर्षुणापि क्रियमाणं कर्म परमार्थतः अकर्म, ब्रह्मबुद्ध्युपमृदितत्वात्। एवं सति निवृत्तकर्मणोऽपि सर्वकर्मसंन्यासिनः सम्यग्दर्शनस्तुत्यर्थं यज्ञत्वसंपादनं ज्ञानस्य सुतरामुपपद्यते, यत् अर्पणादि अधियज्ञे प्रसिद्धं तत् अस्य अध्यात्मं ब्रह्मैव परमार्थदर्शिन इति। अन्यथा सर्वस्य ब्रह्मत्वे अर्पणादीनामेव विशेषतो ब्रह्मत्वाभिधानम् अनर्थकं स्यात्। तस्मात् ब्रह्मैव इदं सर्वमिति अभिजानतः विदुषः कर्माभावः। कारकबुद्ध्यभावाच्च। न हि कारकबुद्धिरहितं यज्ञाख्यं कर्म दृष्टम्। सर्वमेव अग्निहोत्रादिकं कर्म शब्दसमर्पितदेवताविशेषसंप्रदानादिकारकबुद्धिमत् कर्त्रभिमानफलाभिसंधिमच्च दृष्टम्, न उपमृदितक्रियाकारकफलभेदबुद्धिमत्

कर्तृत्वाभिमानफलाभिसंधिरहितं वा । इदं तु ब्रह्मबुद्ध्युपमृदितार्पणादिकारकक्रियाफलभेदबुद्धि कर्म । अतः अकर्मैव तत् । तथा च दर्शितम् 'कर्मण्यकर्म यः पश्येत्' 'कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः' 'गुणा गुणेषु वर्तन्ते' 'नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित्' इत्यादिभिः । तथा च दर्शयन् तत्र तत्र क्रियाकारकफलभेदबुद्ध्युपमर्दं करोति । दृष्टा च काम्याग्निहोत्रादौ कामोपमर्देन काम्याग्निहोत्रादिहानिः । तथा मतिपूर्वकामतिपूर्वकादीनां कर्मणां कार्यविशेषस्य आरम्भकत्वं दृष्टम् । तथा इहापि ब्रह्मबुद्ध्युपमृदितार्पणादिकारकक्रियाफलभेदबुद्धेः बाह्यचेष्टामात्रेण कर्मापि विदुषः अकर्म संपद्यते । अतः उक्तम् 'समग्रं प्रविलीयते' इति ॥

अत्र केचिदाहुः— यत् ब्रह्म तत् अर्पणादीनि, ब्रह्मैव किल अर्पणादिना पञ्चविधेन कारकात्मना व्यवस्थितं सत् तदेव कर्म करोति । तत्र न अर्पणादिबुद्धिः निवर्त्यते, किं तु अर्पणादिषु ब्रह्मबुद्धिः आधीयते; यथा प्रतिमादौ विष्ण्वादिबुद्धिः, यथा वा नामादौ ब्रह्मबुद्धिरिति ॥

सत्यम्, एवमपि स्यात् यदि ज्ञानयज्ञस्तुत्यर्थं प्रकरणं न स्यात् । अत्र तु सम्यग्दर्शनं ज्ञानयज्ञशब्दितम् अनेकान्

यज्ञशब्दितान् क्रियाविशेषान् उपन्यस्य 'श्रेयान् द्रव्यमया-द्यज्ञात् ज्ञानयज्ञः' इति ज्ञानं स्तौति। अत्र च समर्थमिदं वचनम् 'ब्रह्मार्पणम्' इत्यादि ज्ञानस्य यज्ञत्वसंपादने; अन्यथा सर्वस्य ब्रह्मत्वे अर्पणादीनामेव विशेषतो ब्रह्मत्वाभिधानमनर्थकं स्यात्। ये तु अर्पणादिषु प्रतिमायां विष्णुदृष्टिवत् ब्रह्मदृष्टिः क्षिप्यते नामादिष्विव चेति ब्रुवते न तेषां ब्रह्मविद्या उक्ता इह विवक्षिता स्यात्, अर्पणादिविषयत्वात् ज्ञानस्य। न च दृष्टिसंपादनज्ञानेन मोक्षफलं प्राप्यते। 'ब्रह्मैव तेन गन्तव्यम्' इति चोच्यते। विरुद्धं च सम्यग्दर्शनम् अन्तरेण मोक्षफलं प्राप्यते इति। प्रकृतविरोधश्च; सम्यग्दर्शनं च प्रकृतम् 'कर्मण्यकर्म यः पश्येत्' इत्यत्र, अन्ते च सम्यग्दर्शनम्, तस्यैव उपसंहारात्। 'श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः', 'ज्ञानं लब्ध्वा परां शान्तिम्' इत्यादिना सम्यग्दर्शनस्तुतिमेव कुर्वन् उपक्षीणः अध्यायः। तत्र अकस्मात् अर्पणादौ ब्रह्मदृष्टिः अप्रकरणे प्रतिमायामिव विष्णुदृष्टिः उच्यते इति अनुपपन्नम्। तस्मात् यथाव्याख्यातार्थ एव अयं श्लोकः॥

तत्र अधुना सम्यग्दर्शनस्य यज्ञत्वं संपाद्य तत्स्तुत्यर्थम् अन्येऽपि यज्ञा उपक्षिप्यन्ते—

दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥ २५ ॥

दैवमेव देवा इज्यन्ते येन यज्ञेन असौ दैवो यज्ञः तमेव अपरे यज्ञं योगिन कर्मिण पर्युपासते कुर्वन्तीत्यर्थः । ब्रह्माग्नौ 'सत्यं ज्ञानमनन्तं ब्रह्म' 'विज्ञानमानन्दं ब्रह्म' 'यत् साक्षादपरोक्षात् ब्रह्म य आत्मा सर्वान्तरः' इत्यादिवचनोक्तम् अशनायादिसर्वसंसारधर्मवर्जितम् 'नेति नेति' इति निरस्ताशेषविशेषं ब्रह्मशब्देन उच्यते । ब्रह्म च तत् अग्निश्च सः होमाधिकरणत्वविवक्षया ब्रह्माग्निः । तस्मिन् ब्रह्माग्नौ अपरे अन्ये ब्रह्मविदः यज्ञम्— यज्ञशब्दवाच्य आत्मा, आत्मनामसु यज्ञशब्दस्य पाठात्— तम् आत्मानं यज्ञं परमार्थतः परमेव ब्रह्म सन्तं बुद्ध्याद्युपाधिसंयुक्तम् अध्यस्तसर्वोपाधिधर्मकम् आहुतिरूपं यज्ञेनैव आत्मनैव उक्तलक्षणेन उपजुह्वति प्रक्षिपन्ति, सोपाधिकस्य आत्मनः निरुपाधिकेन परब्रह्मस्वरूपेणैव यद्दर्शनं स तस्मिन् होमः तं कुर्वन्ति ब्रह्मात्मैकत्वदर्शननिष्ठाः संन्यासिनः इत्यर्थः ॥

सोऽयं सम्यग्दर्शनलक्षणः यज्ञः दैवयज्ञादिषु यज्ञेषु उपक्षिप्यते 'ब्रह्मार्पणम्' इत्यादिश्लोकै· प्रस्तुतः 'श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परंतप' इत्यादिना स्तुत्यर्थम्—

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति ।
शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ॥

श्रोत्रादीनि इन्द्रियाणि अन्ये योगिनः संयमाग्निषु । प्रतीन्द्रियं संयमो भिद्यते इति बहुवचनम् । संयमा एव अग्नयः तेषु जुह्वति इन्द्रियसंयममेव कुर्वन्ति इत्यर्थः । शब्दादीन् विषयान् अन्ये इन्द्रियाग्निषु इन्द्रियाण्येव अग्नयः तेषु इन्द्रियाग्निषु जुह्वति श्रोत्रादिभिरविरुद्धविषयग्रहणं होमं मन्यन्ते ॥

किंच—

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥२७॥

सर्वाणि इन्द्रियकर्माणि इन्द्रियाणां कर्माणि इन्द्रियकर्माणि, तथा प्राणकर्माणि प्राणो वायुः आध्यात्मिकः तत्कर्माणि आकुञ्चनप्रसारणादीनि तानि च अपरे आत्मसंयमयोगाग्नौ आत्मनि संयमः आत्मसंयमः स एव योगाग्निः तस्मिन् आत्मसंयमयोगाग्नौ जुह्वति प्रक्षिपन्ति ज्ञानदीपिते स्नेहेनेव प्रदीपे विवेकविज्ञानेन उज्ज्वलभावम् आपादिते जुह्वति प्रविलापयन्ति इत्यर्थः ॥

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥२८॥

द्रव्ययज्ञाः तीर्थेषु द्रव्यविनियोगं यज्ञबुद्ध्या कुर्वन्ति ये ते द्रव्ययज्ञाः । तपोयज्ञाः तपः यज्ञः येषां तपस्विना ते तपोयज्ञाः । योगयज्ञाः प्राणायामप्रत्याहारादिलक्षणो योगो यज्ञो येषा ते योगयज्ञाः । तथा अपरे स्वाध्यायज्ञान-यज्ञाश्च स्वाध्यायः यथाविधि ऋगाद्यभ्यासः यज्ञः येषां ते स्वाध्याययज्ञाः । ज्ञानयज्ञाः ज्ञानं शास्त्रार्थपरिज्ञानं यज्ञ. येषां ते ज्ञानयज्ञाश्च यतय. यतनशीलाः संशितव्रताः सम्यक् शितानि तनूकृतानि तीक्ष्णीकृतानि व्रतानि येषां ते संशितव्रताः ॥

किच—

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥ २९ ॥

अपाने अपानवृत्तौ जुह्वति प्रक्षिपन्ति प्राणं प्राणवृत्तिम्, पूरकाख्यं प्राणायामं कुर्वन्तीत्यर्थः । प्राणे अपानं तथा अपरे जुह्वति, रेचकाख्यं च प्राणायामं कुर्वन्तीत्येतत् । प्राणापानगती मुखनासिकाभ्यां वायो निर्गमनं प्राणस्य

गतिः, तद्विपर्ययेण अधोगमनम् अपानस्य गतिः, ते प्राणापानगती एते रुद्ध्वा निरुध्य प्राणायामपरायणाः प्राणायामतत्पराः; कुम्भकाख्यं प्राणायामं कुर्वन्तीत्यर्थः ॥

किंच—

अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥

अपरे नियताहाराः नियतः परिमितः आहारः येषां ते नियताहाराः सन्तः प्राणान् वायुभेदान् प्राणेषु एव जुह्वति यस्य यस्य वायोः जयः क्रियते इतरान् वायुभेदान् तस्मिन् तस्मिन् जुह्वति, ते तत्र प्रविष्टा इव भवन्ति । सर्वेऽपि एते यज्ञविदः यज्ञक्षपितकल्मषाः यज्ञैः यथोक्तैः क्षपितः नाशितः कल्मषो येषां ते यज्ञक्षपितकल्मषा ॥

एवं यथोक्तान् यज्ञान् निर्वर्त्य—

यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥

यज्ञशिष्टामृतभुजः यज्ञानां शिष्टं यज्ञशिष्टं यज्ञशिष्टं च तत् अमृतं च यज्ञशिष्टामृतं तत् भुञ्जते इति यज्ञशिष्टामृतभुजः । यथोक्तान् यज्ञान् कृत्वा तच्छिष्टेन कालेन यथावि-

धिचोदितम् अन्नम् अमृताख्यं भुञ्जते इति यज्ञशिष्टामृतभुजः यान्ति गच्छन्ति ब्रह्म सनातनं चिरन्तनं मुमुक्षवश्चेत्, कालातिक्रमापेक्षया इति सामर्थ्यात् गम्यते । न अयं लोक सर्वप्राणिसाधारणोऽपि अस्ति यथोक्तानां यज्ञानां एकोऽपि यज्ञः यस्य नास्ति सः अयज्ञ. तस्य । कुतः अन्यो विशिष्टसाधनसाध्यः कुरुसत्तम ॥

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥

एवं यथोक्ता बहुविधा बहुप्रकारा यज्ञा. विततां. विस्तीर्णाः ब्रह्मणो वेदस्य मुखे द्वारे वेदद्वारेण अवगम्यमाना. ब्रह्मणो मुखे विततां उच्यन्ते; तद्यथा 'वाचि हि प्राणं जुहुमः' इत्यादयः । कर्मजान् कायिकवाचिकमानसकर्मोद्भवान् विद्धि तान् सर्वान् अनात्मजान्, निर्व्यापारो हि आत्मा । अत एवं ज्ञात्वा विमोक्ष्यसे अशुभात् । न मद्व्यापारा इमे, निर्व्यापारोऽहम् उदासीन इत्येवं ज्ञात्वा अस्मात् सम्यग्दर्शनात् मोक्ष्यसे संसारबन्धनात् इत्यर्थः ॥

'ब्रह्मार्पणम्' इत्यादिश्लोकेन सम्यग्दर्शनस्य यज्ञत्वं संपादितम् । यज्ञाश्च अनेके उपदिष्टाः । तैः सिद्धपुरुषार्थप्रयोजनैः ज्ञानं स्तूयते । कथम्?—

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥३३॥

श्रेयान् द्रव्यमयात् द्रव्यसाधनसाध्यात् यज्ञात् ज्ञानयज्ञः हे परंतप । द्रव्यमयो हि यज्ञः फलस्यारम्भकः, ज्ञानयज्ञ. न फलारम्भकः, अत. श्रेयान् प्रशस्यतर. । कथम्? यतः सर्वं कर्म समस्तम् अखिलम् अप्रतिबद्धं पार्थ ज्ञाने मोक्षसाधने सर्वतःसंप्लुतोदकस्थानीये परिसमाप्यते अन्तर्भवतीत्यर्थ. 'यथा कृताय विजितायाधरेयाः संयन्त्येवमेनं सर्वं तदभिसमेति यत् किंचित्प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद' इति श्रुतेः ॥

तदेतत् विशिष्टं ज्ञानं तर्हि केन प्राप्यते इत्युच्यते—

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥३४॥

तत् विद्धि विजानीहि येन विधिना प्राप्यते इति । आचार्यान् अभिगम्य, प्रणिपातेन प्रकर्षेण नीचैः पतनं प्रणिपातः दीर्घनमस्कारः तेन, 'कथं बन्धः? कथं मोक्षः? का विद्या? का चाविद्या?' इति परिप्रश्नेन, सेवया गुरुशुश्रूषया एवमादिना । प्रश्रयेण आवर्जिता आचार्या उपदेक्ष्यन्ति कथयिष्यन्ति ते

ज्ञानं यथोक्तविशेषणं ज्ञानिनः । ज्ञानवन्तोऽपि केचित् यथावत् तत्त्वदर्शनशीलाः, अपरे न, अतो विशिनष्टि तत्त्वदर्शिनः इति । ये सम्यग्दर्शिनः तैः उपदिष्टं ज्ञानं कार्यक्षमं भवति नेतरत् इति भगवतो मतम् ॥

तथा च सति इदमपि समर्थं वचनम्—

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥

यत् ज्ञात्वा यत् ज्ञानं तैः उपदिष्टं अधिगम्य प्राप्य पुनः भूयः मोहम् एवं यथा इदानीं मोहं गतोऽसि पुनः एवं न यास्यसि हे पाण्डव । किंच—येन ज्ञानेन भूतानि अशेषेण ब्रह्मादीनि स्तम्बपर्यन्तानि द्रक्ष्यसि साक्षात् आत्मनि प्रत्यगात्मनि 'मत्संस्थानि इमानि भूतानि' इति अथो अपि मयि वासुदेवे 'परमेश्वरे च इमानि' इति; क्षेत्रज्ञेश्वरैकत्वं सर्वोपनिषत्प्रसिद्धं द्रक्ष्यसि इत्यर्थः ॥

किंच एतस्य ज्ञानस्य माहात्म्यम्—

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ ३६ ॥

अपि चेत् असि पापेभ्यः पापकृद्भ्यः सर्वेभ्यः अति-

शयेन पापकृत् पापकृत्तमः सर्वं ज्ञानप्लवेनैव ज्ञानमेव प्लवं कृत्वा वृजिनं वृजिनार्णवं पापसमुद्रं संतरिष्यसि। धर्मोऽपि इह मुमुक्षोः पापम् उच्यते ॥

ज्ञानं कथं नाशयति पापमिति दृष्टान्त उच्यते—

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥

यथा एधांसि काष्ठानि समिद्ध. सम्यक् इद्धः दीप्त· अग्नि. भस्मसात् भस्मीभावं कुरुते हे अर्जुन, ज्ञानमेव अग्निः ज्ञानाग्नि· सर्वकर्माणि भस्मसात् कुरुते तथा निर्बीजीकरोतीत्यर्थः। न हि साक्षादेव ज्ञानाग्नि. कर्माणि इन्धनवत् भस्मीकर्तुं शक्नोति। तस्मात् सम्यग्दर्शनं सर्वकर्मणां निर्बीजत्वे कारणम् इत्यभिप्राय.। सामर्थ्यात् येन कर्मणा शरीरम् आरब्धं तत् प्रवृत्तफलत्वात् उपभोगेनैव क्षीयते। अतो यानि अप्रवृत्तफलानि ज्ञानोत्पत्ते. प्राक् कृतानि ज्ञानसहभावीनि च अतीतानेकजन्मकृतानि च तान्येव सर्वाणि भस्मसात् कुरुते ॥

यतः एवम् अत.—

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥

न हि ज्ञानेन सदृशं तुल्यं पवित्रं पावनं शुद्धिकरम् इह विद्यते । तत् ज्ञानं स्वयमेव योगसंसिद्ध. योगेन कर्मयोगेन समाधियोगेन च संसिद्धः संस्कृतः योग्यताम् आपन्नः सन् मुमुक्षुः कालेन महता आत्मनि विन्दति लभते इत्यर्थ ॥

येन एकान्तेन ज्ञानप्राप्ति. भवति स उपायः उपदिश्यते—

श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥

श्रद्धावान् श्रद्धालुः लभते ज्ञानम् । श्रद्धालुत्वेऽपि भवति कश्चित् मन्दप्रस्थानः, अत आह—तत्परः, गुरूपसदनादौ अभियुक्त. ज्ञानलब्ध्युपाये श्रद्धावान् । तत्परः अपि अजितेन्द्रियः स्यात् इत्यतः आह— संयतेन्द्रियः, संयतानि विषयेभ्यो निवर्तितानि यस्य इन्द्रियाणि स संयतेन्द्रियः । य एवंभूतः श्रद्धावान् तत्परः संयतेन्द्रियश्च सः अवश्यं ज्ञानं लभते । प्रणिपातादिस्तु बाह्योऽनैकान्तिकोऽपि भवति, मायावित्वादिसंभवात्, न तु तत् श्रद्धावत्त्वादौ इत्येकान्ततः ज्ञानलब्ध्युपाय. । कि पुनः ज्ञानलाभात् स्यात् इत्युच्यते— ज्ञानं लब्ध्वा परां मोक्षाख्यां शान्तिम् उपरतिम्

अचिरेण क्षिप्रमेव अधिगच्छति । सम्यग्दर्शनात् क्षिप्रमेव मोक्षो भवतीति सर्वशास्त्रन्यायप्रसिद्धः सुनिश्चितः अर्थः ॥

अत्र संशय. न कर्तव्यः, पापिष्ठो हि संशयः; कथम् इति उच्यते—

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥

अज्ञश्च अनात्मज्ञश्च अश्रद्दधानश्च गुरुवाक्यशास्त्रेषु अविश्वासवांश्च संशयात्मा च संशयचित्तश्च विनश्यति । अज्ञाश्रद्दधानौ यद्यपि विनश्यतः, न तथा यथा संशयात्मा । संशयात्मा तु पापिष्ठः सर्वेषाम् । कथम्? नायं साधारणोऽपि लोकोऽस्ति । तथा न परः लोकः । न सुखम्, तत्रापि संशयोत्पत्तेः संशयात्मनः संशयचित्तस्य । तस्मात् संशयो न कर्तव्यः ॥

कस्मात्?—

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनंजय ॥४१॥

योगसंन्यस्तकर्माणं परमार्थदर्शनलक्षणेन योगेन संन्यस्तानि कर्माणि येन परमार्थदर्शिना धर्माधर्माख्यानि तं

योगसंन्यस्तकर्माणम् । कथं योगसंन्यस्तकर्मेत्याह— ज्ञान-संछिन्नसंशयं ज्ञानेन आत्मेश्वरैकत्वदर्शनलक्षणेन संछिन्नः संशयो यस्य स. ज्ञानसंछिन्नसंशयः । य एवं योगसंन्यस्त-कर्मा तम् आत्मवन्तम् अप्रमत्तं गुणचेष्टारूपेण दृष्टानि कर्माणि न निबध्नन्ति अनिष्टादिरूपं फलं नारभन्ते हे धनंजय ॥

यस्मात् कर्मयोगानुष्ठानात् अशुद्धिक्षयहेतुकज्ञानसंछि-न्नसंशयः न निबध्यते कर्मभिः ज्ञानाग्निदग्धकर्मत्वादेव, यस्माच्च ज्ञानकर्मानुष्ठानविषये संशयवान् विनश्यति—

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां
भीष्मपर्वणि श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम
चतुर्थोऽध्यायः ॥

तस्मात् पापिष्ठम् अज्ञानसंभूतम् अज्ञानात् अविवेकात् जातं हृत्स्थं हृदि बुद्धौ स्थितं ज्ञानासिना शोकमोहादिदोष-हरं सम्यग्दर्शनं ज्ञानं तदेव असिः खड्गः तेन ज्ञानासिना

आत्मनः स्वस्य, आत्मविषयत्वात् संशयस्य । न हि परस्य संशयः परेण च्छेत्तव्यतां प्राप्तः, येन स्वस्येति विशेष्येत । अतः आत्मविषयोऽपि स्वस्यैव भवति । छित्त्वा एनं संशयं स्वविनाशहेतुभूतम्, योगं सम्यग्दर्शनोपायं कर्मानुष्ठानम् आतिष्ठ कुर्वित्यर्थः । उत्तिष्ठ च इदानीं युद्धाय भारत इति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपाद-शिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये

चतुर्थोऽध्यायः ॥



श्रीमच्छंकरभगवत्पादविरचितम्

श्रीमद्भगवद्गीताभाष्यम्

पञ्चमोऽध्यायः

पञ्चमोऽध्यायः ॥



'कर्मण्यकर्म य· पश्येत्' इत्यारभ्य 'स युक्त. कृत्स्नकर्मकृत्' 'ज्ञानाग्निदग्ध-कर्माणम्' 'शारीरं केवलं कर्म कुर्वन्' 'यदृच्छालाभसंतुष्ट.' 'ब्रह्मार्पणं ब्रह्म हवि·' 'कर्मजान् विद्धि तान् सर्वान्' 'सर्वं कर्माखिलं पार्थ' 'ज्ञानाग्नि. सर्वकर्माणि' 'योगसंन्यस्तकर्माणम्' इत्येतैः वचनैः सर्वक-र्मसंन्यासम् अवोचत् भगवान्। 'छित्त्वैनं संशयं योगमा-तिष्ठ' इत्यनेन वचनेन योगं च कर्मानुष्ठानलक्षणम् अनु-तिष्ठ इत्युक्तवान्। तयोरुभयोश्च कर्मानुष्ठानकर्मसंन्यासयो. स्थितिगतिवत् परस्परविरोधात् एकेन सह कर्तुमशक्यत्वात्, कालभेदेन च अनुष्ठानविधानाभावात्, अर्थात् एतयो. अन्य-तरकर्तव्यताप्राप्तौ सत्यां यत् प्रशस्यतरम् एतयोः कर्मानुष्ठा-नकर्मसंन्यासयोः तत् कर्तव्यं न इतरत् इत्येवं मन्यमान.

प्रशस्यतरबुभुत्सया अर्जुन उवाच—'संन्यासं कर्मणां कृष्ण' इत्यादिना ॥

ननु च आत्मविद. ज्ञानयोगेन निष्ठां प्रतिपिपादयिषन् पूर्वोदाहृतैः वचनै भगवान् सर्वकर्मसंन्यासम् अवोचत्, न तु अनात्मज्ञस्य। अतश्च कर्मानुष्ठानकर्मसन्यासयोः भिन्नपुरुषविषयत्वात् अन्यतरस्य प्रशस्यतरत्वबुभुत्सया अय प्रश्न. अनुपपन्नः। सत्यमेव त्वदभिप्रायेण प्रश्नो न उपपद्यते; प्रष्टुः स्वाभिप्रायेण पुनः प्रश्नः युज्यत एवेति वदामः। कथम्? पूर्वोदाहृतैः वचनै. भगवता कर्मसंन्यासस्य कर्तव्यतया विवक्षितत्वात्, प्राधान्यमन्तरेण च कर्तरि तस्य कर्तव्यत्वासंभवात् अनात्मविदपि कर्ता पक्षे प्राप्त अनूद्यत एव, न पुन. आत्मवित्कर्तृकत्वमेव संन्यासस्य विवक्षितम्, इत्येवं मन्वानस्य अर्जुनस्य कर्मानुष्ठानकर्मसंन्यासयोः अविद्वत्पुरुषकर्तृकत्वमपि अस्तीति पूर्वोक्तेन प्रकारेण तयो. परस्परविरोधात् अन्यतरस्य कर्तव्यत्वे प्राप्ते प्रशस्यतरं च कर्तव्यम् न इतरत् इति प्रशस्यतरविविदिषया प्रश्नः न अनुपपन्नः ॥

प्रतिवचनवाक्यार्थनिरूपणेनापि प्रष्टुः अभिप्रायः एवमेवेति गम्यते। कथम्? 'संन्यासकर्मयोगौ निःश्रेयसकरौ

तयोस्तु कर्मयोगो विशिष्यते' इति प्रतिवचनम् । एतत् निरूप्यम्— किम् अनेन आत्मवित्कर्तृकयो. संन्यासकर्मयोगयो. निःश्रेयसकरत्वं प्रयोजनम् उक्त्वा तयोरेव कुतश्चित् विशेषात् कर्मसंन्यासात् कर्मयोगस्य विशिष्टत्वम् उच्यते? आहोस्वित् अनात्मवित्कर्तृकयोः सन्यासकर्मयोगयोः तदुभयम् उच्यते? इति । किचातः— यदि आत्मवित्कर्तृकयोः कर्मसन्यासकर्मयोगयोः निःश्रेयसकरत्वम्, तयोस्तु कर्मसंन्यासात् कर्मयोगस्य विशिष्टत्वम् उच्यते; यदि वा अनात्मवित्कर्तृकयोः संन्यासकर्मयोगयोः तदुभयम् उच्यते इति । अत्र उच्यते— आत्मवित्कर्तृकयोः संन्यासकर्मयोगथो. असंभवात् तयोः नि.श्रेयसकरत्ववचनं तदीयाच्च कर्मसंन्यासात् कर्मयोगस्य विशिष्टत्वाभिधानम् इत्येतत् उभयम् अनुपपन्नम् । यदि अनात्मविदः कर्मसन्यासः तत्प्रतिकूलश्च कर्मानुष्ठानलक्षणः कर्मयोग. संभवेताम्, तदा तयोः निःश्रेयसकरत्वोक्ति. कर्मयोगस्य च कर्मसंन्यासात् विशिष्टत्वाभिधानम् इत्येतत् उभयम् उपपद्येत । आत्मविदस्तु संन्यासकर्मयोगयोः असंभवात् तयोः नि.श्रेयसकरत्वाभिधानं कर्मसंन्यासाच्च कर्मयोगः विशिष्यते इति च अनुपपन्नम् ॥

अत्र आह— किम् आत्मविदः संन्यासकर्मयोगयोः उभयोरपि असंभवः? आहोस्वित् अन्यतरस्य असंभवः? यदा च अन्यतरस्य असंभवः, तदा कि कर्मसंन्यासस्य, उत कर्मयोगस्य? इति, असंभवे कारणं च वक्तव्यम् इति। अत्र उच्यते— आत्मविदः निवृत्तमिथ्याज्ञानत्वात् विपर्ययज्ञानमूलस्य कर्मयोगस्य असंभवः स्यात्। जन्मादिसर्वविक्रियारहितत्वेन निष्क्रियम् आत्मानम् आत्मत्वेन यो वेत्ति तस्य आत्मविदः सम्यग्दर्शनेन अपास्तमिथ्याज्ञानस्य निष्क्रियात्मस्वरूपावस्थानलक्षणं सर्वकर्मसंन्यासम् उक्त्वा तद्विपरीतस्य मिथ्याज्ञानमूलकर्तृत्वाभिमानपुरःसरस्य सक्रियात्मस्वरूपावस्थानरूपस्य कर्मयोगस्य इह गीताशास्त्रे तत्र तत्र आत्मस्वरूपनिरूपणप्रदेशेषु सम्यग्ज्ञानमिथ्याज्ञानतत्कार्यविरोधात् अभावः प्रतिपाद्यते यस्मात्, तस्मात् आत्मविदः निवृत्तमिथ्याज्ञानस्य विपर्ययज्ञानमूलः कर्मयोगो न संभवतीति युक्तम् उक्तं स्यात्॥

केषु केषु पुनः आत्मस्वरूपनिरूपणप्रदेशेषु आत्मविद कर्माभावः प्रतिपाद्यते इति अत्र उच्यते— 'अविनाशि तु तत्' इति प्रकृत्य 'य एनं वेत्ति हन्तारम्' 'वेदाविनाशिनं नित्यम्' इत्यादौ तत्र तत्र आत्मविदः कर्माभावः उच्यते॥

ननु च कर्मयोगोऽपि आत्मस्वरूपनिरूपणप्रदेशेषु तत्र तत्र प्रतिपाद्यते एव; तद्यथा— 'तस्माद्युध्यस्व भारत' 'स्वधर्ममपि चावेक्ष्य' 'कर्मण्येवाधिकारस्ते' इत्यादौ। अतश्च कथम् आत्मविद्. कर्मयोगस्य असंभवः स्यादिति? अत्र उच्यते— सम्यग्ज्ञानमिथ्याज्ञानतत्कार्यविरोधात्, 'ज्ञानयोगेन सांख्यानाम्' इत्यनेन सांख्यानाम् आत्मतत्त्वविदाम् अनात्मवित्कर्तृककर्मयोगनिष्ठातः निष्क्रियात्मस्वरूपावस्थानलक्षणायाः ज्ञानयोगनिष्ठाया पृथक्करणात्, कृतकृत्यत्वेन आत्मविदः प्रयोजनान्तराभावात्, 'तस्य कार्यं न विद्यते' इति कर्तव्यान्तराभाववचनाच्च, 'न कर्मणामनारम्भात्' 'संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः' इत्यादिना च आत्मज्ञानाङ्गत्वेन कर्मयोगस्य विधानात्, 'योगारूढस्य तस्यैव शमः कारणमुच्यते' इत्यनेन च उत्पन्नसम्यग्दर्शनस्य कर्मयोगाभाववचनात्, शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्' इति च शरीरस्थितिकारणातिरिक्तस्य कर्मणो निवारणात्, 'नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित्' इत्यनेन च शरीरस्थितिमात्रप्रयुक्तेष्वपि दर्शनश्रवणादिकर्मसु आत्मयाथात्म्यविदः 'करोमि' इति प्रत्ययस्य समाहितचेतस्तया सदा अकर्तव्यत्वोपदेशात् आत्मतत्त्वविदः सम्यग्दर्शनविरुद्धो मिथ्याज्ञान-

हेतुकः कर्मयोगः स्वप्नेऽपि न सम्भवितुं शक्यते यस्मात्, तस्मात् अनात्मवित्कर्तृकयोरेव संन्यासकर्मयोगयोः निःश्रेयसकरत्ववचनम्, तदीयाच्च कर्मसंन्यासात् पूर्वोक्तात्मवित्कर्तृकसर्वकर्मसंन्यासविलक्षणात् सत्येव कर्तृत्वविज्ञाने कर्मैकदेशविषयात् यमनियमादिसहितत्वेन च दुरनुष्ठेयात् सुकरत्वेन च कर्मयोगस्य विशिष्टत्वाभिधानम् इत्येवं प्रतिवचनवाक्यार्थनिरूपणेनापि पूर्वोक्तः प्रष्टुरभिप्रायः निश्चीयते इति स्थितम् ॥

'ज्यायसी चेत्कर्मणस्ते' इत्यत्र ज्ञानकर्मणो. सह असंभवे 'यच्छ्रेय एतयोः तद्ब्रूहि' इत्येवं पृष्टोऽर्जुनेन भगवान् सांख्यानां संन्यासिनां ज्ञानयोगेन निष्ठा पुनः कर्मयोगेन योगिनां निष्ठा प्रोक्तेति निर्णयं चकार। 'न च संन्यसनादेव केवलात् सिद्धि समधिगच्छति' इति वचनात् ज्ञानसहितस्य सिद्धिसाधनत्वम् इष्टम्, कर्मयोगस्य च, विधानात्। ज्ञानरहितस्य संन्यास श्रेयान्, किं वा कर्मयोगः श्रेयान्?' इति एतयोः विशेषबुभुत्सया—

अर्जुन उवाच—

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १॥

संन्यासं परित्यागं कर्मणां शास्त्रीयाणाम् अनुष्ठेयविशेषाणां शंससि प्रशंससि कथयसि इत्येतत् । पुनः योगं च तेषामेव अनुष्ठानम् अवश्यकर्तव्यं शंससि । अतः मे कतरत् श्रेय. इति संशय — कि कर्मानुष्ठानं श्रेयः, कि वा तद्धानम् इति । प्रशस्यतरं च अनुष्ठेयम् । अतश्च यत् श्रेय प्रशस्यतरम् एतयोः कर्मसंन्यासकर्मयोगयोः यदनुष्ठानात् श्रेयोवाप्तिः मम स्यादिति मन्यसे, तत् एकम् अन्यतरत् सह एकपुरुषानुष्ठेयत्वासंभवात् मे ब्रूहि सुनिश्चितम् अभिप्रेतं तवेति ॥

स्वाभिप्रायम् आचक्षाणो निर्णयाय श्रीभगवानुवाच—

श्रीभगवानुवाच—

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥

संन्यास. कर्मणां परित्यागः कर्मयोगश्च तेषामनुष्ठानं तौ उभौ अपि निःश्रेयसकरौ मोक्षं कुर्वाते ज्ञानोत्पत्तिहेतुत्वेन । उभौ यद्यपि निःश्रेयसकरौ, तथापि तयोस्तु निःश्रेयसहेत्वोः कर्मसंन्यासात् केवलात् कर्मयोगो विशिष्यते इति कर्मयोगं स्तौति ॥

कस्मात् इति आह—

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥

ज्ञेयः ज्ञातव्यः स कर्मयोगी नित्यसंन्यासी इति यो न द्वेष्टि किंचित् न काङ्क्षति दुःखसुखे तत्साधने च । एवंविधो यः, कर्मणि वर्तमानोऽपि स नित्यसंन्यासी इति ज्ञातव्यः इत्यर्थः । निर्द्वन्द्वः द्वन्द्ववर्जितः हि यस्मात् महाबाहो सुखं बन्धात् अनायासेन प्रमुच्यते ॥

संन्यासकर्मयोगयोः भिन्नपुरुषानुष्ठेययोः विरुद्धयोः फलेऽपि विरोधो युक्त, न तु उभयोः निःश्रेयसकरत्वमेव इति प्राप्ते इदम् उच्यते—

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥४॥

सांख्ययोगौ पृथक् विरुद्धभिन्नफलौ बालाः प्रवदन्ति न पण्डिताः । पण्डितास्तु ज्ञानिन एकं फलम् अविरुद्धम् इच्छन्ति । कथम्? एकमपि सांख्ययोगयोः सम्यक् आस्थितः सम्यगनुष्ठितवान् इत्यर्थः, उभयोः विन्दते फलम् । उभयोः तदेव हि निःश्रेयसं फलम्, अतः न फले विरोधः अस्ति ॥

ननु संन्यासकर्मयोगशब्देन प्रस्तुत्य सांख्ययोगयोः फलैकत्वं कथम् इह अप्रकृतं ब्रवीति? नैष दोष.— यद्यपि अर्जुनेन संन्यासं कर्मयोगं च केवलम् अभिप्रेत्य प्रश्नः कृतः, भगवांस्तु तदपरित्यागेनैव स्वाभिप्रेतं च विशेषं संयोज्य शब्दान्तरवाच्यतया प्रतिवचनं ददौ 'सांख्ययोगौ' इति । तौ एव संन्यासकर्मयोगौ ज्ञानतदुपायसमबुद्धित्वादिसंयुक्तौ सांख्ययोगशब्दवाच्यौ इति भगवतो मतम् । अतः न अप्रकृतप्रक्रियेति ॥

एकस्यापि सम्यगनुष्ठानात् कथम् उभयोः फलं विन्दते इति उच्यते—

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥

यत् सांख्यैः ज्ञाननिष्ठै. संन्यासिभिः प्राप्यते स्थानं मोक्षाख्यम्, तत् योगैरपि ज्ञानप्राप्त्युपायत्वेन ईश्वरे समर्प्य कर्माणि आत्मनः फलम् अनभिसंधाय अनुतिष्ठन्ति ये ते योगा. योगिनः तैरपि परमार्थज्ञानसंन्यासप्राप्तिद्वारेण गम्यते इत्यभिप्रायः । अतः एकं सांख्यं च योगं च यः पश्यति फलैकत्वात् स पश्यति सम्यक् पश्यतीत्यर्थः ॥

एवं तर्हि योगात् संन्यास एव विशिष्यते, कथं तर्हि इदमुक्तम् 'तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते' इति? शृणु तत्र कारणम्— त्वया पृष्टं केवलं कर्मसंन्यासं कर्मयोगं च अभिप्रेत्य तयो अन्यतर. क. श्रेयान् इति। तदनुरूपं प्रतिवचनं मया उक्तं कर्मसंन्यासात् कर्मयोग विशिष्यते इति ज्ञानम् अनपेक्ष्य। ज्ञानापेक्षस्तु संन्यास सांख्यमिति मया अभिप्रेतः। परमार्थयोगश्च स एव। यस्तु कर्मयोगः वैदिकः स च तादर्थ्यात् योगः संन्यास इति च उपचर्यते। कथं तादर्थ्यम् इति उच्यते—

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः।
योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥ ६ ॥

संन्यासस्तु पारमार्थिकः हे महाबाहो दुःखम् आप्तुं प्राप्तुम् अयोगत योगेन विना। योगयुक्तः वैदिकेन कर्मयोगेन ईश्वरसमर्पितरूपेण फलनिरपेक्षेण युक्तः, मुनिः मननात् ईश्वरस्वरूपस्य मुनि., ब्रह्म— परमात्मज्ञाननिष्ठालक्षणत्वात् प्रकृतः संन्यासः ब्रह्म उच्यते, 'न्यास इति ब्रह्मा ब्रह्मा हि परः' इति श्रुतेः— ब्रह्म परमार्थसंन्यासं परमार्थज्ञाननिष्ठालक्षणं नचिरेण क्षिप्रमेव अधिगच्छति प्राप्नोति। अतः मया उक्तम् 'कर्मयोगो विशिष्यते' इति ॥

यदा पुनः अयं सम्यग्ज्ञानप्राप्त्युपायत्वेन—

योगयुक्तो विशुद्धात्मा
विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा
कुर्वन्नपि न लिप्यते ॥ ७ ॥

योगेन युक्तः योगयुक्तः, विशुद्धात्मा विशुद्धसत्त्वः, विजितात्मा विजितदेह., जितेन्द्रियश्च, सर्वभूतात्मभूतात्मा सर्वेषां ब्रह्मादीनां स्तम्बपर्यन्तानां भूतानाम् आत्मभूतः आत्मा प्रत्यक्चेतनो यस्य सः सर्वभूतात्मभूतात्मा सम्यग्दर्शीत्यर्थः, स तत्रैवं वर्तमानः लोकसंग्रहाय कर्म कुर्वन्नपि न लिप्यते न कर्मभिः बध्यते इत्यर्थः ॥

न च असौ परमार्थतः करोतीत्यतः—

नैव किंचित्करोमीति
युक्तो मन्येत तत्त्ववित् ।
पश्यञ्शृण्वन्स्पृशञ्जिघ्र-
न्नश्नन्गच्छन्स्वपञ्श्वसन् ॥ ८ ॥

प्रलपन् विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥ ९ ॥

नैव किंचित् करोमीति युक्तः समाहितः सन् मन्येत चिन्तयेत्, तत्त्ववित् आत्मनो याथात्म्यं तत्त्वं वेत्तीति तत्त्ववित् परमार्थदर्शीत्यर्थः ॥

कदा कथं वा तत्त्वमवधारयन् मन्येत इति, उच्यते— पश्यन्निति । मन्येत इति पूर्वेण संबन्धः । यस्य एवं तत्त्वविदः सर्वकार्यकरणचेष्टासु कर्मसु अकर्मैव, पश्यतः सम्यग्दर्शिनः तस्य सर्वकर्मसंन्यासे एव अधिकारः, कर्मणः अभावदर्शनात् । न हि मृगतृष्णिकायाम् उदकबुद्ध्या पानाय प्रवृत्तः उदकाभावज्ञानेऽपि तत्रैव पानप्रयोजनाय प्रवर्तते ॥

यस्तु पुनः अतत्त्ववित् प्रवृत्तश्च कर्मयोगे—

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ १० ॥

ब्रह्मणि ईश्वरे आधाय निक्षिप्य 'तदर्थं कर्म करोमि' इति भृत्य इव स्वाम्यर्थं सर्वाणि कर्माणि मोक्षेऽपि फले सङ्गं त्यक्त्वा करोति यः सर्वकर्माणि, लिप्यते न स पापेन न संबध्यते पद्मपत्रमिव अम्भसा उदकेन । केवलं सत्त्वशुद्धिमात्रमेव फलं तस्य कर्मणः स्यात् ॥

यस्मात्—

कायेन मनसा बुद्धया केवलैरिन्द्रियैरपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥

कायेन देहेन मनसा बुद्धया च केवलैः ममत्ववर्जितैः 'ईश्वरायैव कर्म करोमि, न मम फलाय' इति ममत्वबुद्धिशून्यैः इन्द्रियैरपि— केवलशब्दः कायादिभिरपि प्रत्येकं संबध्यते—सर्वव्यापारेषु ममतावर्जनाय । योगिनः कर्मिणः कर्म कुर्वन्ति सङ्गं त्यक्त्वा फलविषयम् आत्मशुद्धये सत्त्वशुद्धये इत्यर्थः । तस्मात् तत्रैव तव अधिकारः इति कुरु कर्मैव ॥

यस्माच्च—

युक्तः कर्मफलं त्यक्त्वा
शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण
फले सक्तो निबध्यते ॥ १२ ॥

युक्तः 'ईश्वराय कर्माणि करोमि न मम फलाय' इत्येवं समाहितः सन् कर्मफलं त्यक्त्वा परित्यज्य शान्तिं मोक्षाख्याम् आप्नोति नैष्ठिकीं निष्ठायां भवां सत्त्वशुद्धिज्ञानप्राप्तिसर्वकर्मसंन्यासज्ञाननिष्ठाक्रमेणेति वाक्यशेषः । यस्तु पुनः अयुक्तः असमाहितः कामकारेण करणं कारः कामस्य

कारः कामकारः तेन कामकारेण, कामप्रेरिततयेत्यर्थः, 'मम फलाय इदं करोमि कर्म' इत्येवं फले सक्तः निबध्यते। अतः त्वं युक्तो भव इत्यर्थः ॥

यस्तु परमार्थदर्शी स.—

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥ १३ ॥

सर्वाणि कर्माणि सर्वकर्माणि संन्यस्य परित्यज्य नित्यं नैमित्तिकं काम्यं प्रतिषिद्धं च तानि सर्वाणि कर्माणि मनसा विवेकबुद्धया, कर्मादौ अकर्मसंदर्शनेन संत्यज्येत्यर्थः, आस्ते तिष्ठति सुखम्। त्यक्तवाङ्मनःकायचेष्टः निरायासः प्रसन्नचित्तः आत्मनः अन्यत्र निवृत्तसर्वबाह्यप्रयोजन. इति 'सुखम् आस्ते' इत्युच्यते। वशी जितेन्द्रिय इत्यर्थः। क कथम् आस्ते इति, आह— नवद्वारे पुरे। सप्त शीर्षण्यानि आत्मन उपलब्धिद्वाराणि, अवाक् द्वे मूत्रपुरीषविसर्गार्थे, तै. द्वारैः नवद्वारं पुरम् उच्यते शरीरम्, पुरमिव पुरम्, आत्मैकस्वामिकम्, तदर्थप्रयोजनैश्च इन्द्रियमनोबुद्धिविषयैः अनेकफलविज्ञानस्य उत्पादकैः पौरैरिव अधिष्ठितम्। तस्मिन् नवद्वारे पुरे देही सर्वं कर्म संन्यस्य आस्ते, किं विशेषणेन? सर्वो हि देही संन्यासी असंन्यासी वा देहे एव आस्ते,

तत्र अनर्थकं विशेषणमिति । उच्यते— यस्तु अज्ञः देही देहेन्द्रियसंघातमात्रात्मदर्शी स सर्वोऽपि 'गेहे भूमौ आसने वा आसे' इति मन्यते । न हि देहमात्रात्मदर्शिनः गेहे इव देहे आसे इति प्रत्ययः संभवति । देहादिसंघातव्यतिरिक्तात्मदर्शिनस्तु 'देहे आसे' इति प्रत्ययः उपपद्यते । परकर्मणां च परस्मिन् आत्मनि अविद्यया अध्यारोपितानां विद्यया विवेकज्ञानेन मनसा संन्यास उपपद्यते । उत्पन्नविवेकज्ञानस्य सर्वकर्मसंन्यासिनोऽपि गेहे इव देहे एव नवद्वारे पुरे आसनम् प्रारब्धफलकर्मसंस्कारशेषानुवृत्त्या देह एव विशेषविज्ञानोत्पत्तेः । देहे एव आस्ते इति अस्त्येव विशेषणफलम्, विद्वदविद्वत्प्रत्ययभेदापेक्षत्वात् ॥

यद्यपि कार्यकरणकर्माणि अविद्यया आत्मनि अध्यारोपितानि 'संन्यस्यास्ते' इत्युक्तम्, तथापि आत्मसमवायि तु कर्तृत्वं कारयितृत्वं च स्यात् इति आशङ्क्य आह— नैव कुर्वन् स्वयम्, न च कार्यकरणानि कारयन् क्रियासु प्रवर्तयन् । किं यत् तत् कर्तृत्वं कारयितृत्वं च देहिनः स्वात्मसमवायि सत् संन्यासात् न संभवति, यथा गच्छतो गतिः गमनव्यापारपरित्यागे न स्यात् तद्वत्? किं वा स्वत एव आत्मनः न अस्ति इति? अत्र उच्यते— न अस्ति आत्मनः

स्वत. कर्तृत्वं कारयितृत्वं च। उक्तं हि 'अविकार्योऽय-मुच्यते' 'शरीरस्थोऽपि न करोति न लिप्यते' इति। 'ध्यायतीव लेलायतीव' इति श्रुते ॥

किंच—

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥ १४ ॥

न कर्तृत्वं स्वतः कुरु इति नापि कर्माणि रथघटप्रासादा-दीनि ईप्सिततमानि लोकस्य सृजति उत्पादयति प्रभुः आ-त्मा। नापि रथादि कृतवतः तत्फलेन संयोगं न कर्मफल-संयोगम्। यदि किंचिदपि स्वतः न करोति न कारयति च देही, कः तर्हि कुर्वन् कारयंश्च प्रवर्तते इति, उच्यते— स्व-भावस्तु स्वो भावः स्वभावः अविद्यालक्षणा प्रकृतिः माया प्रवर्तते 'दैवी हि' इत्यादिना वक्ष्यमाणा ॥

परमार्थतस्तु—

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥ १५ ॥

न आदत्ते न च गृह्णाति भक्तस्यापि कस्यचित् पापम्। न चैव आदत्ते सुकृतं भक्तैः प्रयुक्तं विभुः। किमर्थं तर्हि भक्तैः

पूजादिलक्षणं यागदानहोमादिकं च सुकृतं प्रयुज्यते इत्याह— अज्ञानेन आवृतं ज्ञानं विवेकविज्ञानम्, तेन मुह्यन्ति 'करोमि कारयामि भोक्ष्ये भोजयामि' इत्येवं मोहं गच्छन्ति अविवेकिनः संसारिणो जन्तवः ॥

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥१६॥

ज्ञानेन तु येन अज्ञानेन आवृताः मुह्यन्ति जन्तवः तत् अज्ञानं येषां जन्तूनां विवेकज्ञानेन आत्मविषयेण नाशितम् आत्मनः भवति, तेषां जन्तूनाम् आदित्यवत् यथा आदित्यः समस्तं रूपजातम् अवभासयति तद्वत् ज्ञानं ज्ञेयं वस्तु सर्वं प्रकाशयति तत् परं परमार्थतत्त्वम् ॥

यत् परं ज्ञानं प्रकाशितम्—

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥१७॥

तस्मिन् ब्रह्मणि गता बुद्धिः येषां ते तद्बुद्धयः, तदात्मान· तदेव परं ब्रह्म आत्मा येषां ते तदात्मानः, तन्निष्ठाः निष्ठा अभिनिवेशः तात्पर्यं सर्वाणि कर्माणि संन्यस्य तस्मिन् ब्रह्मण्येव अवस्थानं येषां ते तन्निष्ठाः, तत्परायणाश्च तदेव

परम् अयनं परा गतिः येषां भवति ते तत्परायणाः केवलात्मरतय इत्यर्थः। येषां ज्ञानेन नाशितम् आत्मनः अज्ञानं ते गच्छन्ति एवंविधाः अपुनरावृत्तिम् अपुनर्देहसंबन्धं ज्ञाननिर्धूतकल्मषाः यथोक्तेन ज्ञानेन निर्धूतः नाशितः कल्मषः पापादिसंसारकारणदोषः येषा ते ज्ञाननिर्धूतकल्मषाः यतयः इत्यर्थः ॥

येषां ज्ञानेन नाशितम् आत्मनः अज्ञानं ते पण्डिताः कथं तत्त्वं पश्यन्ति इत्युच्यते—

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥

विद्याविनयसंपन्ने विद्या च विनयश्च विद्याविनयौ, विनयः उपशमः, ताभ्यां विद्याविनयाभ्यां संपन्नः विद्याविनयसंपन्नः विद्वान् विनीतश्च यो ब्राह्मणः तस्मिन् ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पण्डिताः समदर्शिनः । विद्याविनयसंपन्ने उत्तमसंस्कारवति ब्राह्मणे सात्त्विके, मध्यमायां च राजस्यां गवि, संस्कारहीनायाम् अत्यन्तमेव केवलतामसे हस्त्यादौ च, सत्त्वादिगुणैः तज्जैश्च संस्कारैः तथा राजसैः तथा तामसैश्च संस्कारैः अत्यन्तमेव अस्पृष्टं समम् एकम् अविक्रियं तत् ब्रह्म द्रष्टुं शीलं येषां ते पण्डिताः समदर्शिनः ॥

ननु अभोज्यान्नाः ते दोषवन्तः, 'समासमाभ्यां विषमसमे पूजातः' इति स्मृतेः । न ते दोषवन्तः । कथम् ? —

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥

इह एव जीवद्भिरेव तैः समदर्शीभिः पण्डितै. जितः वशीकृतः सर्गः जन्म, येषां साम्ये सर्वभूतेषु ब्रह्मणि समभावे स्थितं निश्चलीभूतं मनः अन्त.करणम् । निर्दोषं यद्यपि दोषवत्सु श्वपाकादिषु मूढैः तद्दोषै. दोषवत् इव विभाव्यते, तथापि तद्दोषैः अस्पृष्टम् इति निर्दोषं दोषवर्जितं हि यस्मात्; नापि स्वगुणभेदभिन्नम्, निर्गुणत्वात् चैतन्यस्य । वक्ष्यति च भगवान् इच्छादीनां क्षेत्रधर्मत्वम्, 'अनादित्वान्निर्गुणत्वात्' इति च । नापि अन्त्या विशेषाः आत्मनो भेदकाः सन्ति, प्रतिशरीरं तेषां सत्त्वे प्रमाणानुपपत्तेः । अतः समं ब्रह्म एकं च । तस्मात् ब्रह्मणि एव ते स्थिताः । तस्मात् न दोषगन्धमात्रमपि तान् स्पृशति, देहादिसंघातात्मदर्शनाभिमानाभावात् तेषाम् । देहादिसंघातात्मदर्शनाभिमानवद्विषयं तु तत् सूत्रम् 'समासमाभ्यां विषमसमे पूजातः' इति, पूजाविषयत्वेन विशेषणात् । दृश्यते हि ब्रह्मवित् षडङ्गवित् चतुर्वेदवित् इति पूजादानादौ गुणविशेषसंबन्धः कारणम् ।

ब्रह्म तु सर्वगुणदोषसबन्धवर्जितमित्यतः 'ब्रह्मणि ते स्थिता.' इति युक्तम् । कर्मविषयं च 'समासमाभ्याम्' इत्यादि । इद तु सर्वकर्मसन्यासविषयं प्रस्तुतम्, 'सर्वकर्माणि मनसा' इत्यारभ्य आध्यायपरिसमाप्तेः ॥

यस्मात् निर्दोषं समं ब्रह्म आत्मा, तस्मात्—

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥ २० ॥

न प्रहृष्येत् प्रहर्षं न कुर्यात् प्रियम् इष्टं प्राप्य लब्ध्वा । न उद्विजेत् प्राप्य च अप्रियम् अनिष्टं लब्ध्वा । देहमात्रात्मदर्शिनां हि प्रियाप्रियप्राप्ती हर्षविषादौ कुर्वाते, न केवलात्मदर्शिनः, तस्य प्रियाप्रियप्राप्त्यसंभवात् । किंच—'सर्वभूतेषु एकः सम. निर्दोषः आत्मा' इति स्थिरा निर्विचिकित्सा बुद्धिः यस्य सः स्थिरबुद्धिः असंमूढ. संमोहवर्जितश्च स्यात् यथोक्तब्रह्मवित् ब्रह्मणि स्थितः, अकर्मकृत् सर्वकर्मसंन्यासी इत्यर्थः

किच, ब्रह्मणि स्थित—

बाह्यस्पर्शेष्वसक्तात्मा
विन्दत्यात्मनि यत्सुखम् ।

स ब्रह्मयोगयुक्तात्मा
सुखमक्षयमश्नुते ॥ २१ ॥

बाह्यस्पर्शेषु बाह्याश्च ते स्पर्शाश्च बाह्यस्पर्शाः स्पृश्यन्ते इति स्पर्शाः शब्दादयो विषयाः तेषु बाह्यस्पर्शेषु, असक्तः आत्मा अन्तःकरणं यस्य सः अयम् असक्तात्मा विषयेषु प्रीतिवर्जितः सन् विन्दति लभते आत्मनि यत् सुखं तत् विन्दति इत्येतत् । स ब्रह्मयोगयुक्तात्मा ब्रह्मणि योगः समाधिः ब्रह्मयोगः तेन ब्रह्मयोगेन युक्तः समाहितः तस्मिन व्यापृतः आत्मा अन्तःकरणं यस्य स ब्रह्मयोगयुक्तात्मा, सुखम् अक्षयम् अश्नुते व्याप्नोति । तस्मात् बाह्यविषयप्रीतेः क्षणिकायाः इन्द्रियाणि निवर्तयेत् आत्मनि अक्षयसुखार्थी इत्यर्थः ॥

इतश्च निवर्तयेत्—

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥२२॥

ये हि यस्मात् संस्पर्शजाः विषयेन्द्रियसंस्पर्शेभ्यो जाता भोगा भुक्तयः दुःखयोनय एव ते, अविद्याकृतत्वात् । दृश्यन्ते हि आध्यात्मिकादीनि दुःखानि तन्निमित्तान्येव । यथा इहलोके

तथा परलोकेऽपि इति गम्यते एवशब्दात्। न संसारे सुखस्य गन्धमात्रमपि अस्ति इति बुद्ध्वा विषयमृगतृष्णिकाया इन्द्रियाणि निवर्तयेत्। न केवलं दुःखयोनय एव, आद्यन्तवन्तश्च, आदिः विषयेन्द्रियसंयोगो भोगानाम् अन्तश्च तद्वियोग एव; अतः आद्यन्तवन्तः अनित्याः, मध्यक्षणभावित्वात् इत्यर्थः। कौन्तेय, न तेषु भोगेषु रमते बुधः विवेकी अवगतपरमार्थतत्त्वः, अत्यन्तमूढानामेव हि विषयेषु रतिः दृश्यते, यथा पशुप्रभृतीनाम्॥

अयं च श्रेयोमार्गप्रतिपक्षी कष्टतमो दोषः सर्वानर्थप्राप्तिहेतुः दुर्निवारश्च इति तत्परिहारे यत्नाधिक्यं कर्तव्यम् इत्याह भगवान्—

शक्नोतीहैव यः सोढुं प्राक्छरीरविमोक्षणात्।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः॥

शक्नोति उत्सहते इहैव जीवन्नेव यः सोढुं प्रसहितुं प्राक् पूर्वं शरीरविमोक्षणात् आ मरणात् इत्यर्थः। मरणसीमाकरणं जीवतोऽवश्यंभावि हि कामक्रोधोद्भवो वेगः, अनन्तनिमित्तवान् हि सः इति यावत् मरणं तावत् न विस्रम्भणीय इत्यर्थः। कामः इन्द्रियगोचरप्राप्ते इष्टे विषये श्रूयमाणे स्मर्य-

माणे वा अनुभूते सुखहेतौ या गर्धिः तृष्णा स कामः, क्रोधश्च आत्मनः प्रतिकूलेषु दुःखहेतुषु दृश्यमानेषु श्रूयमाणेषु स्मर्यमाणेषु वा यो द्वेषः सः क्रोधः, तौ कामक्रोधौ उद्भवो यस्य वेगस्य सः कामक्रोधोद्भवः वेगः । रोमाञ्चनप्रहृष्टनेत्रवदनादिलिङ्गः अन्त.करणप्रक्षोभरूप कामोद्भवो वेगः, गात्रप्रकम्पप्रस्वेदसंदष्टोष्ठपुटरक्तनेत्रादिलिङ्गः क्रोधोद्भवो वेगः, तं कामक्रोधोद्भवं वेगं यः उत्सहते प्रसहते सोढुं प्रसहितुम्, सः युक्तः योगी सुखी च इह लोके नरः ॥

कथंभूतश्च ब्रह्मणि स्थितः ब्रह्म प्राप्नोति इति आह भगवान्—

योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥

यः अन्तःसुखः अन्तः आत्मनि सुखं यस्य सः अन्तःसुखः, तथा अन्तरेव आत्मनि आरामः आरमणं क्रीडा यस्य सः अन्तरारामः, तथा एव अन्तः एव आत्मन्येव ज्योतिः प्रकाशो यस्य सः अन्तर्ज्योतिरेव, यः ईदृशः सः योगी ब्रह्मनिर्वाणं ब्रह्मणि निर्वृतिं मोक्षम् इह जीवन्नेव ब्रह्मभूतः सन् अधिगच्छति प्राप्नोति ॥

किंच—

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥२५॥

लभन्ते ब्रह्मनिर्वाणं मोक्षम् ऋषय· सम्यग्दर्शिनः संन्यासिनः क्षीणकल्मषाः क्षीणपापाः निर्दोषाः छिन्नद्वैधाः छिन्नसंशयाः यतात्मानः संयतेन्द्रिया. सर्वभूतहिते रताः सर्वेषां भूतानां हिते आनुकूल्ये रताः अहिसका इत्यर्थ. ॥

किंच—

कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥

कामक्रोधवियुक्तानां कामश्च क्रोधश्च कामक्रोधौ ताभ्यां वियुक्तानां यतीनां संन्यासिनां यतचेतसां संयतान्तःकरणानाम् अभितः उभयतः जीवतां मृतानां च ब्रह्मनिर्वाणं मोक्षो वर्तते विदितात्मनां विदितः ज्ञातः आत्मा येषां ते विदितात्मानः तेषां विदितात्मनां सम्यग्दर्शिनामित्यर्थः ॥

सम्यग्दर्शननिष्ठानां संन्यासिनां सद्यः मुक्तिः उक्ता । कर्मयोगश्च ईश्वरार्पितसर्वभावेन ईश्वरे ब्रह्मणि आधाय क्रियमाणः सत्त्वशुद्धिज्ञानप्राप्तिसर्वकर्मसंन्यासक्रमेण मोक्षाय इति भगवान् पदे पदे अब्रवीत्, वक्ष्यति च । अथ इदानीं

ध्यानयोगं सम्यग्दर्शनस्य अन्तरङ्गं विस्तरेण वक्ष्यामि इति तस्य सूत्रस्थानीयान् श्लोकान् उपदिशति स्म—

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥

स्पर्शान् शब्दादीन् कृत्वा बहिः बाह्यान्— श्रोत्रादिद्वारेण अन्तः बुद्धौ प्रवेशिता शब्दादयः विषयाः तान् अचिन्तयत· शब्दादयो बाह्या बहिरेव कृता. भवन्ति— तान् एवं बहिः कृत्वा चक्षुश्चैव अन्तरे भ्रुवोः 'कृत्वा' इति अनुषज्यते । तथा प्राणापानौ नासाभ्यन्तरचारिणौ समौ कृत्वा, यतेन्द्रिय-मनोबुद्धिः यतानि संयतानि इन्द्रियाणि मन. बुद्धिश्च यस्य सः यतेन्द्रियमनोबुद्धि , मननात् मुनिः संन्यासी, मोक्षपरायणः एवं देहसंस्थानात् मोक्षपरायण· मोक्ष एव परम् अयनं परा गतिः यस्य सः अयं मोक्षपरायणो मुनिः भवेत् । विगतेच्छा-भयक्रोधः इच्छा च भयं च क्रोधश्च इच्छाभयक्रोधाः ते विगताः यस्मात् स· विगतेच्छाभयक्रोध , यः एवं वर्तते सदा संन्यासी, मुक्त एव सः न तस्य मोक्षायान्यः कर्तव्योऽस्ति ॥

एवं समाहितचित्तेन किं विज्ञेयम् इति, उच्यते—

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां
भीष्मपर्वणि श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे संन्यासयोगो नाम
पञ्चमोऽध्यायः ॥

भोक्तारं यज्ञतपसां यज्ञानां तपसां च कर्तृरूपेण देवतारूपेण च, सर्वलोकमहेश्वरं सर्वेषां लोकानां महान्तम् ईश्वरं सुहृदं सर्वभूतानां सर्वप्राणिनां प्रत्युपकारनिरपेक्षतया उपकारिणं सर्वभूतानां हृदयेशयं सर्वकर्मफलाध्यक्षं सर्वप्रत्ययसाक्षिणं मां नारायणं ज्ञात्वा शान्तिं सर्वसंसारोपरतिम् ऋच्छति प्राप्नोति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपाद-
शिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
पञ्चमोऽध्यायः ॥





श्रीमच्छंकरभगवत्पादविरचितम्

श्रीमद्भगवद्गीताभाष्यम्

षष्ठोऽध्यायः

षष्ठोऽध्यायः ॥



अतीतानन्तराध्यायान्ते ध्यानयोगस्य सम्यग्दर्शनं प्रति अन्तरङ्गस्य सूत्रभूताः श्लोकाः 'स्पर्शान् कृत्वा बहिः' इत्यादयः उपदिष्टाः। तेषां वृत्तिस्थानीयः अयं षष्ठोऽध्यायः आरभ्यते। तत्र ध्यानयोगस्य बहिरङ्गं कर्म इति, यावत् ध्यानयोगारोहणसमर्थः तावत् गृहस्थेन अधिकृतेन कर्तव्यं कर्म इत्यतः तत् स्तौति— अनाश्रित इति ॥

ननु किमर्थं ध्यानयोगारोहणसीमाकरणम्, यावता अनुष्ठेयमेव विहितं कर्म यावज्जीवम्। न, 'आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते' इति विशेषणात्, आरूढस्य च शमेनैव संबन्धकरणात्। आरुरुक्षोः आरूढस्य च शमः कर्म च उभयं कर्तव्यत्वेन अभिप्रेतं चेत्स्यात्, तदा 'आरुरुक्षोः'

'आरूढस्य च' इति शमकर्मविषयभेदेन विशेषणं विभागकरणं च अनर्थकं स्यात् ॥

तत्र आश्रमिणां कश्चित् योगमारुरुक्षुः भवति, आरूढश्च कश्चित्, अन्ये न आरुरुक्षवः न च आरूढाः, तानपेक्ष्य 'आरुरुक्षोः' 'आरूढस्य च' इति विशेषणं विभागकरणं च उपपद्यत एवेति चेत्, न, 'तस्यैव' इति वचनात्, पुन योगग्रहणाच्च 'योगारूढस्य' इति, य आसीत् पूर्वं योगमारुरुक्षुः, तस्यैव आरूढस्य शम एव कर्तव्य. कारण योगफलं प्रति उच्यते इति । अतो न यावज्जीवं कर्तव्यत्वप्राप्तिः कस्यचिदपि कर्मणः । योगविभ्रष्टवचनाच्च—गृहस्थस्य चेत् कर्मिणो योगो विहितः षष्ठे अध्याये, सः योगविभ्रष्टोऽपि कर्मगति कर्मफलं प्राप्नोति इति तस्य नाशाशङ्का अनुपपन्ना स्यात् । अवश्यं हि कृतं कर्म काम्यं नित्यं वा—मोक्षस्य नित्यत्वात् अनारभ्यत्वे—स्वं फलं आरभत एव । नित्यस्य च कर्मणः वेदप्रमाणावबुद्धत्वात् फलेन भवितव्यम् इति अवोचाम, अन्यथा वेदस्य आनर्थक्यप्रसङ्गात् इति । न च कर्मणि सति उभयविभ्रष्टवचनम्, अर्थवत् कर्मणो विभ्रंशकारणानुपपत्तेः ॥

कर्म कृतम् ईश्वरे संन्यस्य इत्यतः कर्तुः कर्म फलं

नारभत इति चेत्, न, ईश्वरे संन्यासस्य अधिकतरफलहेतुत्वोपपत्तेः ॥

मोक्षायैव इति चेत्, स्वकर्मणां कृतानां ईश्वरे संन्यासो मोक्षायैव, न फलान्तराय योगसहितः, योगाच्च विभ्रष्टः; इत्यतः तं प्रति नाशाशङ्का युक्तैव इति चेत्, न; 'एकाकी यतचित्तात्मा निराशीरपरिग्रहः' 'ब्रह्मचारिव्रते स्थितः' इति कर्मसंन्यासविधानात्। न च अत्र ध्यानकाले स्त्रीसहायत्वाशङ्का, येन एकाकित्वं विधीयते। न च गृहस्थस्य 'निराशीरपरिग्रहः' इत्यादिवचनम् अनुकूलम्। उभयविभ्रष्टप्रश्नानुपपत्तेश्च ॥

अनाश्रित इत्यनेन कर्मिण एव संन्यासित्वं योगित्वं च उक्तम्, प्रतिषिद्धं च निरग्नेः अक्रियस्य च संन्यासित्वं योगित्वं चेति चेत्, न, ध्यानयोगं प्रति बहिरङ्गस्य सतः कर्मण फलाकाङ्क्षासंन्यासस्तुतिपरत्वात्। न केवलं निरग्निः अक्रियः एव संन्यासी योगी च। किं तर्हि? कर्म्यपि, कर्मफलासङ्गं संन्यस्य कर्मयोगम् अनुतिष्ठन् सत्त्वशुद्ध्यर्थम्, 'स संन्यासी च योगी च भवति' इति स्तूयते। न च एकेन वाक्येन कर्मफलासङ्गसंन्यासस्तुतिः चतुर्थाश्रमप्रतिषेधश्च उपपद्यते। न च प्रसिद्धं निरग्नेः अक्रियस्य परमार्थसंन्यासिनः

श्रुतिस्मृतिपुराणेतिहासयोगशास्त्रेषु विहितं संन्यासित्वं योगित्वं च प्रतिषेधति भगवान्। स्ववचनविरोधाच्च— 'सर्वकर्माणि मनसा संन्यस्य...नैव कुर्वन्न कारयन् आस्ते' 'मौनी संतुष्टो येन केनचित् अनिकेतः स्थिरमतिः' 'विहाय कामान्यः सर्वान् पुमांश्चरति निःस्पृहः' 'सर्वारम्भपरित्यागी' इति च तत्र तत्र भगवता स्ववचनानि दर्शितानि, तैः विरुध्येत चतुर्थाश्रमप्रतिषेधः। तस्मात् मुनेः योगम् आरुरुक्षोः प्रतिपन्नगार्हस्थ्यस्य अग्निहोत्रादिकर्म फलनिरपेक्षम् अनुष्ठीयमान ध्यानयोगारोहणसाधनत्वं सत्त्वशुद्धिद्वारेण प्रतिपद्यते इति 'स संन्यासी च योगी च' इति स्तूयते॥

श्रीभगवानुवाच—

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः॥

अनाश्रित न आश्रितः अनाश्रित.। किम्? कर्मफलं कर्मणां फलं कर्मफलं यत् तदनाश्रितः, कर्मफलतृष्णारहित इत्यर्थः। यो हि कर्मफले तृष्णावान् सः कर्मफलमाश्रितो भवति, अय तु तद्विपरीतः, अतः अनाश्रितः कर्मफलम्। एवंभूतः सन् कार्यं कर्तव्यं नित्यं काम्यविपरीतम् अग्निहो-

त्रादिकं कर्म करोति निर्वर्तयति यः कश्चित् ईदृशः कर्मी स कर्म्यन्तरेभ्यो विशिष्यते इत्येवमर्थमाह— 'स संन्यासी च योगी च' इति । संन्यासः परित्यागः स यस्यास्ति स संन्यासी च, योगी च योगः चित्तसमाधानं स यस्यास्ति स योगी च इति एवंगुणसंपन्नः अयं मन्तव्यः, न केवलं निरग्निः अक्रिय एव संन्यासी योगी च इति मन्तव्यः । निर्गताः अग्नयः कर्माङ्गभूताः यस्मात् स निरग्निः, अक्रियश्च अनग्निसाधना अपि अविद्यमानाः क्रियाः तपोदानादिकाः यस्य असौ अक्रियः ॥

ननु च निरग्नेः अक्रियस्यैव श्रुतिस्मृतियोगशास्त्रेषु संन्यासित्वं योगित्वं च प्रसिद्धम् । कथम् इह साग्नेः सक्रियस्य च संन्यासित्वं योगित्वं च अप्रसिद्धमुच्यते इति । नैष दोषः, कयाचित् गुणवृत्त्या उभयस्य संपिपादयिषितत्वात् । तत् कथम्? कर्मफलसंकल्पसंन्यासात् संन्यासित्वम्, योगाङ्गत्वेन च कर्मानुष्ठानात् कर्मफलसंकल्पस्य च चित्तविक्षेपहेतोः परित्यागात् योगित्व च इति गौणमुभयम्, न पुनः मुख्यं संन्यासित्वं योगित्वं च अभिप्रेतमित्येतमर्थं दर्शयितुमाह—

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।
न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥२॥

यं सर्वकर्मतत्फलपरित्यागलक्षणं परमार्थसंन्यासं संन्यासम् इति प्राहुः श्रुतिस्मृतिविदः, योगं कर्मानुष्ठानलक्षणं तं परमार्थसंन्यासं विद्धि जानीहि हे पाण्डव । कर्मयोगस्य प्रवृत्तिलक्षणस्य तद्विपरीतेन निवृत्तिलक्षणेन परमार्थसंन्यासेन कीदृशं सामान्यमङ्गीकृत्य तद्भाव उच्यते इत्यपेक्षायाम् इदमुच्यते— अस्ति हि परमार्थसंन्यासेन सादृश्यं कर्तृद्वारकं कर्मयोगस्य । यो हि परमार्थसंन्यासी स त्यक्तसर्वकर्मसाधनतया सर्वकर्मतत्फलविषयं संकल्पं प्रवृत्तिहेतुकामकारणं संन्यस्यति । अयमपि कर्मयोगी कर्म कुर्वाण एव फलविषयं संकल्पं संन्यस्यति इत्येतमर्थं दर्शयिष्यन् आह— न हि यस्मात् असंन्यस्तसंकल्पः असंन्यस्तः अपरित्यक्तः फलविषयः संकल्पः अभिसंधिः येन सः असंन्यस्तसंकल्पः कश्चन कश्चिदपि कर्मी योगी समाधानवान् भवति न संभवतीत्यर्थः, फलसंकल्पस्य चित्तविक्षेपहेतुत्वात् । तस्मात् यः कश्चन कर्मी संन्यस्तफलसंकल्पो भवेत् स योगी समाधानवान् अविक्षिप्तचित्तो भवेत्, चित्तविक्षेपहेतोः फलसंकल्पस्य संन्यस्तत्वादित्यभिप्रायः ॥

एवं परमार्थसंन्यासकर्मयोगयोः कर्तृद्वारकं संन्याससामान्यमपेक्ष्य 'यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव' इति कर्मयोगस्य स्तुत्यर्थं संन्यासत्वम् उक्तम् । ध्यानयोगस्य फलनिरपेक्षः कर्मयोगो बहिरङ्गं साधनमिति तं संन्यासत्वेन स्तुत्वा अधुना कर्मयोगस्य ध्यानयोगसाधनत्वं दर्शयति—

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ ३ ॥

आरुरुक्षोः आरोढुमिच्छतः, अनारूढस्य, ध्यानयोगे अवस्थातुमशक्तस्यैवेत्यर्थः । कस्य तस्य आरुरुक्षोः ? मुनेः, कर्मफलसंन्यासिन इत्यर्थः । किमारुरुक्षो ? योगम् । कर्म कारणं साधनम् उच्यते । योगारूढस्य पुनः तस्यैव शमः उपशमः सर्वकर्मभ्यो निवृत्तिः कारणं योगारूढस्य साधनम् उच्यते इत्यर्थः । यावद्यावत् कर्मभ्यः उपरमते, तावत्तावत् निरायासस्य जितेन्द्रियस्य चित्तं समाधीयते । तथा सति स झटिति योगारूढो भवति । तथा चोक्तं व्यासेन— 'नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च । शीलं स्थितिर्दण्डनिधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्यः' इति ॥

अथेदानी कदा योगारूढो भवति इत्युच्यते—

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥ ४ ॥

यदा समाधीयमानचित्तो योगी हि इन्द्रियार्थेषु इन्द्रियाणामर्था· शब्दादयः तेषु इन्द्रियार्थेषु कर्मसु च नित्यनैमित्तिककाम्यप्रतिषिद्धेषु प्रयोजनाभावबुद्ध्या न अनुषज्जते अनुषङ्गं कर्तव्यताबुद्धिं न करोतीत्यर्थः । सर्वसंकल्पसंन्यासी सर्वान् संकल्पान् इहामुत्रार्थकामहेतून् संन्यसितुं शीलम् अस्य इति सर्वसंकल्पसंन्यासी, योगारूढः प्राप्तयोग इत्येतत्, तदा तस्मिन् काले उच्यते । 'सर्वसंकल्पसंन्यासी' इति वचनात् सर्वांश्च कामान् सर्वाणि च कर्माणि संन्यस्येदित्यर्थः । संकल्पमूला हि सर्वे कामा.—'संकल्पमूल. कामो वै यज्ञाः संकल्पसंभवाः । काम जानामि ते मूलं संकल्पात्किल जायसे । न त्वां संकल्पयिष्यामि तेन मे न भविष्यसि' इत्यादिस्मृतेः । सर्वकामपरित्यागे च सर्वकर्मसंन्यासः सिद्धो भवति, 'स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते' इत्यादिश्रुतिभ्यः, 'यद्यद्धि कुरुते जन्तु. तत्तत् कामस्य चेष्टितम्' इत्यादिस्मृतिभ्यश्च; न्यायाच्च— न हि सर्वसंकल्पसंन्यासे कश्चित् स्पन्दितुमपि शक्त. । तस्मात्

'सर्वसंकल्पसंन्यासी' इति वचनात् सर्वान् कामान् सर्वाणि कर्माणि च त्याजयति भगवान् ॥

यदा एवं योगारूढः, तदा तेन आत्मा उद्धृतो भवति संसारादनर्थजातात्। अतः—

उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः॥५॥

उद्धरेत् संसारसागरे निमग्नम् आत्मना आत्मानं ततः उत् ऊर्ध्वं हरेत् उद्धरेत्, योगारूढतामापादयेदित्यर्थः। न आत्मानम् अवसादयेत् न अधः नयेत्, न अधः गमयेत्। आत्मैव हि यस्मात् आत्मनः बन्धुः। न हि अन्यः कश्चित् बन्धुः, यः संसारमुक्तये भवति। बन्धुरपि तावत् मोक्षं प्रति प्रतिकूल एव, स्नेहादिबन्धनायतनत्वात्। तस्मात् युक्तमवधारणम् 'आत्मैव ह्यात्मनो बन्धुः' इति। आत्मैव रिपुः शत्रुः। यः अन्यः अपकारी बाह्यः शत्रुः सोऽपि आत्मप्रयुक्त एवेति युक्तमेव अवधारणम् 'आत्मैव रिपुरात्मन' इति ॥

आत्मैव बन्धुः आत्मैव रिपुः आत्मनः इत्युक्तम्। तत्र किलक्षण आत्मा आत्मनो बन्धुः, किलक्षणो वा आत्मा आत्मनो रिपुः इत्युच्यते—

बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥ ६ ॥

बन्धुः आत्मा आत्मनः तस्य, तस्य आत्मनः स आत्मा बन्धु येन आत्मना आत्मैव जितः, आत्मा कार्यकरणसंघातो येन वशीकृतः, जितेन्द्रिय इत्यर्थः । अनात्मनस्तु अजितात्मनस्तु शत्रुत्वे शत्रुभावे वर्तेत आत्मैव शत्रुवत्, यथा अनात्मा शत्रु आत्मन. अपकारी, तथा आत्मा आत्मन अपकारे वर्तेत इत्यर्थः ॥

जितात्मनः प्रशान्तस्य परमात्मा समाहितः ।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥ ७ ॥

जितात्मन. कार्यकरणसंघात आत्मा जितो येन सः जितात्मा तस्य जितात्मनः, प्रशान्तस्य प्रसन्नान्तःकरणस्य सत· संन्यासिनः परमात्मा समाहित. साक्षादात्मभावेन वर्तते इत्यर्थः । किच शीतोष्णसुखदु.खेषु तथा माने अपमाने च मानापमानयो. पूजापरिभवयो· सम. स्यात् ॥

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ॥

ज्ञानविज्ञानतृप्तात्मा ज्ञान शास्त्रोक्तपदार्थानां परिज्ञानम्, विज्ञानं तु शास्त्रतो ज्ञातानां तथैव स्वानुभवकरणम्, ताभ्यां ज्ञानविज्ञानाभ्यां तृप्त. संजातालंप्रत्यय. आत्मा अन्तःकरणं यस्य सः ज्ञानविज्ञानतृप्तात्मा, कूटस्थः अप्रकम्प्य·, भवति इत्यर्थ·, विजितेन्द्रियश्च । य ईदृश, युक्तः समाहित. इति स उच्यते कथ्यते । स योगी समलोष्टाश्मकाञ्चनः लोष्टाश्मकाञ्चनानि समानि यस्य सः समलोष्टाश्मकाञ्चनः ॥

किंच—

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥ ९ ॥

'सुहृत्' इत्यादिश्लोकार्धम् एक पदम् । सुहृत् इति प्रत्युपकारमनपेक्ष्य उपकर्ता, मित्रं स्नेहवान्, अरिः शत्रु, उदासीन न कस्यचित् पक्षं भजते, मध्यस्थ. यो विरुद्धयोः उभयो. हितैषी, द्वेष्यः आत्मनः अप्रियः, बन्धु. संबन्धी इत्येतेषु साधुषु शास्त्रानुवर्तिषु अपि च पापेषु प्रतिषिद्धकारिषु सर्वेषु एतेषु समबुद्धिः 'कः किंकर्मा' इत्यव्याप्तबुद्धिरित्यर्थः । विशिष्यते, 'विमुच्यते' इति वा पाठान्तरम् । योगारूढानां सर्वेषाम् अयम् उत्तम इत्यर्थः ॥

अत एवमुत्तमफलप्राप्तये—

योगी युञ्जीत सततमात्मानं रहसि स्थितः ।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ॥ १० ॥

योगी ध्यायी युञ्जीत समादध्यात् सततं सर्वदा आत्मानम् अन्तःकरणं रहसि एकान्ते गिरिगुहादौ स्थितः सन् एकाकी असहायः । 'रहसि स्थित· एकाकी च' इति विशेषणात् संन्यासं कृत्वा इत्यर्थः । यतचित्तात्मा चित्तम् अन्तःकरणम् आत्मा देहश्च संयतौ यस्य सः यतचित्तात्मा, निराशी· वीततृष्णः अपरिग्रहः परिग्रहरहितश्चेत्यर्थः । संन्यासित्वेऽपि त्यक्तसर्वपरिग्रहः सन् युञ्जीत इत्यर्थः ॥

अथेदानीं योगं युञ्जतः आसनाहारविहारादीनां योगसाधनत्वेन नियमो वक्तव्यः, प्राप्तयोगस्य लक्षणं तत्फलादि च, इत्यत आरभ्यते । तत्र आसनमेव तावत् प्रथममुच्यते—

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥

शुचौ शुद्धे विविक्ते स्वभावतः संस्कारतो वा, देशे स्थाने प्रतिष्ठाप्य स्थिरम् अचलम् आत्मनः आसनं नात्युच्छ्रितं ना-

तीव उच्छ्रित न अपि अतिनीचम्, तच्च चैलाजिनकुशोत्तरं चैलम् अजिनं कुशाश्च उत्तरे यस्मिन् आसने तत् आसनं चैलाजिनकुशोत्तरम् । पाठक्रमाद्विपरीतः अत्र क्रमः चैलादीनाम् ॥

प्रतिष्ठाप्य, किम्?—

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युञ्जाद्योगमात्मविशुद्धये ॥१२॥

तत्र तस्मिन् आसने उपविश्य योगं युञ्जयात् । कथम्? सर्वविषयेभ्य. उपसंहृत्य एकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रिय. चित्तं च इन्द्रियाणि च चित्तेन्द्रियाणि तेषां क्रियाः संयता यस्य सः यतचित्तेन्द्रियक्रियः । स किमर्थं योगं युञ्जयात् इत्याह— आत्मविशुद्धये अन्त.करणस्य विशुद्धयर्थमित्येतत् ॥

बाह्यमासनमुक्तम्, अधुना शरीरधारणं कथम् इत्युच्यते—

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥

समं कायशिरोग्रीवं कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवं तत् समं धारयन् अचलं च । समं धारयतः चलनं

संभवति, अतः विशिनष्टि— अचलमिति । स्थिरः स्थिरो भूत्वा इत्यर्थः । स्वं नासिकाग्रं संप्रेक्ष्य सम्यक् प्रेक्षणं दर्शनं कृत्वेव इति । इवशब्दो लुप्तो द्रष्टव्यः । न हि स्वनासिकाग्रसंप्रेक्षणमिह विधित्सितम् । किं तर्हि ? चक्षुषो दृष्टिसंनिपातः । स च अन्तःकरणसमाधानापेक्षो विवक्षित । स्वनासिकाग्रसप्रेक्षणमेव चेत् विवक्षितम्, मनः तत्रैव समाधीयेत, नात्मनि । आत्मनि हि मनसः समाधानं वक्ष्यति 'आत्मसंस्थं मनः कृत्वा' इति । तस्मात् इवशब्दलोपेन अक्ष्णो दृष्टिसंनिपात एव 'सप्रेक्ष्य' इत्युच्यते । दिशश्च अनवलोकयन् दिशां च अवलोकनमन्तराकुर्वन् इत्येतत् ॥

किंच—

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥

प्रशान्तात्मा प्रकर्षेण शान्तः आत्मा अन्तःकरण यस्य सोऽयं प्रशान्तात्मा, विगतभीः विगतभयः, ब्रह्मचारिव्रते स्थितः ब्रह्मचारिणो व्रतं ब्रह्मचर्यं गुरुशुश्रूषाभिक्षान्नभुक्त्यादि तस्मिन् स्थितः, तदनुष्ठाता भवेदित्यर्थः । किंच, मनः संयम्य मनसः वृत्तीः उपसंहृत्य इत्येतत्, मच्चित्तः

मयि परमेश्वरे चित्तं यस्य सोऽयं मच्चित्तः, युक्तः समाहितः सन् आसीत उपविशेत् । मत्परः अहं परो यस्य सोऽयं मत्परो भवति । कश्चित् रागी स्त्रीचित्तः, न तु स्त्रियमेव परत्वेन गृह्णाति, किं तर्हि ? राजानं महादेवं वा । अयं तु मच्चित्तो मत्परश्च ॥

अथेदानीं योगफलमुच्यते—

युञ्जन्नेवं सदात्मानं योगी नियतमानसः ।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥

युञ्जन् समाधानं कुर्वन् एवं यथोक्तेन विधानेन सदा आत्मानं सर्वदा योगी नियतमानसः नियतं संयतं मानसं मनो यस्य सोऽयं नियतमानसः, शान्तिम् उपरतिं निर्वाण-परमां निर्वाणं मोक्षः तत् परमा निष्ठा यस्याः शान्तेः सा निर्वाणपरमा तां निर्वाणपरमाम्, मत्संस्थां मदधीनाम् अधि-गच्छति प्राप्नोति ॥

इदानीं योगिनः आहारादिनियम उच्यते—

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः ।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥१६॥

न अत्यश्नतः आत्मसंमितमन्नपरिमाणमतीत्याश्नतः अत्यश्नतः न योगः अस्ति। न च एकान्तम् अनश्नतः योगः अस्ति। 'यदु ह वा आत्मसंमितमन्नं तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत् कनीयोऽन्नं न तदवति' इति श्रुतेः। तस्मात् योगी न आत्मसंमितात् अन्नात् अधिकं न्यूनं वा अश्नीयात्। अथवा, योगिनः योगशास्त्रे परिपठितात् अन्नपरिमाणात् अतिमात्रमश्नतः योगो नास्ति। उक्तं हि—'अर्धं सव्यञ्जनान्नस्य तृतीयमुदकस्य च। वायोः संचरणार्थं तु चतुर्थमवशेषयेत्' इत्यादिपरिमाणम्। तथा— न च अतिस्वप्नशीलस्य योगो भवति नैव च अतिमात्रं जाग्रतो भवति च अर्जुन॥

कथं पुनः योगो भवति इत्युच्यते—

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥१७॥

युक्ताहारविहारस्य आह्रियते इति आहारः अन्नम्, विहरणं विहारः पादक्रमः, तौ युक्तौ नियतपरिमाणौ यस्य सः युक्ताहारविहारः तस्य, तथा युक्तचेष्टस्य युक्ता नियता चेष्टा यस्य कर्मसु तस्य, तथा युक्तस्वप्नावबोधस्य युक्तौ स्वप्नश्च अव-

बोधश्च तौ नियतकालौ यस्य तस्य, युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगिनो योगो भवति दुःखहा दुःखानि सर्वाणि हन्तीति दुःखहा, सर्वसंसारदुःखक्षयकृत् योगः भवतीत्यर्थः ॥

अथ अधुना कदा युक्तो भवति इत्युच्यते—

यदा विनियतं चित्तमात्मन्येवावतिष्ठते ।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥

यदा विनियतं विशेषेण नियतं सयतम् एकाग्रतामापन्नं चित्तं हित्वा बाह्यार्थचिन्ताम् आत्मन्येव केवले अवतिष्ठते, स्वात्मनि स्थिति लभते इत्यर्थः । नि.स्पृहः सर्वकामेभ्यः निर्गता दृष्टादृष्टविषयेभ्यः स्पृहा तृष्णा यस्य योगिनः सः युक्त. समाहितः इत्युच्यते तदा तस्मिन्काले ॥

तस्य योगिनः समाहित यत् चित्त तस्योपमा उच्यते—

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥१९॥

यथा दीपः प्रदीपः निवातस्थः निवाते वातवर्जिते देशे स्थितः न इङ्गते न चलति, सा उपमा उपमीयते अनया

इत्युपमा योगज्ञैः चित्तप्रचारदर्शिभिः स्मृता चिन्तिता योगिनो यतचित्तस्य संयतान्तःकरणस्य युञ्जतो योगम् अनुतिष्ठतः आत्मनः समाधिमनुतिष्ठत इत्यर्थः ॥

एवं योगाभ्यासबलादेकाग्रीभूतं निवातप्रदीपकल्पं सत्—

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥

यत्र यस्मिन् काले उपरमते चित्तम् उपरति गच्छति निरुद्धं सर्वतो निवारितप्रचारं योगसेवया योगानुष्ठानेन, यत्र चैव यस्मिंश्च काले आत्मना समाधिपरिशुद्धेन अन्तःकरणेन आत्मानं परं चैतन्यं ज्योतिःस्वरूपं पश्यन् उपलभमानः स्वे एव आत्मनि तुष्यति तुष्टिं भजते ॥

किंच—

सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥

सुखम् आत्यन्तिकं अत्यन्तमेव भवति इत्यात्यन्तिकम् अनन्तमित्यर्थः, यत् तत् बुद्धिग्राह्यं बुद्ध्यैव इन्द्रियनिरपेक्षया गृह्यते इति बुद्धिग्राह्यम् अतीन्द्रियम् इन्द्रियगोचरातीतम्

अविषयजनितमित्यर्थः, वेत्ति तत् ईदृशं सुखमनुभवति यत्र यस्मिन् काले, न च एव अयं विद्वान् आत्मस्वरूपे स्थितः तस्मात् नैव चलति तत्त्वतः तत्त्वस्वरूपात् न प्रच्यवते इत्यर्थः ॥

किंच—

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते ॥

यं लब्ध्वा यम् आत्मलाभं लब्ध्वा प्राप्य च अपरम् अन्यत् लाभं लाभान्तरं ततः अधिकम् अस्तीति न मन्यते न चिन्तयति । किंच, यस्मिन् आत्मतत्त्वे स्थितः दुःखेन शस्त्रनिपातादिलक्षणेन गुरुणा महता अपि न विचाल्यते ॥

'यत्रोपरमते' इत्याद्यारभ्य यावद्भिः विशेषणैः विशिष्ट आत्मावस्थाविशेषः योग उक्तः—

तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥

तं विद्यात् विजानीयात् दुःखसंयोगवियोगं दुःखैः संयोगः दुःखसंयोगः, तेन वियोगः दुःखसंयोगवियोगः, त

दुःखसंयोगवियोगं योग इत्येव संज्ञितं विपरीतलक्षणेन विद्यात् विजानीयादित्यर्थः । योगफलमुपसंहृत्य पुनरन्वारम्भेण योगस्य कर्तव्यता उच्यते निश्चयानिर्वेदयो' योगसाधनत्वविधानार्थम् । स यथोक्तफलो योगः निश्चयेन अध्यवसायेन योक्तव्य. अनिर्विण्णचेतसा न निर्विण्णम् अनिर्विण्णम् । कि तत्? चेत तेन निर्वेदरहितेन चेतसा चित्तेनेत्यर्थः ॥

किंच—

संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥ २४ ॥

संकल्पप्रभवान् संकल्पः प्रभवः येषां कामानां ते संकल्पप्रभवाः कामाः तान् त्यक्त्वा परित्यज्य सर्वान् अशेषतः निर्लेपेन । किच, मनसैव विवेकयुक्तेन इन्द्रियग्रामम् इन्द्रियसमुदायं विनियम्य नियमनं कृत्वा समन्तत. समन्तात् ॥

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् ॥

शनैः शनैः न सहसा उपरमेत् उपरति कुर्यात् । कया? बुद्धया । किंविशिष्टया? धृतिगृहीतया धृत्या धैर्येण गृहीतया

धृतिगृहीतया धैर्येण युक्तया इत्यर्थः । आत्मसंस्थम् आत्मनि संस्थितम् 'आत्मैव सर्वं न ततोऽन्यत् किंचिदस्ति' इत्येवमात्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् । एष योगस्य परमो विधिः ॥

तत्र एवमात्मसंस्थ मनः कर्तुं प्रवृत्तो योगी—

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥२६॥

यतो यतः यस्माद्यस्मात् निमित्तात् शब्दादेः निश्चरति निर्गच्छति स्वभावदोषात् मनः चञ्चलम् अत्यर्थं चलम्, अत एव अस्थिरम्, ततस्ततः तस्मात्तस्मात् शब्दादेः निमित्तात् नियम्य तत्तन्निमित्तं याथात्म्यनिरूपणेन आभासीकृत्य वैराग्यभावनया च एतत् मनः आत्मन्येव वशं नयेत् आत्मवश्यतामापादयेत् । एवं योगाभ्यासबलात् योगिनः आत्मन्येव प्रशाम्यति मनः ॥

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥ २७ ॥

प्रशान्तमनसं प्रकर्षेण शान्तं मनः यस्य सः प्रशान्तमनाः

तं प्रशान्तमनस हि एनं योगिनं सुखम् उत्तमं निरतिशयम् उपैति उपगच्छति शान्तरजसं प्रक्षीणमोहादिक्लेशरजसमित्यर्थः, ब्रह्मभूतं जीवन्मुक्तम् 'ब्रह्मैव सर्वम्' इत्येवं निश्चयवन्तं ब्रह्मभूतम् अकल्मषं धर्माधर्मादिवर्जितम् ॥

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥ २८ ॥

युञ्जन् एव यथोक्तेन क्रमेण योगी योगान्तरायवर्जित सदा सर्वदा आत्मानं विगतकल्मषः विगतपापः, सुखेन अनायासेन ब्रह्मसंस्पर्शं ब्रह्मणा परेण संस्पर्शो यस्य तत् ब्रह्मसंस्पर्श सुखम् अत्यन्तम् अन्तमतीत्य वर्तत इत्यत्यन्तम् उत्कृष्टं निरतिशयम् अश्नुते व्याप्नोति ॥

इदानीं योगस्य यत् फलं ब्रह्मैकत्वदर्शनं सर्वसंसारविच्छेदकारणं तत् प्रदर्श्यते—

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९ ॥

सर्वभूतस्थं सर्वेषु भूतेषु स्थित स्वम् आत्मानं सर्वभूतानि च आत्मनि ब्रह्मादीनि स्तम्बपर्यन्तानि च सर्वभूतानि

आत्मनि एकतां गतानि ईक्षते पश्यति योगयुक्तात्मा समाहितान्त करणः सर्वत्र समदर्शनः सर्वेषु ब्रह्मादिस्थावरान्तेषु विषमेषु सर्वभूतेषु समं निर्विशेषं ब्रह्मात्मैकत्वविषयं दर्शनं ज्ञानं यस्य स सर्वत्र समदर्शनः ॥

एतस्य आत्मैकत्वदर्शनस्य फलम् उच्यते—

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥

यो मां पश्यति वासुदेवं सर्वस्य आत्मानं सर्वत्र सर्वेषु भूतेषु सर्वं च ब्रह्मादिभूतजातं मयि सर्वात्मनि पश्यति, तस्य एवं आत्मैकत्वदर्शिनः अहम् ईश्वरो न प्रणश्यामि न परोक्षतां गमिष्यामि । स च मे न प्रणश्यति स च विद्वान मम वासुदेवस्य न प्रणश्यति न परोक्षो भवति, तस्य च मम च एकात्मकत्वात्, स्वात्मा हि नाम आत्मनः प्रिय एव भवति, यस्माच्च अहमेव सर्वात्मैकत्वदर्शी ॥

इत्येतत् पूर्वश्लोकार्थं सम्यग्दर्शनमनूद्य तत्फलं मोक्ष. अभिधीयते—

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥

सर्वथा सर्वप्रकारै वर्तमानोऽपि सम्यग्दर्शी योगी मयि वैष्णवे परमे पदे वर्तते, नित्यमुक्त एव सः, न मोक्षं प्रति केनचित् प्रतिबध्यते इत्यर्थः ॥

किंच अन्यत्—

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥

आत्मौपम्येन आत्मा स्वयमेव उपमीयते अनया इत्युपमा तस्या उपमाया भावः औपम्यं तेन आत्मौपम्येन, सर्वत्र सर्वभूतेषु समं तुल्यं पश्यति यः अर्जुन, स च किं समं पश्यति इत्युच्यते—यथा मम सुखम् इष्टं तथा सर्वप्राणिनां सुखम् अनुकूलम् । वाशब्द चार्थे । यदि वा यच्च दुःखं मम प्रतिकूलम् अनिष्टं यथा तथा सर्वप्राणिनां दुःखम् अनिष्टं प्रतिकूलं इत्येवम् आत्मौपम्येन सुखदुःखे अनुकूलप्रतिकूले तुल्यतया सर्वभूतेषु समं पश्यति, न कस्यचित् प्रतिकूलमाचरति, अहिंसक इत्यर्थः । यः एवमहिंसकः सम्यग्दर्शननिष्ठः स योगी परमः उत्कृष्टः मतः अभिप्रेतः सर्वयोगिनां मध्ये ॥

एतस्य यथोक्तस्य सम्यग्दर्शनलक्षणस्य योगस्य दुःखसं-

पाद्यतामालक्ष्य शुश्रूषुः ध्रुवं तत्प्राप्त्युपायमर्जुन उवाच—

अर्जुन उवाच—

योऽयं योगस्त्वया प्रोक्तः
साम्येन मधुसूदन ।
एतस्याहं न पश्यामि
चञ्चलत्वात्स्थितिं स्थिराम् ॥ ३३ ॥

यः अयं योग. त्वया प्रोक्तः साम्येन समत्वेन हे मधुसूदन एतस्य योगस्य अहं न पश्यामि नोपलभे, चञ्चलत्वात मनसः । किम्[१] स्थिराम् अचलां स्थितिम ॥

प्रसिद्धमेतत्—

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥

चञ्चलं हि मनः । कृष्ण इति कृषतेः विलेखनार्थस्य रूपम् । भक्तजनपापादिदोषाकर्षणात् कृष्ण, तस्य संबुद्धिः हे कृष्ण । हि यस्मात् मनः चञ्चलं न केवलमत्यर्थं चञ्चलम्, प्रमाथि च प्रमथनशीलम्, प्रमथ्नाति शरीरम् इन्द्रियाणि च विक्षिपत् सत् परवशीकरोति । किंच—बलवत् प्रबलम्, न

केनचित् नियन्तु शक्यम्, दुर्निवारत्वात् । किंच——दृढं तन्तुनागवत् अच्छेद्यम् । तस्य एवंभूतस्य मनसः अहं निग्रहं निरोधं मन्ये वायोरिव यथा वायोः दुष्करो निग्रहः ततोऽपि दुष्करं मन्ये इत्यभिप्रायः ॥

श्रीभगवानुवाच, एवम् एतत् यथा ब्रवीषि——

श्रीभगवानुवाच——

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥

असंशयं नास्ति संशयः 'मनो दुर्निग्रहं चलम्' इत्यत्र हे महाबाहो । किंतु अभ्यासेन तु अभ्यासो नाम चित्तभूमौ कस्यांचित् समानप्रत्ययावृत्तिः चित्तस्य । वैराग्येण वैराग्यं नाम दृष्टादृष्टेष्टभोगेषु दोषदर्शनाभ्यासात् वैतृष्ण्यम् । तेन च वैराग्येण गृह्यते विक्षेपरूपः प्रचारः चित्तस्य । एवं तत् मनः गृह्यते निगृह्यते निरुध्यते इत्यर्थः ॥

यः पुनः असंयतात्मा, तेन——

असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥

असंयतात्मना अभ्यासवैराग्याभ्यामसंयतः आत्मा अन्तः-करणं यस्य सोऽयम् असंयतात्मा तेन असंयतात्मना योगो दुष्प्रापः दुःखेन प्राप्यत इति मे मतिः। यस्तु पुनः वश्यात्मा अभ्यासवैराग्याभ्यां वश्यत्वमापादित आत्मा मनः यस्य सोऽय वश्यात्मा तेन वश्यात्मना तु यतता भूयोऽपि प्रयत्न कुर्वता शक्यः अवाप्तुं योगः उपायतः यथोक्तादुपायात् ॥

तत्र योगाभ्यासाङ्गीकरणेन इहलोकपरलोकप्राप्तिनिमित्तानि कर्माणि संन्यस्तानि, योगसिद्धिफलं च मोक्षसाधनं सम्यग्दर्शनं न प्राप्तमिति, योगी योगमार्गात् मरणकाले चलितचित्तः इति तस्य नाशमाशङ्क्य अर्जुन उवाच—

अर्जुन उवाच—

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥

अयतिः अप्रयत्नवान् योगमार्गे श्रद्धया आस्तिक्यबुद्ध्या च उपेतः योगात् अन्तकाले च चलितं मानसं मनो यस्य सः चलितमानसः भ्रष्टस्मृतिः सः अप्राप्य योगसंसिद्धिं योगफलं सम्यग्दर्शनं कां गतिं हे कृष्ण गच्छति ॥

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥

कच्चिन् किं न उभयविभ्रष्टः कर्ममार्गात् योगमार्गाच्च विभ्रष्टः सन् छिन्नाभ्रमिव नश्यति, किं वा न नश्यति अप्रतिष्ठो निराश्रयः हे महाबाहो विमूढः सन् ब्रह्मणः पथि ब्रह्मप्राप्तिमार्गे ॥

एतन्मे संशयं कृष्ण च्छेत्तुमर्हस्यशेषतः ।
त्वदन्यः संशयस्यास्य च्छेत्ता न ह्युपपद्यते ॥

एतत् मे मम संशयं कृष्ण च्छेत्तुम् अपनेतुम् अर्हसि अशेषतः । त्वदन्यः त्वत्तः अन्यः ऋषिः देवो वा च्छेत्ता नाशयिता संशयस्य अस्य न हि यस्मात् उपपद्यते न संभवति । अतः त्वमेव च्छेत्तुमर्हसि इत्यर्थः ॥

श्रीभगवानुवाच—

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥

हे पार्थ नैव इह लोके नामुत्र परस्मिन् वा लोके विनाशः तस्य विद्यते नास्ति । नाशो नाम पूर्वस्मात् हीनजन्मप्राप्तिः

स योगभ्रष्टस्य नास्ति । न हि यस्मात् कल्याणकृत् शुभकृत् कश्चित् दुर्गति कुत्सितां गति हे तात, तनोति आत्मानं पुत्ररूपेणेति पिता तात उच्यते । पितैव पुत्र इति पुत्रोऽपि तात उच्यते । शिष्योऽपि पुत्र उच्यते । यतो न गच्छति ॥

कि तु अस्य भवति ?—

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥

योगमार्गे प्रवृत्त संन्यासी सामर्थ्यात् प्राप्य गत्वा पुण्यकृताम् अश्वमेधादियाजिनां लोकान्, तत्र च उषित्वा वासमनुभूय शाश्वती नित्या. समा. संवत्सरान्, तद्भोगक्षये शुचीनां यथोक्तकारिणां श्रीमतां विभूतिमतां गेहे गृहे योगभ्रष्ट· अभिजायते ॥

अथवा योगिनामेव कुले भवति धीमताम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥ ४२ ॥

अथवा श्रीमतां कुलात् अन्यस्मिन् योगिनामेव दरिद्राणां कुले भवति जायते धीमतां बुद्धिमताम् । एतत् हि जन्म, यत् दरिद्राणां योगिनां कुले, दुर्लभतरं दुःखलभ्य-

तरं पूर्वमपेक्ष्य लोके जन्म यत् ईदृशं यथोक्तविशेषणे कुले ॥

यस्मात्—

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥ ४३ ॥

तत्र योगिनां कुले तं बुद्धिसंयोगं बुद्ध्या सयोगं बुद्धि-सयोगं लभते पौर्वदेहिकं पूर्वस्मिन् देहे भवं पौर्वदेहिकम् । यतते च प्रयत्नं च करोति ततः तस्मात् पूर्वकृतात् संस्कारात् भूयः बहुतर संसिद्धौ संसिद्धिनिमित्तं हे कुरुनन्दन ॥

कथं पूर्वदेहबुद्धिसंयोग इति तदुच्यते—

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥ ४४ ॥

यः पूर्वजन्मनि कृतः अभ्यासः स. पूर्वाभ्यासः, तेनैव बलवता ह्रियते संसिद्धौ हि यस्मात् अवशोऽपि स. योग-भ्रष्टः ; न कृतं चेत् योगाभ्यासजात् संस्कारात् बलवत्तर-मधर्मादिलक्षणं कर्म, तदा योगाभ्यासजनितेन संस्कारेण ह्रियते , अधर्मश्चेत् बलवत्तरः कृतः, तेन योगजोऽपि संस्कार अभिभूयत एव, तत्क्षये तु योगजः संस्कारः स्वयमेव कार्य-मारभते, न दीर्घकालस्थस्यापि विनाशः तस्य अस्ति इत्यर्थ ।

अतः जिज्ञासुरपि योगस्य स्वरूपं ज्ञातुमिच्छन् अपि योग-मार्गे प्रवृत्तः संन्यासी योगभ्रष्टः, सामर्थ्यात् सोऽपि शब्द-ब्रह्म वेदोक्तकर्मानुष्ठानफलम् अतिवर्तते अतिक्रामति अपाक-रिष्यति, किमुत बुद्ध्वा यः योगं तन्निष्ठ अभ्यासं कुर्यात् ॥

कुतश्च योगित्व श्रेयः इति—

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥

प्रयत्नात् यतमान, अधिकं यतमान इत्यर्थः । तत्र योगी विद्वान् सशुद्धकिल्बिषः विशुद्धकिल्बिष सशुद्धपापः अनेकज-न्मसंसिद्धः अनेकेषु जन्मसु किंचित्किंचित् संस्कारजातम् उप-चित्य तेन उपचितेन अनेकजन्मकृतेन संसिद्ध अनेकजन्मसं-सिद्धः ततः लब्धसम्यग्दर्शनः सन् याति परा प्रकृष्टां गतिम् ॥

यस्मादेवं तस्मात्—

तपस्विभ्योऽधिको योगी
ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाधिको योगी
तस्माद्योगी भवार्जुन ॥ ४६ ॥

तपस्विभ्यः अधिकः योगी, ज्ञानिभ्योऽपि ज्ञानमत्र शास्त्रार्थपाण्डित्यम्, तद्वद्भ्योऽपि मतः ज्ञातः अधिकः श्रेष्ठ इति । कर्मिभ्यः, अग्निहोत्रादि कर्म, तद्वद्भ्यः अधिकः योगी विशिष्टः यस्मात् तस्मात् योगी भव अर्जुन ॥

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ध्यानयोगो नाम

षष्ठोऽध्यायः ॥

योगिनामपि सर्वेषां रुद्रादित्यादिध्यानपराणां मध्ये मद्गतेन मयि वासुदेवे समाहितेन अन्तरात्मना अन्तःकरणेन श्रद्धावान् श्रद्दधानः सन् भजते सेवते यो माम्, स मे मम युक्ततमः अतिशयेन युक्तः मतः अभिप्रेतः इति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपाद-शिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये

षष्ठोऽध्यायः ॥

श्रीमच्छंकरभगवत्पादविरचितम्

श्रीमद्भगवद्गीताभाष्यम्

सप्तमोऽध्यायः

सप्तमोऽध्यायः ॥

—*—



'योगिनामपि सर्वेषां मद्गतेनान्तरात्मना । श्रद्धावान्भजते यो मां स मे युक्ततमो मत' इति प्रश्नबीजम् उपन्यस्य, स्वयमेव 'ईदृशं मदीयं तत्त्वम्, एवं मद्गतान्तरात्मा स्यात्' इत्येतत् विवक्षुः श्रीभगवानुवाच—

श्रीभगवानुवाच—

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥

मयि वक्ष्यमाणविशेषणे परमेश्वरे आसक्त मनः यस्य सः मय्यासक्तमनाः, हे पार्थ योगं युञ्जन् मनःसमाधानं कुर्वन्, मदाश्रय. अहमेव परमेश्वर आश्रयो यस्य स' मदाश्रयः । यो हि कश्चित् पुरुषार्थेन केनचित् अर्थी भवति स तत्साधनं कर्म अग्निहोत्रादि तप' दानं वा किंचित् आश्रय प्रतिपद्यते, अयं तु योगी मामेव आश्रयं प्रतिपद्यते, हित्वा अन्यत् सा-

धनान्तरं मय्येव आसक्तमनाः भवति। यः त्वं एवंभूत. सन् असंशयं समग्रं समस्तं विभूतिबलशक्तयैश्वर्यादिगुणसंपन्नं मां यथा येन प्रकारेण ज्ञास्यसि संशयमन्तरेण 'एवमेव भगवान्' इति, तत् शृणु उच्यमानं मया ॥

तच्च मद्विषयम्—

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥

ज्ञानं ते तुभ्यम् अहं सविज्ञानं विज्ञानसहितं स्वानुभवयुक्तम् इदं वक्ष्यामि कथयिष्यामि अशेषतः कात्स्न्येन। तत् ज्ञानं विवक्षितं स्तौति श्रोतुः अभिमुखीकरणाय—यत् ज्ञात्वा यत् ज्ञानं ज्ञात्वा न इह भूयः पुन अन्यत् ज्ञातव्यं पुरुषार्थसाधनम् अवशिष्यते नावशिष्टं भवति। इति मत्तत्त्वज्ञो यः, सः सर्वज्ञो भवतीत्यर्थ। अतो विशिष्टफलत्वात् दुर्लभ ज्ञानम् ॥

कथमित्युच्यते—

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥

मनुष्याणां मध्ये सहस्रेषु अनेकेषु कश्चित् यतति प्रयत्नं

करोति सिद्धये सिद्धयर्थम् । तेषां यततामपि सिद्धानाम्, सिद्धा एव हि ते ये मोक्षाय यतन्ते, तेषा कश्चित् एव हि मां वेत्ति तत्त्वतः यथावत् ॥

श्रोतारं प्ररोचनेन अभिमुखीकृत्याह—

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥

भूमिः इति पृथिवीतन्मात्रमुच्यते, न स्थूला, 'भिन्ना प्रकृतिरष्टधा' इति वचनात् । तथा अबादयोऽपि तन्मात्राण्येव उच्यन्ते—आप· अनलः वायु. खम् । मनः इति मनसः कारणमहंकारो गृह्यते । बुद्धिः इति अहंकारकारणं महत्तत्त्वम् । अहंकारः इति अविद्यासंयुक्तमव्यक्तम् । यथा विषसंयुक्तमन्नं विषमित्युच्यते, एवमहकारवासनावत् अव्यक्तं मूलकारणमहंकार इत्युच्यते, प्रवर्तकत्वात् अहंकारस्य । अहंकार एव हि सर्वस्य प्रवृत्तिबीजं दृष्टं लोके । इतीयं यथोक्ता प्रकृतिः मे मम ऐश्वरी मायाशक्तिः अष्टधा भिन्ना भेदमागता ॥

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ ५ ॥

अपरा न परा निकृष्टा अशुद्धा अनर्थकरी संसारबन्धनात्मिका इयम् । इत. अस्या· यथोक्तायाः तु अन्यां विशुद्धां प्रकृति मम आत्मभूतां विद्धि मे परां प्रकृष्टां जीवभूतां क्षेत्रज्ञलक्षणां प्राणधारणनिमित्तभूतां हे महाबाहो, यया प्रकृत्या इदं धार्यते जगत् अन्तः प्रविष्टया ॥

एतद्योनीनि भूतानि सर्वाणीत्युपधारय ।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ६ ॥

एतद्योनीनि एते परापरे क्षेत्रक्षेत्रज्ञलक्षणे प्रकृती योनिः येषां भूतानां तानि एतद्योनीनि, भूतानि सर्वाणि इति एवम् उपधारय जानीहि । यस्मात् मम प्रकृती योनिः कारणं सर्वभूतानाम्, अतः अहं कृत्स्नस्य समस्तस्य जगतः प्रभवः उत्पत्ति प्रलयः विनाशः तथा । प्रकृतिद्वयद्वारेण अहं सर्वज्ञः ईश्वरः जगतः कारणमित्यर्थः ॥

यतः तस्मात्—

मत्तः परतरं नान्यत्किंचिदस्ति धनंजय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ ७ ॥

मत्तः परमेश्वरात् परतरम् अन्यत् कारणान्तरं किंचित् नास्ति न विद्यते, अहमेव जगत्कारणमित्यर्थः, हे धनंजय ।

यस्मादेवं तस्मात् मयि परमेश्वरे सर्वाणि भूतानि सर्वमिदं जगत् प्रोतं अनुस्यूतम् अनुगतम् अनुविद्धं ग्रथितमित्यर्थः, दीर्घतन्तुषु पटवत्, सूत्रे च मणिगणा इव ॥

केन केन धर्मेण विशिष्टे त्वयि सर्वमिदं प्रोतमित्युच्यते—

रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८ ॥

रसः अहम्, अपां यः सारः स रसः, तस्मिन् रसभूते मयि आपः प्रोता इत्यर्थः । एवं सर्वत्र । यथा अहम् अप्सु रसः, एवं प्रभा अस्मि शशिसूर्ययोः । प्रणवः ओकारः सर्ववेदेषु, तस्मिन् प्रणवभूते मयि सर्वे वेदाः प्रोताः । तथा खे आकाशे शब्दः सारभूतः, तस्मिन् मयि खं प्रोतम् । तथा पौरुषं पुरुषस्य भावः पौरुषं यतः पुंबुद्धिः नृषु, तस्मिन मयि पुरुषाः प्रोताः ॥

पुण्यो गन्धः पृथिव्यां च
तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु
तपश्चास्मि तपस्विषु ॥ ९ ॥

पुण्यः सुरभिः गन्धः पृथिव्यां च अहम्, तस्मिन् मयि गन्धभूते पृथिवी प्रोता । पुण्यत्वं गन्धस्य स्वभावत एव पृथिव्यां दर्शितम् अबादिषु रसादे· पुण्यत्वोपलक्षणार्थम् । अपुण्यत्वं तु गन्धादीनाम् अविद्याधर्माद्यपेक्षं संसारिणां भूतविशेषसंसर्गनिमित्तं भवति । तेजश्च दीप्तिश्च अस्मि विभावसौ अग्नौ । तथा जीवनं सर्वभूतेषु, येन जीवन्ति सर्वाणि भूतानि तत् जीवनम् । तपश्च अस्मि तपस्विषु, तस्मिन् तपसि मयि तपस्विन प्रोताः ॥

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥१०॥

बीज प्ररोहकारणं मां विद्धि सर्वभूतानां हे पार्थ सनातनं चिरन्तनम् । किच, बुद्धि· विवेकशक्ति· अन्तःकरणस्य बुद्धिमतां विवेकशक्तिमताम् अस्मि, तेज· प्रागल्भ्यं तद्वता तेजस्विनाम् अहम् ॥

बलं बलवतां चाहं कामरागविवर्जितम् ।
धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥११॥

बलं सामर्थ्यम् ओजो बलवताम् अहम्, तच्च बलं कामरागविवर्जितम्, कामश्च रागश्च कामरागौ— काम. तृष्णा

असंनिकृष्टेषु विषयेषु, रागो रञ्जना प्राप्तेषु विषयेषु— ताभ्या कामरागाभ्यां विवर्जितं देहादिधारणमात्रार्थं बलं सत्त्वमहमस्मि, न तु यत्संसारिणां तृष्णारागकारणम्। किंच— धर्माविरुद्धः धर्मेण शास्त्रार्थेन अविरुद्धो य. प्राणिषु भूतेषु कामः, यथा देहधारणमात्राद्यर्थः अशनपानादिविषयः, स काम· अस्मि हे भरतर्षभ॥

किंच—

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये।
मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि॥

ये चैव सात्त्विका. सत्त्वनिर्वृत्ताः भावा पदार्था., राजसा· रजोनिर्वृत्ताः, तामसाः तमोनिर्वृत्ताश्च, ये केचिन प्राणिनां स्वकर्मवशात् जायन्ते भावा., तान् मत्त एव जायमानान् इति एवं विद्धि सर्वान् समस्तानेव। यद्यपि ते मत्त. जायन्ते, तथापि न तु अहं तेषु तदधीनः तद्वशः, यथा ससारिण.। ते पुनः मयि मद्वशाः मदधीना· ॥

एवंभूतमपि परमेश्वरं नित्यशुद्धबुद्धमुक्तस्वभावं सर्वभूतात्मानं निर्गुणं संसारदोषबीजप्रदाहकारण मां नाभिजानाति

जगत् इति अनुक्रोशं दर्शयति भगवान्। तच्च किंनिमित्तं जगत अज्ञानमित्युच्यते—

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम्॥

त्रिभि गुणमयैः गुणविकारैः रागद्वेषमोहादिप्रकारैः भावै पदार्थैः एभि यथोक्तैः सर्वम् इदं प्राणिजातं जगत् मोहितम् अविवेकितामापादितं सत् न अभिजानानि माम, एभ्यः यथोक्तेभ्यः गुणेभ्यः परं व्यतिरिक्तं विलक्षणं च अव्ययं व्ययरहितं जन्मादिसर्वभावविकारवर्जितम् इत्यर्थः॥

कथं पुनः दैवीम् एतां त्रिगुणात्मिकां वैष्णवीं मायामतिक्रामति इत्युच्यते—

दैवी ह्येषा गुणमयी मम माया दुरत्यया।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते॥

दैवी देवस्य मम ईश्वरस्य विष्णोः स्वभावभूता हि यस्मात् एषा यथोक्ता गुणमयी मम माया दुरत्यया दुःखेन अत्ययः अतिक्रमणं यस्याः सा दुरत्यया। तत्र एवं सति सर्वधर्मान् परित्यज्य मामेव मायाविनं स्वात्मभूतं सर्वात्मना ये

प्रपद्यन्ते ते मायाम् एतां सर्वभूतमोहिनी तरन्ति अतिक्रामन्ति, ते संसारबन्धनात् मुच्यन्ते इत्यर्थ. ॥

यदि त्वां प्रपन्नाः मायामेतां तरन्ति, कस्मात् त्वामेव सर्वे न प्रपद्यन्ते इत्युच्यते—

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥

न मां परमेश्वरं नारायणं दुष्कृतिन. पापकारिण. मूढा प्रपद्यन्ते नराधमाः नराणां मध्ये अधमा· निकृष्टाः । ते च मायया अपहृतज्ञाना· संमुषितज्ञानाः आसुर भावं हिसानृतादिलक्षणम् आश्रिता· ॥

ये पुनर्नरोत्तमाः पुण्यकर्माण —

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥१६॥

चतुर्विधाः चतुःप्रकारा भजन्ते सेवन्ते मां जना सुकृतिनः पुण्यकर्माण. हे अर्जुन । आर्तः आर्तिपरिगृहीतः तस्करव्याघ्ररोगादिना अभिभूतः आपन्नः, जिज्ञासुः भगवत्तत्त्व ज्ञातुमिच्छति यः, अर्थार्थी धनकामः, ज्ञानी विष्णो. तत्त्वविच्च हे भरतर्षभ ॥

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥

तेषां चतुर्णां मध्ये ज्ञानी तत्त्ववित् तत्त्ववित्त्वात् नित्ययुक्त भवति एकभक्तिश्च, अन्यस्य भजनीयस्य अदर्शनात्, अतः स एकभक्तिः विशिष्यते विशेषम् आधिक्यम् आपद्यते, अतिरिच्यते इत्यर्थः । प्रियो हि यस्मात् अहम् आत्मा ज्ञानिनः, अतः तस्य अहम् अत्यर्थं प्रिय., प्रसिद्धं हि लोके 'आत्मा प्रियो भवति' इति । तस्मात् ज्ञानिनः आत्मत्वात् वासुदेवः प्रियो भवतीत्यर्थः । स च ज्ञानी मम वासुदेवस्य आत्मैवेति मम अत्यर्थं प्रिय. ॥

न तर्हि आर्तादयः त्रयः वासुदेवस्य प्रियाः? न, किं तर्हि?—

उदाराः सर्व एवैते
ज्ञानी त्वात्मैव मे मतम् ।
आस्थितः स हि युक्तात्मा
मामेवानुत्तमां गतिम् ॥ १८ ॥

उदाराः उत्कृष्टाः सर्व एव एते, त्रयोऽपि मम प्रिया एवेत्यर्थः । न हि कश्चित् मद्भक्तः मम वासुदेवस्य अप्रिय

भवति । ज्ञानी तु अत्यर्थं प्रियो भवतीति विशेषः । तत् कस्मात् इत्यत आह—ज्ञानी तु आत्मैव न अन्यो मत्तः इति मे मम मतं निश्चयः । आस्थितः आरोढुं प्रवृत्तः सः ज्ञानी हि यस्मात् 'अहमेव भगवान् वासुदेवः न अन्योऽस्मि' इत्येवं युक्तात्मा समाहितचित्त सन् मामेव परं ब्रह्म गन्तव्यम् अनुत्तमां गति गन्तुं प्रवृत्त इत्यर्थः ॥

ज्ञानी पुनरपि स्तूयते—

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥

बहूनां जन्मनां ज्ञानार्थसंस्काराश्रयाणाम् अन्ते समाप्तौ ज्ञानवान् प्राप्तपरिपाकज्ञानः मां वासुदेवं प्रत्यगात्मानं प्रत्यक्षत. प्रपद्यते । कथम्? वासुदेवः सर्वम् इति । य. एवं सर्वात्मानं मां नारायणं प्रतिपद्यते, सः महात्मा, न तत्समः अन्यः अस्ति, अधिको वा । अतः सुदुर्लभः, 'मनुष्याणां सहस्रेषु' इति हि उक्तम् ॥

आत्मैव सर्वो वासुदेव इत्येवमप्रतिपत्तौ कारणमुच्यते—

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥

कामैः तैस्तैः पुत्रपशुस्वर्गादिविषयैः हृतज्ञाना. अपहृतविवेकविज्ञानाः प्रपद्यन्ते अन्यदेवता प्राप्नुवन्ति वासुदेवात् आत्मन. अन्या. देवता , तं तं नियमं देवताराधने प्रसिद्धो यो यो नियमः तं तम् आस्थाय आश्रित्य प्रकृत्या स्वभावेन जन्मान्तरार्जितसंस्कारविशेषेण नियताः नियमिताः स्वया आत्मीयया ॥

तेषां च कामिनाम्—

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥

य. य. कामी यां यां देवतातनु श्रद्धया संयुक्तः भक्तश्च सन् अर्चितुं पूजयितुम् इच्छति, तस्य तस्य कामिन अचला स्थिरां श्रद्धां तामेव विदधामि स्थिरीकरोमि ॥

ययैव पूर्व प्रवृत्त. स्वभावतो य. यां देवतातनुं श्रद्धया अर्चितुम इच्छति—

स तया श्रद्धया युक्त-
स्तस्या राधनमीहते ।
लभते च ततः कामा-
न्मयैव विहितान्हि तान् ॥ २२ ॥

स तया मद्विहितया श्रद्धया युक्त. सन् तस्याः देवतातन्वाः राधनम् आराधनम् ईहते चेष्टते। लभते च ततः तस्याः आराधितायाः देवतातन्वा. कामान् ईप्सितान् मयैव परमेश्वरेण सर्वज्ञेन कर्मफलविभागज्ञतया विहितान् निर्मितान् तान्, हि यस्मात् ते भगवता विहिताः कामाः तस्मात् तान् अवश्यं लभते इत्यर्थः। 'हितान्' इति पदच्छेदे हितत्वं कामानामुपचरितं कल्प्यम्; न हि कामा हिताः कस्यचित्॥

यस्मात् अन्तवत्साधनव्यापारा अविवेकिनः कामिनश्च ते, अतः—

अन्तवत्तु फलं तेषां
तद्भवत्यल्पमेधसाम्।
देवान्देवयजो यान्ति
मद्भक्ता यान्ति मामपि॥ २३॥

अन्तवत् विनाशि तु फलं तेषां तत् भवति अल्पमेधसां अल्पप्रज्ञानाम्। देवान्देवयजो यान्ति देवान् यजन्त इति देवयजः, ते देवान यान्ति, मद्भक्ता यान्ति मामपि। एवं समाने अपि आयासे मामेव न प्रपद्यन्ते अनन्तफलाय, अहो खलु कष्टं वर्तन्ते, इत्यनुक्रोशं दर्शयति भगवान्॥

किंनिमित्तं मामेव न प्रपद्यन्ते इत्युच्यते—

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥ २४॥

अव्यक्तम् अप्रकाशं व्यक्तिम् आपन्नं प्रकाश गतम् इदानीं मन्यन्ते मां नित्यप्रसिद्धमीश्वरमपि सन्तम् अबुद्धयः अविवेकिनः परं भावं परमात्मस्वरूपम् अजानन्तः अविवेकिनः मम अव्ययं व्ययरहितम् अनुत्तमं निरतिशयं मदीयं भावमजानन्तः मन्यन्ते इत्यर्थः ॥

तदज्ञानं किंनिमित्तमित्युच्यते—

नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥

न अहं प्रकाशः सर्वस्य लोकस्य, केषांचिदेव मद्भक्तानां प्रकाशः अहमित्यभिप्रायः । योगमायासमावृतः योगः गुणानां युक्तिः घटनं सैव माया योगमाया, तया योगमायया समावृतः, संछन्नः इत्यर्थः । अत एव मूढो लोकः अयं न अभिजानाति माम् अजम् अव्ययम् ॥

यया योगमायया समावृतं मां लोकः नाभिजानाति,

नासौ योगमाया मदीया सती मम ईश्वरस्य मायाविनो ज्ञानं प्रतिबध्नाति, यथा अन्यस्यापि मायाविनः मायाज्ञानं तद्वत् ॥

यतः एवम्, अतः—

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥

अहं तु वेद जाने समतीतानि समतिक्रान्तानि भूतानि, वर्तमानानि च अर्जुन, भविष्याणि च भूतानि वेद अहम् । मां तु वेद न कश्चन मद्भक्तं मच्छरणम् एकं मुक्त्वा, मत्तत्त्ववेदनाभावादेव न मां भजते ॥

केन पुनः मत्तत्त्ववेदनप्रतिबन्धेन प्रतिबद्धानि सन्ति जायमानानि सर्वभूतानि मां न विदन्ति इत्यपेक्षायामिदमाह—

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत ।
सर्वभूतानि संमोहं सर्गे यान्ति परंतप ॥ २७ ॥

इच्छाद्वेषसमुत्थेन इच्छा च द्वेषश्च इच्छाद्वेषौ ताभ्यां समुत्तिष्ठतीति इच्छाद्वेषसमुत्थः तेन इच्छाद्वेषसमुत्थेन । केनेति विशेषापेक्षायामिदमाह— द्वन्द्वमोहेन द्वन्द्वनिमित्तः मोहः द्वन्द्वमोहः तेन । तावेव इच्छाद्वेषौ शीतोष्णवत् परस्परविरुद्धौ

सुखदुःखतद्धेतुविषयौ यथाकालं सर्वभूतैः संबध्यमानौ द्वन्द्व-शब्देन अभिधीयेते । तत्र यदा इच्छाद्वेषौ सुखदुःखतद्धेतुसंप्राप्त्या लब्धात्मकौ भवतः, तदा तौ सर्वभूतानां प्रज्ञाया. स्ववशापादनद्वारेण परमार्थात्मतत्त्वविषयज्ञानोत्पत्तिप्रतिबन्धकारणं मोह जनयतः । न हि इच्छाद्वेषदोषवशीकृतचित्तस्य यथाभूतार्थविषयज्ञानमुत्पद्यते बहिरपि, किमु वक्तव्यं ताभ्यामाविष्टबुद्धेः संमूढस्य प्रत्यगात्मनि बहुप्रतिबन्धे ज्ञानं नोत्पद्यत इति । अतः तेन इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन, भारत भरतान्वयज, सर्वभूतानि संमोहितानि सन्ति संमोह संमूढतां सर्गे जन्मनि, उत्पत्तिकाले इत्येतत्, यान्ति गच्छन्ति हे परंतप । मोहवशान्येव सर्वभूतानि जायमानानि जायन्ते इत्यभिप्राय. । यत. एवम्, अतः तेन द्वन्द्वमोहेन प्रतिबद्धप्रज्ञानानि सर्वभूतानि संमोहितानि मामात्मभूतं न जानन्ति, अत एव आत्मभावेन मां न भजन्ते ॥

के पुनः अनेन द्वन्द्वमोहेन निर्मुक्ताः सन्तः त्वां विदित्वा यथाशास्त्रमात्मभावेन भजन्ते इत्यपेक्षितमर्थं दर्शयितुम् उच्यते—

येषां त्वन्तगतं पापं
जनानां पुण्यकर्मणाम् ।

ते द्वन्द्वमोहनिर्मुक्ता
भजन्ते मां दृढव्रताः ॥ २८ ॥

येषां तु पुनः अन्तगतं समाप्तप्रायं क्षीणं पापं जनानां पुण्यकर्मणां पुण्य कर्म येषां सत्त्वशुद्धिकारणं विद्यते ते पुण्यकर्माणः तेषां पुण्यकर्मणाम्, ते द्वन्द्वमोहनिर्मुक्ताः यथोक्तेन द्वन्द्वमोहेन निर्मुक्ता. भजन्ते मां परमात्मानं दृढव्रताः । 'एवमेव परमार्थतत्त्वं नान्यथा' इत्येवं सर्वपरित्यागव्रतेन निश्चितविज्ञानाः दृढव्रताः उच्यन्ते ॥

ते किमर्थं भजन्ते इत्युच्यते—

जरामरणमोक्षाय
मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदुः कृत्स्न-
मध्यात्मं कर्म चाखिलम् ॥ २९ ॥

जरामरणमोक्षाय जरामरणयोः मोक्षार्थं मां परमेश्वरम् आश्रित्य मत्समाहितचित्ताः सन्तः यतन्ति प्रयतन्ते ये, ते यत् ब्रह्म परं तत् विदुः कृत्स्नं समस्तम् अध्यात्मं प्रत्यगात्मविषयं वस्तु तत् विदुः, कर्म च अखिलं समस्तं विदुः ॥

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः ।
प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां
भीष्मपर्वणि श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानविज्ञानयोगो नाम
सप्तमोऽध्यायः ॥

साधिभूताधिदैवम् अधिभूतं च अधिदैवं च अधिभूताधिदैवम्, सह अधिभूताधिदैवेन वर्तते इति साधिभूताधिदैवं च मां ये विदुः, साधियज्ञं च सह अधियज्ञेन साधियज्ञं ये विदुः, प्रयाणकाले मरणकाले अपि च मां ते विदुः युक्तचेतसः समाहितचित्ता इति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपाद-
शिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये
सप्तमोऽध्यायः ॥



श्रीमच्छंकरभगवत्पादविरचितम्

श्रीमद्भगवद्गीताभाष्यम्

अष्टमोऽध्यायः

अष्टमोऽध्यायः ॥



'ब्रह्म तद्विदु कृत्स्नम्' इत्यादिना भगवता अर्जुनस्य प्रश्नबीजानि उपदिष्टानि । अत तत्प्रश्नार्थम् अर्जुन उवाच—

अर्जुन उवाच—

किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥ १ ॥

अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन ।
प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥

एषां प्रश्नानां यथाक्रमं निर्णयाय श्रीभगवानुवाच—

श्रीभगवानुवाच—

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥ ३ ॥

अक्षरं न क्षरतीति अक्षरं परमात्मा, 'एतस्य वा अक्षरस्य प्रशासने गार्गि' इति श्रुतेः। ओकारस्य च 'ओमित्येकाक्षर ब्रह्म' इति परेण विशेषणात् अग्रहणम्। परमम् इति च निरतिशये ब्रह्मणि अक्षरे उपपन्नतरम् विशेषणम्। तस्यैव परस्य ब्रह्मणः प्रतिदेहं प्रत्यगात्मभावः स्वभावः, स्वो भाव. स्वभावः अध्यात्मम् उच्यते। आत्मानं देहम् अधिकृत्य प्रत्यगात्मतया प्रवृत्तं परमार्थब्रह्मावसानं वस्तु स्वभावः अध्यात्मम् उच्यते अध्यात्मशब्देन अभिधीयते। भूतभावोद्भवकरः भूतानां भाव. भूतभावः तस्य उद्भव· भूतभावोद्भवः तं करोतीति भूतभावोद्भवकरः, भूतवस्तूत्पत्तिकर इत्यर्थः। विसर्गः विसर्जनं देवतोद्देशेन चरुपुरोडाशादेः द्रव्यस्य परित्यागः; स एष विसर्गलक्षणो यज्ञः कर्मसंज्ञितः कर्मशब्दित इत्येतत्। एतस्मान् हि बीजभूतात् वृष्ट्यादिक्रमेण स्थावरजङ्गमानि भूतानि उद्भवन्ति॥

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम्।
अधियज्ञोऽहमेवात्र देहे देहभृतां वर॥ ४॥

अधिभूतं प्राणिजातम् अधिकृत्य भवतीति। कोऽसौ? क्षरः क्षरतीति क्षरः विनाशी, भावः यत्किंचित् जनिमत् वस्तु इत्यर्थः। पुरुषः पूर्णम् अनेन सर्वमिति, पुरि शयनात्

वा, पुरुषः आदित्यान्तर्गतो हिरण्यगर्भः, सर्वप्राणिकरणानाम् अनुग्राहकः, सः अधिदैवतम् । अधियज्ञः सर्वयज्ञाभिमानिनी विष्ण्वाख्या देवता, 'यज्ञो वै विष्णुः' इति श्रुतेः । स हि विष्णुः अहमेव, अत्र अस्मिन् देहे यो यज्ञः तस्य अहम् अधियज्ञः, यज्ञो हि देहनिर्वर्त्यत्वेन देहसमवायी इति देहाधिकरणो भवति, देहभृतां वर ॥

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेबरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥

अन्तकाले मरणकाले च मामेव परमेश्वरं विष्णुं स्मरन् मुक्त्वा परित्यज्य कलेबरं शरीरं यः प्रयाति गच्छति, सः मद्भावं वैष्णवं तत्त्वं याति । नास्ति न विद्यते अत्र अस्मिन् अर्थे संशय.— याति वा न वा इति ॥

न मद्विषय एव अयं नियमः । किं तर्हि ?—

यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेबरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥ ६ ॥

यं यं वापि यं यं भावं देवताविशेषं स्मरन् चिन्तयन् त्यजति परित्यजति अन्ते अन्तकाले प्राणवियोगकाले कलेबर

शरीरं तं तमेव स्मृतं भावमेव एति नान्यं कौन्तेय, सदा सर्वदा तद्भावभावितः तस्मिन् भावः तद्भावः स भावितः स्मर्यमाणतया अभ्यस्तः येन सः तद्भावभावितः सन् ॥

यस्मात् एवम् अन्त्या भावना देहान्तरप्राप्तौ कारणम्—

तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च ।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥ ७ ॥

तस्मात् सर्वेषु कालेषु माम् अनुस्मर यथाशास्त्रम् । युध्य च युद्धं च स्वधर्मं कुरु । मयि वासुदेवे अर्पिते मनोबुद्धी यस्य तव स त्वं मयि अर्पितमनोबुद्धिः सन् मामेव यथास्मृतम् एष्यसि आगमिष्यसि; असंशयः न संशयः अत्र विद्यते ॥

किंच—

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥ ८ ॥

अभ्यासयोगयुक्तेन मयि चित्तसमर्पणविषयभूते एकस्मिन् तुल्यप्रत्ययावृत्तिलक्षणः विलक्षणप्रत्ययानन्तरितः अभ्यासः स चाभ्यासो योगः तेन युक्तं तत्रैव व्यापृतं योगिनः चेतः तेन, चेतसा नान्यगामिना न अन्यत्र विष-

यान्तरे गन्तु शीलम् अस्येति नान्यगामि तेन नान्यगामिना, परमं निरतिशयं पुरुषं दिव्यं दिवि सूर्यमण्डले भवं याति गच्छति हे पार्थ अनुचिन्तयन् शास्त्राचार्योपदेशम् अनुध्यायन् इत्येतत् ॥

किंविशिष्टं च पुरुषं याति इति उच्यते—

कविं पुराणमनुशासितार-
मणोरणीयांसमनुस्मरेद्यः ।
सर्वस्य धातारमचिन्त्यरूप-
मादित्यवर्णं तमसः परस्तात् ॥ ९ ॥

कवि क्रान्तदर्शिन सर्वज्ञं पुराण चिरन्तनम् अनुशासितारं सर्वस्य जगत प्रशासितारम् अणोः सूक्ष्मादपि अणीयांसं सूक्ष्मतरम् अनुस्मरेत् अनुचिन्तयेत् यः कश्चित्, सर्वस्य कर्मफलजातस्य धातार विधातारं विचित्रतया प्राणिभ्यो विभक्तारम्, अचिन्त्यरूपं न अस्य रूपं नियतं विद्यमानमपि केनचित् चिन्तयितुं शक्यते इति अचिन्त्यरूपः तम्, आदित्यवर्णम् आदित्यस्येव नित्यचैतन्यप्रकाशो वर्णो यस्य तम् आदित्यवर्णम्, तमसः परस्तात् अज्ञानलक्षणात् मोहान्धकारात् परं तम् अनुचिन्तयन् याति इति पूर्वेण सबन्धः ॥

किंच—

प्रयाणकाले मनसाचलेन
भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्य सम्य-
क्स तं परं पुरुषमुपैति दिव्यम् ॥ १० ॥

प्रयाणकाले मरणकाले मनसा अचलेन चलनवर्जितेन भक्त्या युक्त. भजनं भक्तिः तया युक्तः योगबलेन चैव योगस्य बलं योगबल समाधिजसंस्कारप्रचयजनितचित्तस्थैर्यलक्षणं योगबलं तेन च युक्तः इत्यर्थः, पूर्वं हृदयपुण्डरीके वशीकृत्य चित्तं ततः ऊर्ध्वगामिन्या नाड्या भूमिजयक्रमेण भ्रुवोः मध्ये प्राणम् आवेश्य स्थापयित्वा सम्यक् अप्रमत्तः सन्, सः एवं विद्वान् योगी 'कवि पुराणम्' इत्यादिलक्षणं तं परं परतरं पुरुषम् उपैति प्रतिपद्यते दिव्यं द्योतनात्मकम् ॥

पुनरपि वक्ष्यमाणेन उपायेन प्रतिपित्सितस्य ब्रह्मणो वेदविद्वदनादिविशेषणविशेष्यस्य अभिधानं करोति भगवान्—

यदक्षरं वेदविदो वदन्ति
विशन्ति यद्यतयो वीतरागाः ।

यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण प्रवक्ष्ये ॥ ११ ॥

यत् अक्षरं न क्षरतीति अक्षरम् अविनाशि वेदविदः वेदार्थज्ञाः वदन्ति, 'तद्वा एतदक्षरं गार्गि ब्राह्मणा अभिवदन्ति' इति श्रुते., सर्वविशेषनिवर्तकत्वेन अभिवदन्ति 'अस्थूलमनणु' इत्यादि । किंच— विशन्ति प्रविशन्ति सम्यग्दर्शनप्राप्तौ सत्यां यत् यतयः यतनशीला. संन्यासिनः वीतरागाः वीतः विगतः रागः येभ्यः ते वीतरागाः । यच्च अक्षरमिच्छन्त — ज्ञातुम् इति वाक्यशेषः— ब्रह्मचर्यं गुरौ चरन्ति आचरन्ति, तत् ते पदं तत् अक्षराख्यं पद पदनीयं ते तव संग्रहेण संग्रह. संक्षेपः तेन सक्षेपेण प्रवक्ष्ये कथयिष्यामि ॥

'स यो ह वै तद्भगवन्मनुष्येषु प्रायणान्तमोकारमभिध्यायीत कतमं वाव स तेन लोकं जयतीति । तस्मै स होवाच एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोकारः' इत्युपक्रम्य 'यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत—स सामभिरुन्नीयते ब्रह्मलोकम्' इत्यादिना वचनेन, 'अन्यत्र धर्मादन्यत्राधर्मात्' इति च उपक्रम्य 'सर्वे वेदा यत्पदमामनन्ति । तपांसि सर्वाणि च यद्वदन्ति ।

यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्' इत्यादिभिश्च वचनैः परस्य ब्रह्मणो वाचकरूपेण, प्रतिमावत् प्रतीकरूपेण वा, परब्रह्मप्रतिपत्तिसाधनत्वेन मन्दमध्यमबुद्धीनां विवक्षितस्य ओंकारस्य उपासनं कालान्तरे मुक्तिफलम् उक्तं यत्, तदेव इहापि 'कविं पुराणमनुशासितारम्' 'यदक्षरं वेदविदो वदन्ति' इति च उपन्यस्तस्य परस्य ब्रह्मणः पूर्वोक्तरूपेण प्रतिपत्त्युपायभूतस्य ओंकारस्य कालान्तरमुक्तिफलम् उपासनं योगधारणासहितं वक्तव्यम्, प्रसक्तानुप्रसक्तं च यत्किंचित्, इत्येवमर्थः उत्तरो ग्रन्थ आरभ्यते—

सर्वद्वाराणि संयम्य
मनो हृदि निरुध्य च ।
मूर्ध्न्याधायात्मनः प्राण-
मास्थितो योगधारणाम् ॥ १२ ॥

सर्वद्वाराणि सर्वाणि च तानि द्वाराणि च सर्वद्वाराणि उपलब्धौ, तानि सर्वाणि संयम्य संयमनं कृत्वा मनः हृदि हृदयपुण्डरीके निरुध्य निरोधं कृत्वा निष्प्रचारमापाद्य, तत्र वशीकृतेन मनसा हृदयात् ऊर्ध्वगामिन्या नाड्या ऊर्ध्वमारुह्य

मूर्ध्नि आधाय आत्मनः प्राणम् आस्थितः प्रवृत्त योगधारणां धारयितुम् ॥

तत्रैव च धारयन्—

ओमित्येकाक्षरं ब्रह्म
व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं
स याति परमां गतिम् ॥ १३ ॥

ओमिति एकाक्षरं ब्रह्म ब्रह्मणः अभिधानभूतम् ओंकार व्याहरन् उच्चारयन्, तदर्थभूतं माम् ईश्वरम् अनुस्मरन् अनुचिन्तयन् यः प्रयाति म्रियते, स त्यजन् परित्यजन् देहं शरीरम्— 'त्यजन् देहम्' इति प्रयाणविशेषणार्थम् देहत्यागेन प्रयाणम् आत्मनः, न स्वरूपनाशेनेत्यर्थ — स. एव याति गच्छति परमां प्रकृष्टां गतिम् ॥

किंच—

अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥

अनन्यचेताः न अन्यविषये चेतः यस्य सोऽयम् अनन्यचेताः, योगी सततं सर्वदा य मां परमेश्वरं स्मरति नित्यश. ।

सततम् इति नैरन्तर्यम् उच्यते, नित्यशः इति दीर्घकालत्वम् उच्यते । न षण्मासं संवत्सरं वा, किं तर्हि ? यावज्जीवं नैरन्तर्येण यः मां स्मरतीत्यर्थः । तस्य योगिनः अहं सुलभः सुखेन लभ्यः हे पार्थ, नित्ययुक्तस्य सदा समाहितचित्तस्य योगिनः । यतः एवम्, अतः अनन्यचेताः सन् मयि सदा समाहितः भवेत् ॥

तव सौलभ्येन किं स्यात् इत्युच्यते; शृणु तत् मम सौलभ्येन यत् भवति—

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥

माम् उपेत्य माम् ईश्वरम् उपेत्य मद्भावमापद्य पुनर्जन्म पुनरुत्पत्तिं नाप्नुवन्ति न प्राप्नुवन्ति । किंविशिष्ट पुनर्जन्म न प्राप्नुवन्ति इति, तद्विशेषणमाह— दुःखालयं दुःखानाम् आध्यात्मिकादीनां आलयम् आश्रयम् आलीयन्ते यस्मिन् दुःखानि इति दुःखालयं जन्म । न केवलं दुःखालयम्, अशाश्वतम् अनवस्थितस्वरूपं च । नाप्नुवन्ति ईदृशं पुनर्जन्म महात्मानः यतयः संसिद्धिं मोक्षाख्यां परमां प्रकृष्टां गताः प्राप्ताः । ये पुनः मां न प्राप्नुवन्ति ते पुनः आवर्तन्ते ॥

किं पुनः त्वत्त. अन्यत् प्राप्ताः पुनरावर्तन्ते इति, उच्यते—

आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ १६ ॥

आ ब्रह्मभुवनात् भवन्ति अस्मिन् भूतानि इति भुवनम्, ब्रह्मणो भुवनं ब्रह्मभुवनम्, ब्रह्मलोक इत्यर्थः, आ ब्रह्मभुवनात् सह ब्रह्मभुवनेन लोकाः सर्वे पुनरावर्तिनः पुनरावर्तनस्वभावाः हे अर्जुन । माम् एकम् उपेत्य तु कौन्तेय पुनर्जन्म पुनरुत्पत्तिः न विद्यते ॥

ब्रह्मलोकसहिताः लोकाः कस्मात् पुनरावर्तिन.[१] कालपरिच्छिन्नत्वात् । कथम्[२]—

सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः ।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥

सहस्रयुगपर्यन्तं सहस्राणि युगानि पर्यन्तः पर्यवसानं यस्य अह्नः तत् अहः सहस्रयुगपर्यन्तम्, ब्रह्मणः प्रजापतेः विराजः विदुः, रात्रिम् अपि युगसहस्रान्तां अहःपरिमाणामेव । के विदुरित्याह— ते अहोरात्रविद. कालसंख्याविदो जनाः इत्यर्थः । यतः एवं कालपरिच्छिन्नाः ते, अतः पुनरावर्तिनो लोकाः ॥

प्रजापतेः अहनि यत् भवति रात्रौ च, तत् उच्यते—

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे ।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥ १८ ॥

अव्यक्तात् अव्यक्तं प्रजापतेः स्वापावस्था तस्मात् अव्यक्तात् व्यक्तयः व्यज्यन्त इति व्यक्तयः स्थावरजङ्गमलक्षणाः सर्वाः प्रजाः प्रभवन्ति अभिव्यज्यन्ते, अह्न. आगमः अहरागमः तस्मिन् अहरागमे काले ब्रह्मणः प्रबोधकाले । तथा रात्र्यागमे ब्रह्मणः स्वापकाले प्रलीयन्ते सर्वाः व्यक्तयः तत्रैव पूर्वोक्ते अव्यक्तसंज्ञके ॥

अकृताभ्यागमकृतविप्रणाशदोषपरिहारार्थम्, बन्धमोक्षशास्त्रप्रवृत्तिसाफल्यप्रदर्शनार्थम् अविद्यादिक्लेशमूलकर्माशयवशाच्च अवशः भूतग्रामः भूत्वा भूत्वा प्रलीयते इत्यतः संसारे वैराग्यप्रदर्शनार्थं च इदमाह—

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ।
रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥ १९ ॥

भूतग्राम. भूतसमुदायः स्थावरजङ्गमलक्षणः यः पूर्वस्मिन् कल्पे आसीत् स एव अयं नान्यः । भूत्वा भूत्वा

अहरागमे, प्रलीयते पुनः पुनः रात्र्यागमे अह्न क्षये अवशः अस्वतन्त्र एव, हे पार्थ, प्रभवति जायते अवश एव अहरागमे ॥

यत् उपन्यस्तम् अक्षरम्, तस्य प्राप्त्युपायो निर्दिष्टः 'ओमित्येकाक्षरं ब्रह्म' इत्यादिना । अथ इदानीम् अक्षरस्यैव स्वरूपनिर्दिदिक्षया इदम् उच्यते, अनेन योगमार्गेण इदं गन्तव्यमिति—

परस्तस्मात्तु भावोऽन्यो-
ऽव्यक्तोऽव्यक्तात्सनातनः ।
यः स सर्वेषु भूतेषु
नश्यत्सु न विनश्यति ॥ २० ॥

परः व्यतिरिक्तः भिन्नः, कुत ? तस्मात् पूर्वोक्तात् । तु-शब्दः अक्षरस्य विवक्षितस्य अव्यक्तात् वैलक्षण्यविशेषणार्थः । भावः अक्षराख्यं परं ब्रह्म । व्यतिरिक्तत्वे सत्यपि सालक्षण्यप्रसङ्गोऽस्तीति तद्विनिवृत्त्यर्थम् आह— अन्यः इति । अन्यः विलक्षणः । स च अव्यक्तः अनिन्द्रियगोचरः । 'परस्तस्मात्' इत्युक्तम्, कस्मात् पुनः परः ? पूर्वोक्तात् भूतग्रामबीजभूतात् अविद्यालक्षणात् अव्यक्तात् । अन्यः विल-

क्षणः भावः इत्यभिप्रायः । सनातन चिरन्तन य. स· भावः सर्वेषु भूतेषु ब्रह्मादिषु नश्यत्सु न विनश्यति ॥

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥ २१ ॥

योऽसौ अव्यक्तः अक्षरः इत्युक्तः, तमेव अक्षरसंज्ञकम् अव्यक्तं भावम् आहुः परमां प्रकृष्टां गतिम् । यं परं भावं प्राप्य गत्वा न निवर्तन्ते संसाराय, तत् धाम स्थानं परमं प्रकृष्टं मम, विष्णो परमं पदमित्यर्थः ॥

तल्लब्धे. उपायः उच्यते—

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥

पुरुषः पुरि शयनात् पूर्णत्वाद्वा, स परः पार्थ, परः निरतिशयः, यस्मात् पुरुषात् न परं किंचित् । सः भक्त्या लभ्यस्तु ज्ञानलक्षणया अनन्यया आत्मविषयया । यस्य पुरुषस्य अन्तःस्थानि मध्यस्थानि भूतानि कार्यभूतानि; कार्यं हि कारणस्य अन्तर्वर्ति भवति । येन पुरुषेण सर्वं इदं जगत् ततं व्याप्तम् आकाशेनेव घटादि ॥

प्रकृतानां योगिनां प्रणवावेशितब्रह्मबुद्धीनां कालान्तरमुक्तिभाजां ब्रह्मप्रतिपत्तये उत्तरो मार्गो वक्तव्य इति 'यत्र काले' इत्यादि विवक्षितार्थसमर्पणार्थम् उच्यते, आवृत्तिमार्गोपन्यासः इतरमार्गस्तुत्यर्थः—

यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥

यत्र काले प्रयाताः इति व्यवहितेन संबन्धः । यत्र यस्मिन् काले तु अनावृत्तिम् अपुनर्जन्म आवृत्तिं तद्विपरीतां चैव । योगिनः इति योगिनः कर्मिणश्च उच्यन्ते, कर्मिणस्तु गुणतः— 'कर्मयोगेन योगिनाम्' इति विशेषणात्— योगिनः । यत्र काले प्रयाताः मृताः योगिनः अनावृत्तिं यान्ति, यत्र काले च प्रयाताः आवृत्तिं यान्ति, तं कालं वक्ष्यामि भरतर्षभ ॥

तं कालमाह—

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥

अग्निः कालाभिमानिनी देवता । तथा ज्योतिरपि देवतैव कालाभिमानिनी । अथवा, अग्निर्ज्योतिषी यथा-

श्रुते एव देवते। भूयसा तु निर्देशो 'यत्र काले' 'तं कालम्' इति आम्रवणवत्। तथा अहः देवता अहरभिमानिनी, शुक्लः शुक्लपक्षदेवता; षण्मासा उत्तरायणम्, तत्रापि देवतैव मार्गभूता इति स्थित. अन्यत्र अयं न्यायः। तत्र तस्मिन् मार्गे प्रयाताः मृताः गच्छन्ति ब्रह्म ब्रह्मविदो ब्रह्मोपासकाः ब्रह्मोपासनपरा जना· । 'क्रमेण' इति वाक्यशेषः। न हि सद्योमुक्तिभाजां सम्यग्दर्शननिष्ठानां गतिः आगतिर्वा क्वचित् अस्ति, 'न तस्य प्राणा उत्क्रामन्ति' इति श्रुतेः। ब्रह्मसंलीनप्राणा एव ते ब्रह्ममया ब्रह्मभूता एव ते।

धूमो रात्रिस्तथा कृष्णः
षण्मासा दक्षिणायनम्।
तत्र चान्द्रमसं ज्योति-
र्योगी प्राप्य निवर्तते॥ २५॥

धूमो रात्रिः धूमाभिमानिनी रात्र्यभिमानिनी च देवता। तथा कृष्णः कृष्णपक्षदेवता। षण्मासा दक्षिणायनम् इति च पूर्ववत् देवतैव। तत्र चन्द्रमसि भवं चान्द्रमसं ज्योतिः फलम् इष्टादिकारी योगी कर्मी प्राप्य भुक्त्वा तत्क्षयात् इह पुनः निवर्तते॥

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्ययावर्तते पुनः ॥ २६ ॥

शुक्लकृष्णे शुक्ला च कृष्णा च शुक्लकृष्णे, ज्ञानप्रकाशकत्वात् शुक्ला, तदभावात् कृष्णा; एते शुक्लकृष्णे हि गती जगतः इति अधिकृतानां ज्ञानकर्मणोः, न जगतः सर्वस्यैव एते गती संभवतः; शाश्वते नित्ये, संसारस्य नित्यत्वात्, मते अभिप्रेते । तत्र एकया शुक्लया याति अनावृत्तिम्, अन्यया इतरया आवर्तते पुनः भूयः ॥

नैते सृती पार्थ जानन्योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥२७॥

न एते यथोक्ते सृती मार्गौ पार्थ जानन् संसाराय एका, अन्या मोक्षाय इति, योगी न मुह्यति कश्चन कश्चिदपि । तस्मात् सर्वेषु कालेषु योगयुक्तः समाहितो भव अर्जुन ॥

शृणु तस्य योगस्य माहात्म्यम्—

वेदेषु यज्ञेषु तपःसु चैव
दानेषु यत्पुण्यफलं प्रदिष्टम् ।

अत्येति तत्सर्वमिदं विदित्वा
योगी परं स्थानमुपैति चाद्यम् ॥ २८ ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां
भीष्मपर्वणि श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे तारकब्रह्मयोगो नाम


अष्टमोऽध्यायः ॥

वेदेषु सम्यगधीतेषु यज्ञेषु च साद्गुण्येन अनुष्ठितेषु तपःसु च सुतप्तेषु दानेषु च सम्यग्दत्तेषु, एतेषु यत् पुण्यफलं प्रदिष्टं शास्त्रेण, अत्येति अतीत्य गच्छति तत् सर्वं फलजातम्, इदं विदित्वा सप्तप्रश्ननिर्णयद्वारेण उक्तम् अर्थं सम्यक् अवधार्य अनुष्ठाय योगी, परम् उत्कृष्टम् ऐश्वरं स्थानम् उपैति च प्रतिपद्यते आद्यम् आदौ भवम्, कारणं ब्रह्म इत्यर्थः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपाद-
शिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये

अष्टमोऽध्यायः ॥





श्रीमच्छंकरभगवत्पादविरचितम्

श्रीमद्भगवद्गीताभाष्यम्

नवमोऽध्यायः

नवमोऽध्यायः ॥



अष्टमे नाडीद्वारेण धारणायोगः सगुण. उक्त. । तस्य च फलम् अग्न्यर्चिरादिक्रमेण कालान्तरे ब्रह्मप्राप्तिलक्षणमेव अनावृत्तिरूपं निर्दिष्टम् । तत्र 'अनेनैव प्रकारेण मोक्षप्राप्तिफलम् अधिगम्यते, न अन्यथा' इति तदाशङ्क्याव्याविवर्तयिषया श्रीभगवान् उवाच—

श्रीभगवानुवाच—

इदं तु ते गुह्यतमं
प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं
यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १ ॥

इदं ब्रह्मज्ञानं वक्ष्यमाणम् उक्त च पूर्वेषु अध्यायेषु, तत् बुद्धौ संनिधीकृत्य इदम् इत्याह । तु-शब्दो विशेषनि-

धारणार्थः । इदमेव तु सम्यग्ज्ञानं साक्षात् मोक्षप्राप्तिसाधनम् 'वासुदेवः सर्वमिति' 'आत्मैवेदं सर्वम्' 'एकमेवाद्वितीयम्' इत्यादिश्रुतिस्मृतिभ्यः, नान्यत्, 'अथ ते येऽन्यथातो विदुः अन्यराजान ते क्षय्यलोका भवन्ति' इत्यादिश्रुतिभ्यश्च । ते तुभ्यं गुह्यतमं गोप्यतमं प्रवक्ष्यामि कथयिष्यामि अनसूयवे असूयारहिताय । किं तत्? ज्ञानम् । किंविशिष्टम्? विज्ञानसहितम् अनुभवयुक्तम्, यत् ज्ञात्वा प्राप्य मोक्ष्यसे अशुभात् संसारबन्धनात् ॥

तच्च—

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥ २ ॥

राजविद्या विद्यानां राजा, दीप्त्यतिशयवत्त्वात्, दीप्यते हि इयम् अतिशयेन ब्रह्मविद्या सर्वविद्यानाम् । तथा राजगुह्यं गुह्यानां राजा । पवित्रं पावनं इदम् उत्तमं सर्वेषां पावनानां शुद्धिकारणं ब्रह्मज्ञानम् उत्कृष्टतमम् । अनेकजन्मसहस्रसंचितमपि धर्माधर्मादि समूलं कर्म क्षणमात्रादेव भस्मीकरोति इत्यतः किं तस्य पावनत्वं वक्तव्यम् । किंच—प्रत्यक्षावगमं प्रत्यक्षेण सुखादेरिव अवगमो यस्य तत् प्रत्यक्षावगमम् । अनेकगुणवतोऽपि धर्मविरुद्धत्वं दृष्टम्, न तथा आत्मज्ञानं धर्म-

विरोधि, किंतु धर्म्यं धर्मादनपेतम् । एवमपि, स्याद्दुःखसंपाद्यमित्यत आह— सुसुखं कर्तुम्. यथा रत्नविवेकविज्ञानम् । तत्र अल्पायासानामन्येषां कर्मणां सुखसंपाद्यानाम् अल्पफलत्वं दुष्कराणां च महाफलत्वं दृष्टमिति, इदं तु सुखसंपाद्यत्वात् फलक्षयात् व्येति इति प्राप्ते, आह—अव्ययम् इति । न अस्य फलतः कर्मवत् व्ययः अस्तीति अव्ययम् । अतः श्रद्धेयम् आत्मज्ञानम् ॥

ये पुनः—

अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥३॥

अश्रद्दधाना श्रद्धाविरहिताः आत्मज्ञानस्य धर्मस्य अस्य स्वरूपे तत्फले च नास्तिकाः पापकारिणः, असुराणाम् उपनिषदं देहमात्रात्मदर्शनमेव प्रतिपन्नाः असुतृपः पापा. पुरुषाः अश्रद्दधानाः, परंतप, अप्राप्य मां परमेश्वरम्, मत्प्राप्तौ नैव आशङ्का इति मत्प्राप्तिमार्गभेदभक्तिमात्रमपि अप्राप्य इत्यर्थः । निवर्तन्ते निश्चयेन वर्तन्ते, क्व?—मृत्युसंसारवर्त्मनि मृत्युयुक्तः संसारः मृत्युसंसारः तस्य वर्त्म नरकतिर्यगादिप्राप्तिमार्गः, तस्मिन्नेव वर्तन्ते इत्यर्थः ॥

स्तुत्या अर्जुनमभिमुखीकृत्य आह—

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥

मया मम यः परो भावः तेन ततं व्याप्तं सर्वम् इदं जगत् अव्यक्तमूर्तिना न व्यक्ता मूर्तिः स्वरूपं यस्य मम सोऽहमव्यक्तमूर्तिः तेन मया अव्यक्तमूर्तिना, करणागोचर-स्वरूपेण इत्यर्थः । तस्मिन् मयि अव्यक्तमूर्तौ स्थितानि मत्स्थानि, सर्वभूतानि ब्रह्मादीनि स्तम्बपर्यन्तानि । न हि निरात्मकं किंचित् भूतं व्यवहाराय अवकल्पते । अतः मत्स्थानि मया आत्मना आत्मवत्त्वेन स्थितानि, अतः मयि स्थितानि इति उच्यन्ते । तेषां भूतानाम् अहमेव आत्मा इत्यतः तेषु स्थितः इति मूढबुद्धीनां अवभासते, अतः ब्रवीमि— न च अहं तेषु भूतेषु अवस्थितः, मूर्तवत् संश्लेषाभावेन आकाशस्यापि अन्तरतमो हि अहम् । न हि असंसर्गि वस्तु क्वचित् आधेयभावेन अवस्थितं भवति ॥

अत एव असंसर्गित्वात् मम—

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥ ५ ॥

न च मत्स्थानि भूतानि ब्रह्मादीनि । पश्य मे योगं युक्तिं घटनं मे मम ऐश्वरम् ईश्वरस्य इमम् ऐश्वरम्, योगम् आत्मनो याथात्म्यमित्यर्थः । तथा च श्रुति असंसर्गित्वात् असङ्गतां दर्शयति— 'असङ्गो न हि सज्जते' इति । इदं च आश्चर्यम् अन्यत् पश्य— भूतभृत् असङ्गोऽपि सन् भूतानि बिभर्ति, न च भूतस्थः, यथोक्तेन न्यायेन दर्शितत्वात् भूतस्थत्वानुपपत्तेः । कथं पुनरुच्यते 'असौ मम आत्मा' इति ? विभज्य देहादिसङ्घातं तस्मिन् अहंकारम् अध्यारोप्य लोकबुद्धिम् अनुसरन् व्यपदिशति 'मम आत्मा' इति, न पुनः आत्मनः आत्मा अन्यः इति लोकवत् अजानन् । तथा भूतभावनः भूतानि भावयति उत्पादयति वर्धयतीति वा भूतभावन. ॥

यथोक्तेन श्लोकद्वयेन उक्तम् अर्थं दृष्टान्तेन उपपादयन् आह—

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥

यथा लोके आकाशस्थित· आकाशे स्थितः नित्यं सदा वायु. सर्वत्र गच्छतीति सर्वत्रगः महान् परिमाणतः, तथा

आकाशवत् सर्वगते मयि असंश्लेषेणैव स्थितानि इत्येवम् उपधारय विजानीहि ॥

एवं वायुः आकाशे इव मयि स्थितानि सर्वभूतानि स्थितिकाले, तानि—

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥

सर्वभूतानि कौन्तेय प्रकृति त्रिगुणात्मिकाम् अपरां निकृष्टां यान्ति मामिकां मदीयां कल्पक्षये प्रलयकाले । पुनः भूयः तानि भूतानि उत्पत्तिकाले कल्पादौ विसृजामि उत्पादयामि अहं पूर्ववत् ॥

एवम् अविद्यालक्षणाम्—

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८ ॥

प्रकृति स्वां स्वीयाम् अवष्टभ्य वशीकृत्य विसृजामि पुन पुनः प्रकृतितो जातं भूतग्रामं भूतसमुदायम् इमं वर्तमानं कृत्स्नं समग्रम् अवशम् अस्वतन्त्रम्, अविद्यादिदोषैः परवशीकृतम्, प्रकृतेः वशात् स्वभाववशात् ॥

तर्हि तस्य ते परमेश्वरस्य, भूतग्रामम् इमं विषमं विदधतः, तन्निमित्ताभ्यां धर्माधर्माभ्यां संबन्धः स्यादिति, इदम् आह भगवान्—

न च मां तानि कर्माणि निबध्नन्ति धनंजय ।
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९ ॥

न च माम् ईश्वरं तानि भूतग्रामस्य विषमसर्गनिमित्तानि कर्माणि निबध्नन्ति धनंजय । तत्र कर्मणां असंबन्धित्वे कारणमाह— उदासीनवत् आसीनं यथा उदासीन. उपेक्षकः कश्चित् तद्वत् आसीनम्, आत्मन. अविक्रियत्वात्, असक्तं फलासङ्गरहितम्, अभिमानवर्जितम् 'अहं करोमि' इति तेषु कर्मसु । अतः अन्यस्यापि कर्तृत्वाभिमानाभावः फलासङ्गाभावश्च असंबन्धकारणम्, अन्यथा कर्मभिः बध्यते मूढः कोशकारवत् इत्यभिप्रायः ॥

तत्र 'भूतग्राममिमं विसृजामि' 'उदासीनवदासीनम्' इति च विरुद्धम् उच्यते, इति तत्परिहारार्थम् आह—

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥ १० ॥

मया अध्यक्षेण सर्वतो दृशिमात्रस्वरूपेण अविक्रियात्मना अध्यक्षेण मया, मम माया त्रिगुणात्मिका अविद्यालक्षणा प्रकृतिः सूयते उत्पादयति सचराचरं जगत्। तथा च मन्त्रवर्णः— 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च' इति। हेतुना निमित्तेन अनेन अध्यक्षत्वेन कौन्तेय जगत् सचराचरं व्यक्ताव्यक्तात्मकं विपरिवर्तते सर्वावस्थासु। दृशिकर्मत्वापत्तिनिमित्ता हि जगतः सर्वा प्रवृत्तिः — अहम् इदं भोक्ष्ये, पश्यामि इदम्, शृणोमि इदम्, सुखमनुभवामि, दुःखमनुभवामि, तदर्थमिदं करिष्ये, इदं ज्ञास्यामि, इत्याद्या अवगतिनिष्ठा अवगत्यवसानैव। 'यो अस्याध्यक्षः परमे व्योमन्' इत्यादयश्च मन्त्राः एतमर्थं दर्शयन्ति। ततश्च एकस्य देवस्य सर्वाध्यक्षभूतचैतन्यमात्रस्य परमार्थतः सर्वभोगानभिसंबन्धिनः अन्यस्य चेतनान्तरस्य अभावे भोक्तुः अन्यस्य अभावात्। किंनिमित्ता इयं सृष्टिः इत्यत्र प्रश्नप्रतिवचने अनुपपन्ने, 'को अद्धा वेद क इह प्रवोचत्। कुत आजाता कुत इय विसृष्टिः' इत्यादिमन्त्रवर्णेभ्यः। दर्शितं च भगवता— 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः' इति॥

एवं मां नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वजन्तूनाम् आत्मानमपि सन्तम्—

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ॥ ११ ॥

अवजानन्ति अवज्ञां परिभवं कुर्वन्ति मां मूढाः अविवेकिनः मानुषीं मनुष्यसंबन्धिनी तनु देहम् आश्रितम्, मनुष्यदेहेन व्यवहरन्तमित्येतत्, परं प्रकृष्टं भावं परमात्मतत्त्वम् आकाशकल्पम् आकाशादपि अन्तरतमम् अजानन्तो मम भूतमहेश्वरं सर्वभूतानां महान्तम् ईश्वरं स्वात्मानम् । ततश्च तस्य मम अवज्ञानभावनेन आहताः ते वराकाः ॥

कथम्[१]—

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥

मोघाशाः वृथा आशाः आशिषः येषां ते मोघाशाः, तथा मोघकर्माणः यानि च अग्निहोत्रादीनि तैः अनुष्ठीयमानानि कर्माणि तानि च, तेषां भगवत्परिभवात्, स्वात्मभूतस्य अवज्ञानात्, मोघान्येव निष्फलानि कर्माणि भवन्तीति मोघकर्माणः । तथा मोघज्ञानाः मोघं निष्फलं ज्ञानं

येषां ते मोघज्ञानाः, ज्ञानमपि तेषां निष्फलमेव स्यात् । विचेतसः विगतविवेकाश्च ते भवन्ति इत्यभिप्रायः । किंच— ते भवन्ति राक्षसी रक्षसां प्रकृतिं स्वभावम् आसुरीम् असुराणां च प्रकृतिं मोहिनी मोहकरीं देहात्मवादिनीं श्रिताः आश्रिता, छिन्द्धि, भिन्द्धि, पिब, खाद, परस्वमपहर, इत्येवं वदनशीला क्रूरकर्माणो भवन्ति इत्यर्थः, 'असुर्या नाम ते लोकाः' इति श्रुतेः ॥

ये पुनः श्रद्दधानाः भगवद्भक्तिलक्षणे मोक्षमार्गे प्रवृत्ताः—

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥

महात्मानस्तु अक्षुद्रचित्ताः मां ईश्वरं पार्थ दैवीं देवानां प्रकृतिं शमदमदयाश्रद्धादिलक्षणाम् आश्रिताः सन्तः भजन्ति सेवन्ते अनन्यमनसः अनन्यचित्ताः ज्ञात्वा भूतादिं भूतानां वियदादीनां प्राणिनां च आदिं कारणम् अव्ययम् ॥

कथम्?—

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥

सततं सर्वदा भगवन्तं ब्रह्मस्वरूपं मां कीर्तयन्तः, यतन्तश्च इन्द्रियोपसंहारशमदमदयाहिंसादिलक्षणैः धर्मैः प्रयतन्तश्च, दृढव्रताः दृढं स्थिरम् अचाल्यं व्रतं येषां ते दृढव्रताः नमस्यन्तश्च मां हृदयेशयम् आत्मानं भक्त्या नित्ययुक्ताः सन्तः उपासते सेवन्ते ॥

ते केन केन प्रकारेण उपासते इत्युच्यते—

ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥१५॥

ज्ञानयज्ञेन ज्ञानमेव भगवद्विषयं यज्ञः तेन ज्ञानयज्ञेन, यजन्तः पूजयन्तः माम् ईश्वरं च अपि अन्ये अन्याम् उपासनां परित्यज्य उपासते । तच्च ज्ञानम्—एकत्वेन 'एकमेव परं ब्रह्म' इति परमार्थदर्शनेन यजन्तः उपासते । केचिच्च पृथक्त्वेन 'आदित्यचन्द्रादिभेदेन स एव भगवान् विष्णुः अवस्थितः' इति उपासते । केचित् 'बहुधा अवस्थितः स एव भगवान् सर्वतोमुखः विश्वरूपः' इति तं विश्वरूपं सर्वतोमुखं बहुधा बहुप्रकारेण उपासते ॥

यदि बहुभिः प्रकारैः उपासते, कथं त्वामेव उपासते इति, अत आह—

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥ १६ ॥

अहं क्रतुः श्रौतकर्मभेदः अहमेव । अहं यज्ञः स्मार्तः । किंच स्वधा अन्नम् अहम्, पितृभ्यो यत् दीयते । अहम् औषधं सर्वप्राणिभिः यत् अद्यते तत् औषधशब्दशब्दितं व्रीहियवादिसाधारणम् । अथवा स्वधा इति सर्वप्राणिसाधारणम् अन्नम्, औषधम् इति व्याध्युपशमनार्थं भेषजम् । मन्त्रः अहम्, येन पितृभ्यो देवताभ्यश्च हविः दीयते । अहमेव आज्यं हविश्च । अहम् अग्निः, यस्मिन् हूयते हविः सः अग्निः अहम् । अहं हुतं हवनकर्म च ॥

किंच—

पिताहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च ॥ १७ ॥

पिता जनयिता अहम् अस्य जगतः, माता जनयित्री, धाता कर्मफलस्य प्राणिभ्यो विधाता, पितामहः पितुः पिता, वेद्यं वेदितव्यम्, पवित्रं पावनम् ओंकारः, ऋक् साम यजुः एव च ॥

किंच—

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् ।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥

गतिः कर्मफलम्, भर्ता पोष्टा, प्रभुः स्वामी, साक्षी प्राणिनां कृताकृतस्य, निवास. यस्मिन् प्राणिनो निवसन्ति, शरणम् आर्तानाम्, प्रपन्नानामार्तिहरः । सुहृत् प्रत्युपकारानपेक्षः सन् उपकारी, प्रभवः उत्पत्ति जगत., प्रलयः प्रलीयते अस्मिन् इति, तथा स्थानं तिष्ठति अस्मिन् इति, निधानं निक्षेपः कालान्तरोपभोग्य प्राणिनाम्, बीजं प्ररोहकारणं प्ररोहधर्मिणाम्, अव्यय यावत्संसारभावित्वात् अव्ययम्, न हि अबीजं किंचित् प्ररोहति, नित्यं च प्ररोहदर्शनात् बीजसंततिः न व्येति इति गम्यते ॥

किंच—

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥ १९ ॥

तपामि अहम् आदित्यो भूत्वा कैश्चित् रश्मिभिः उल्बणैः । अहं वर्ष कैश्चित् रश्मिभि उत्सृजामि । उत्सृज्य पुनः निगृह्णामि कैश्चित् रश्मिभिः अष्टभिः मासैः पुनः उत्सृ-

जामि प्रावृषि । अमृतं चैव देवानाम्, मृत्युश्च मर्त्यानाम् । सत् यस्य यत् संबन्धितया विद्यमानं तत्, तद्विपरीतम् असच्च एव अहम् अर्जुन । न पुनः अत्यन्तमेव असत् भगवान्, स्वयं कार्यकारणे वा सदसती ॥

ये पूर्वोक्तैः निवृत्तिप्रकारैः एकत्वपृथक्त्वादिविज्ञानै. यज्ञै मां पूजयन्तः उपासते ज्ञानविदः, ते यथाविज्ञानं मामेव प्राप्नुवन्ति । ये पुनः अज्ञाः कामकामा.—

त्रैविद्या मां सोमपाः पूतपापा
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेन्द्रलोक-
मश्नन्ति दिव्यान्दिवि देवभोगान् ॥२०॥

त्रैविद्याः ऋग्यजुःसामविदः मां वस्वादिदेवरूपिणं सोमपा. सोमं पिबन्तीति सोमपाः, तेनैव सोमपानेन पूतपापाः शुद्ध-किल्बिषाः, यज्ञैः अग्निष्टोमादिभिः इष्ट्वा पूजयित्वा स्वर्गति स्वर्गगमनं स्वरेव गतिः स्वर्गतिः ताम्, प्रार्थयन्ते । ते च पुण्यं पुण्यफलम् आसाद्य संप्राप्य सुरेन्द्रलोकं शतक्रतो स्थानम् अ-श्नन्ति भुञ्जते दिव्यान् दिवि भवान् अप्राकृतान् देवभोगान् देवानां भोगान् ॥

ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयीधर्ममनुप्रपन्ना
गतागतं कामकामा लभन्ते ॥ २१ ॥

ते तं भुक्त्वा स्वर्गलोकं विशालं विस्तीर्णं क्षीणे पुण्ये मर्त्यलोकं विशन्ति आविशन्ति । एवं यथोक्तेन प्रकारेण त्रयी-धर्मं केवलं वैदिकं कर्म अनुप्रपन्ना. गतागतं गतं च आगतं च गतागतं गमनागमनं कामकामाः कामान् कामयन्ते इति कामकामाः लभन्ते गतागतमेव, न तु स्वातन्त्र्यं क्वचित् लभन्ते इत्यर्थः ॥

ये पुनः निष्कामाः सम्यग्दर्शिनः—

अनन्याश्चिन्तयन्तो मां
ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां
योगक्षेमं वहाम्यहम् ॥ २२ ॥

अनन्याः अपृथग्भूताः परं देवं नारायणम् आत्मत्वेन गता सन्तः चिन्तयन्तः मां ये जनाः सन्यासिन. पर्युपासते, तेषां

परमार्थदर्शिनां नित्याभियुक्तानां सततामियोगिनां योगक्षेमं योगः अप्राप्तस्य प्रापणं क्षेमः तद्रक्षणं तदुभयं वहामि प्रापयामि अहम्; 'ज्ञानी त्वात्मैव मे मतम्' 'स च मम प्रियः' यस्मात्, तस्मात् ते मम आत्मभूताः प्रियाश्च इति ॥

ननु अन्येषामपि भक्तानां योगक्षेमं वहत्येव भगवान्। सत्यं वहत्येव, किंतु अयं विशेषः— अन्ये ये भक्ताः ते आत्मार्थं स्वयमपि योगक्षेमम् ईहन्ते, अनन्यदर्शिनस्तु न आत्मार्थं योगक्षेमम् ईहन्ते, न हि ते जीविते मरणे वा आत्मनः गृद्धिं कुर्वन्ति; केवलमेव भगवच्छरणाः ते; अतः भगवानेव तेषां योगक्षेमं वहतीति ॥

ननु अन्या अपि देवताः त्वमेव चेत्, तद्भक्ताश्च त्वामेव यजन्ते। सत्यमेवम्—

येऽप्यन्यदेवताभक्ता
यजन्ते श्रद्धयान्विताः।
तेऽपि मामेव कौन्तेय
यजन्त्यविधिपूर्वकम् ॥ २३ ॥

येऽपि अन्यदेवताभक्ताः अन्यासु देवतासु भक्ताः अन्य-

देवताभक्ताः सन्तः यजन्ते पूजयन्ति श्रद्धया आस्तिक्यबुद्ध्या अन्विताः अनुगताः, तेऽपि मामेव कौन्तेय यजन्ति अविधिपूर्वकम् अविधिः अज्ञानं तत्पूर्वकं यजन्ते इत्यर्थः ॥

कस्मात् ते अविधिपूर्वकं यजन्ते इत्युच्यते, यस्मात्—

अहं हि सर्वयज्ञानां
भोक्ता च प्रभुरेव च।
न तु मामभिजानन्ति
तत्त्वेनातश्च्यवन्ति ते ॥ २४ ॥

अहं हि सर्वयज्ञानां श्रौतानां स्मार्तानां च सर्वेषां यज्ञानां देवतात्मत्वेन भोक्ता च प्रभुः एव च। मत्स्वामिको हि यज्ञः, 'अधियज्ञोऽहमेवात्र' इति हि उक्तम्। तथा न तु माम् अभिजानन्ति तत्त्वेन यथावत्। अतश्च अविधिपूर्वकम् इष्ट्वा यागफलात् च्यवन्ति प्रच्यवन्ते ते ॥

येऽपि अन्यदेवताभक्तिमत्त्वेन अविधिपूर्वकं यजन्ते, तेषामपि यागफलं अवश्यंभावि। कथम्?—

यान्ति देवव्रता देवा-
न्पितॄन्यान्ति पितृव्रताः।

भूतानि यान्ति भूतेज्या
यान्ति मद्याजिनोऽपि माम् ॥ २५ ॥

यान्ति गच्छन्ति देवव्रताः देवेषु व्रतं नियमो भक्तिश्च येषां ते देवव्रताः देवान् यान्ति । पितॄन् अग्निष्वात्तादीन् यान्ति पितृव्रताः श्राद्धादिक्रियापराः पितृभक्ता. । भूतानि विनायकमातृगणचतुर्भगिन्यादीनि यान्ति भूतेज्याः भूतानां पूजकाः । यान्ति मद्याजिनः मद्यजनशीलाः वैष्णवाः मामेव यान्ति । समाने अपि आयासे मामेव न भजन्ते अज्ञानात्, तेन ते अल्पफलभाजः भवन्ति इत्यर्थः ॥

न केवलं मद्भक्तानाम् अनावृत्तिलक्षणम् अनन्तफलम्, सुखाराधनश्च अहम् । कथम्?—

पत्रं पुष्पं फलं तोयं
यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृत-
मश्नामि प्रयतात्मनः ॥ २६ ॥

पत्रं पुष्पं फलं तोयम् उदकं यः मे मह्यं भक्त्या प्रयच्छति, तत् अहं पत्रादि भक्त्या उपहृतं भक्तिपूर्वकं प्रापितं भक्त्युपहृतम् अश्नामि गृह्णामि प्रयतात्मनः शुद्धबुद्धेः ॥

यतः एवम्, अत.—

यत्करोषि यदश्नासि
यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय
तत्कुरुष्व मदर्पणम् ॥ २७ ॥

यत् करोषि स्वतः प्राप्तम्, यत् अश्नासि, यच्च जुहोषि हवनं निर्वर्तयसि श्रौतं स्मार्तं वा, यत् ददासि प्रयच्छसि ब्राह्मणादिभ्यः हिरण्यान्नाज्यादि, यत् तपस्यसि तपः चरसि कौन्तेय, तत् कुरुष्व मदर्पणं मत्समर्पणम् ॥

एवं कुर्वतः तव यत् भवति, तत् शृणु—

शुभाशुभफलैरेवं
मोक्ष्यसे कर्मबन्धनैः ।
संन्यासयोगयुक्तात्मा
विमुक्तो मामुपैष्यसि ॥ ५८ ॥

शुभाशुभफलै. शुभाशुभे इष्टानिष्टे फले येषां तानि शुभाशुभफलानि कर्माणि तै. शुभाशुभफलैः कर्मबन्धनै. कर्माण्येव बन्धनानि कर्मबन्धनानि तैः कर्मबन्धनै. एवं मदर्पणं कुर्वन्

मोक्ष्यसे । सोऽयं संन्यासयोगो नाम, सन्यासश्च असौ मत्समर्पणतया कर्मत्वात् योगश्च असौ इति, तेन संन्यासयोगेन युक्तः आत्मा अन्तःकरण यस्य तव सः त्वं संन्यासयोगयुक्तात्मा सन् विमुक्तः कर्मबन्धनै. जीवन्नेव पतिते चास्मिन् शरीरे माम् उपैष्यसि आगमिष्यसि ॥

रागद्वेषवान् तर्हि भगवान्, यतो भक्तान् अनुगृह्णाति, न इतरान् इति । तत् न—

समोऽहं सर्वभूतेषु
न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या
मयि ते तेषु चाप्यहम् ॥ २९ ॥

समः तुल्यः अहं सर्वभूतेषु । न मे द्वेष्यः अस्ति न प्रियः । अग्निवत् अहम्—दूरस्थानां यथा अग्निः शीतं न अपनयति, समीपम् उपसर्पतां अपनयति, तथा अहं भक्तान् अनुगृह्णामि, न इतरान् । ये भजन्ति तु माम् ईश्वरं भक्त्या मयि ते—स्वभावत एव, न मम रागनिमित्तम्—वर्तन्ते । तेषु च अपि अहं स्वभावत एव वर्ते, न इतरेषु । न एतावता तेषु द्वेषो मम ॥

शृणु मद्भक्तेर्माहात्म्यम्—

अपि चेत्सुदुराचारो
भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः
सम्यग्व्यवसितो हि सः ॥

अपि चेत् यद्यपि सुदुराचारः सुष्ठु दुराचारः अतीव कुत्सिताचारोऽपि भजते माम् अनन्यभाक् अनन्यभक्तिः सन्, साधुरेव सम्यग्वृत्त एव स मन्तव्य ज्ञातव्यः, सम्यक् यथावत् व्यवसितो हि सः, यस्मात् साधुनिश्चय सः ॥

उत्सृज्य च बाह्यां दुराचारताम् अन्तः सम्यग्व्यवसायमामर्थ्यात्—

क्षिप्रं भवति धर्मात्मा
शश्वच्छान्तिं निगच्छति ।
कौन्तेय प्रतिजानीहि
न मे भक्तः प्रणश्यति ॥ ३१ ॥

क्षिप्रं शीघ्रं भवति धर्मात्मा धर्मचित्तः एव । शश्वत् नित्यं शान्ति च उपशमं निगच्छति प्राप्नोति । शृणु पर-

मार्थम्, कौन्तेय प्रतिजानीहि निश्चितां प्रतिज्ञां कुरु, न मे मम भक्त मयि समर्पितान्तरात्मा मद्भक्त. न प्रणश्यति इति ॥

किंच—

मां हि पार्थ व्यपाश्रित्य
येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रा-
स्तेऽपि यान्ति परां गतिम् ॥ ३२ ॥

मां हि यस्मात् पार्थ व्यपाश्रित्य माम् आश्रयत्वेन गृहीत्वा येऽपि स्युः भवेयु पापयोनयः पापा योनिः येषां ते पाप-योनय· पापजन्मानः । के ते इति, आह— स्त्रिय. वैश्या. तथा शूद्रा. तेऽपि यान्ति गच्छन्ति परां प्रकृष्टां गतिम् ॥

किं पुनर्ब्राह्मणाः पुण्या
भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोक-
मिमं प्राप्य भजस्व माम् ॥ ३३ ॥

· किं पुनः ब्राह्मणाः पुण्याः पुण्ययोनय. भक्ताः राजर्षयः

तथा राजानश्च ते ऋषयश्च इति राजर्षय. । यत एवम्, अतः अनित्यं क्षणभङ्गुरम् असुखं च सुखवर्जितम् इमं लोकं मनुष्यलोकं प्राप्य पुरुषार्थसाधनं दुर्लभं मनुष्यत्वं लब्ध्वा भजस्व सेवस्व माम् ॥

कथम्—

मन्मना भव मद्भक्तो
मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैव-
मात्मानं मत्परायणः ॥ ३४ ॥


इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां
भीष्मपर्वणि श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्म-
विद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
राजविद्याराजगुह्ययोगो नाम
नवमोऽध्यायः ॥

मयि वासुदेवे मनः यस्य तव स त्वं मन्मना. भव । तथा मद्भक्तः भव मद्याजी मद्यजनशीलः भव । माम् एव च नमस्कुरु । माम् एव ईश्वरम् एष्यसि आगमिष्यसि

युक्त्वा समाधाय चित्तम् । एवम् आत्मानम्, अहं हि सर्वेषां भूतानाम् आत्मा, परा च गतिः, परम् अयनम्, त माम् एवंभूतम्, एष्यसि इति अतीतेन संबन्ध, मत्परायण सन् इत्यर्थः ॥

इति श्रीमत्परमहसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपाद-शिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्रीमद्भगवद्गीताभाष्ये

नवमोऽध्यायः ॥



परिग्रहण सं०.....10373.....
ग्रन्थालय, के. उ. ति. शि. संस्थान
सारनाथ, वाराणसी